श्रीबिह्लणमहाकविप्रणीतम्

विक्रमाङ्कदेवचरितम् ।

मूल्यं [illegible]

श्रीबिह्लणमहाकविप्रणीतम्

विक्रमाङ्कदेवचरितम्

श्रीरामावतारशर्मणा संस्कृतम्

काश्यां ज्ञानमण्डलयन्त्रालये प्रकाशितम् ।

१९७८ विक्रमाब्दः

मूल्यं सार्द्धैकरूप्यकः ।

महताब रायके प्रबंधसे ज्ञानमण्डल यन्त्रालय,
काशीमें छपकर मुद्रित हुआ।

भूमिका

यह विक्रमाङ्कदेवचरित महाकाव्य जगत्प्रसिद्ध महाकवि बिह्लणकी कृति है। वैक्रम द्वादश शतकके पूर्वार्द्धके अन्तमें (शक एकादश शतकके आरम्भमें, खिस्तीय एकादश शतकके अन्तमें) इस काव्यका निर्माण हुआ। इसके निर्माणके समय धारेश्वर भोज मर चुके थे। काव्य नायक चालुक्य विक्रमादित्य दक्षिणमें तथा अनन्त राजके पुत्र कलश देव कश्मीरमें राज्य कर रहे थे। चालुक्य विक्रमका समय ९९८–१०३८ शकाब्द है और कलशदेव का समय १००२-१०१० शकाब्द है।

ज्येष्ठ कलश और नागादेवीके पुत्र बिह्लण महाकवि हुए। इनका सोनेका सा रङ्ग था और ये जैसे सुन्दर थे वैसे ही बुद्धिमान् भी थे। मथुरा कान्यकुब्ज प्रयाग, धार, गुजरात, आदिकी यात्रा करते, सब जगह शास्त्रार्थ और कवितामें गङ्गाधर आदि सामयिक विद्वानोंको पराजित करते हुए, कर्णाटमें चालुक्य विक्रमादित्य-के यहां विद्यापतिका पद पाकर बिह्लणने इस महाकाव्यका निर्माण किया। बिह्लण चरित-जिसके चौरपञ्चाशिका भी अन्तगर्त है-और कर्णसुन्दरी नाटिका, ये दो और ग्रन्थ बिह्लणके नामसे प्रसिद्ध हैं। पर इन दोनोंकी कविता ऐसी प्रौढ़ नहीं जैसी विक्र-माङ्क देवचरितकी। शैली आदिमें इतना अन्तर है कि इन दोनोंका निर्माण बिह्लण महाकविके हाथसे संदिग्ध ही है। बिह्लण चरित बम्बईकी काव्यमालामें छपा है। इसमें अवन्तिराज वीरसिंहकी पुत्री शशिकलासे बिह्लणके प्रेमकी सुप्रसिद्ध कथा लिखी है।

पर ये नाम और यह समूची कथा कल्पितसी जान पड़ती है। जैसी कालिदास और विद्याधरीकी कथा है, वैसे ही यह भी मुग्धोंकी कल्पना है। अपने विषयमें जो कुछ कविने विक्रमाङ्कदेव-चरितके अन्तिम या अठारहवें सर्गमें लिखा है, जिसका सारांश यहां दिया है, उतना ही प्रामाणिक है।

विक्रमाङ्क देव चरित महाकाव्य अठारह सर्गोंमें लिखा गया है। इसके नायक चालुक्य विक्रमादित्य हैं . १७ सर्गोंमें नायकका चरित है और १८वेंमें कविने अपना वृत्तान्त तथा कश्मीरका वर्णन किया है। प्रथम सर्गमें चालुक्य वंशकी उत्पत्ति, इस राजवंशका अयोध्यासे दक्षिणमें जाना और इस वंशके श्रीतैलप जयसिंहदेव तथा आहव-मल्लदेवका संक्षिप्त विजय वृत्तान्त है। द्वितोयमें आहवमल्लदेवके ज्येष्ठ पुत्र सोमदेव तथा मध्यम पुत्र विक्रमादित्यकी उत्पत्ति वर्णित है।

तृतीयमें विक्रमादित्यके कनिष्ठ भ्राता जयसिंहको उत्पत्ति और सोमदेवकी यौवराज्यप्राप्ति है। इसी सर्गके अन्तमें काञ्चीपर विक्रमादित्यकी लूटमारका वर्णन है। चतुर्थमें आहवमल्लका मरण है। इसी सर्गके अन्तमें बड़े भाई सोमदेवकी कुनीति और दुराचारसे विरक्त हो घर छोड़कर विक्रमादित्यका देशान्तर जाना और उनका दिग्विजयारम्भ है। पंचममें पराजित चोल राजसे संधिका वर्णन है। षष्ठमें सोमदेवसे मिले हुए द्रविडराज विक्रमादित्यका युद्ध हुआ है, जिसमें द्रविड राजका पराजय, सोमदेवका कारावास और विक्रमादित्यको राजगद्दी हुई। सप्तममें प्रौढ वसन्तका वर्णन है। अष्टममें करहाट राजाकी पुत्री चन्द्रलेखाका स्वयंवर-वर्णन कालिदासीय इन्दुमतीके स्वयंवर वर्णनके ढंगपर है। दशममें पुनः वसन्तवर्णन तथा जलकेलि-वर्णन है। एकादशमें सन्ध्या वर्णन, रात्रि क्रीडा तथा मागधीकृत

राज-प्रबोधन है। द्वादशमें राजाका कल्याणपुरको लौट आना तथा ग्रीष्मकालिक जलक्रीडाका वर्णन है। त्रयोदशमें ग्रीष्मान्त तथा वर्षाका आरम्भ है। चतुर्दशमें शरदारम्भ और अपने छोटे भाईके विश्वास घातके कारण विक्रमादित्यकी पुनः युद्ध यात्राका वर्णन है। पञ्चदशमें घोर युद्ध और विक्रादित्यका विजय है। षोडशमें हेमन्तकी मृगयाका वर्णन है। सप्तदशमें विक्रमादित्यकी दानशीलताके वर्णनके बाद पुनः चोलराजसे कांचीके पास हुए युद्धका वर्णन है। इस युद्धमें भी विक्रमादित्यका ही विजय हुआ। काव्यकी भी यहीं समाप्ति है। अष्टादशमें कविने कश्मीरका वर्णन कर केवल अपना वृत्तान्त दिया है।

बिह्लण महाकविको प्रौढ़ि प्राचोन साहित्यज्ञोंमें चिरकालसे प्रसिद्ध है। भगवान् बाल्मीकि और व्यासकी कीर्त्ति तो भारतमें ही क्या, संसारके समस्त कवियोंके शिरपर स्थित है। पर उनके बादके कालिदास आदि महाकवियोंमें साहसाङ्क-चरित निर्माता परिमल पद्मगुप्तका और विक्रमाङ्कदेव चरितकार बिह्लणका बहुत बड़ा दर्जा है। कविताके गुणोंसे तो विक्रमाङ्कदेवचरित का महत्व है ही, परन्तु एक और भी बड़ा गौरव इसका इतिहासकी दृष्टिसे है। इधर तीन हज़ार वर्षसे भारतीय ऐतिहासिक चरित बहुत ही थोड़े मिलते हैं।

मुद्रा राक्षस नाटक, हर्ष चरित, विक्रमाङ्क चरित, कुमारपाल चरित आदि इस वर्गके एक हैं। इतिहासाध्येताओंके लिए ये बड़े प्रयोजनीय हैं। पर आधुनिक समयमें इसका लोप ही हो गया था। अस्ट्रिय (Austria) देशके विद्वान् बुलर महाशयको कई वर्ष हुए इसको प्रतियां मिली थीं। इनके आधारपर बुलरने इसे छपवाया, पर छपी प्रतियां कुछ ही वर्षमें दुर्लभ हो गयीं पुनर्मुद्रणका आरम्भ नहीं हुआ। इस अभावकी पूर्तिके लिए

आज यह संस्करण प्रकाशित हुआ है। इसमें यथा शक्ति बुलरकी अशुद्धियोंका भी संशोधन किया गया है, तो भी छापने आदिमें अशुद्धियां रह गयो है पर आशा हैं कि सज्जन लोग इस दुर्लभ पुस्तककी सफलताके आनन्दमें ऐसी छोटी त्रुटियोंको क्षमाकी दृष्टिसे देखेंगे।

संस्कर्त्ता।

शुद्धिपत्रम्

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
२	१६	रज्ज	रञ्ज
४	३८	याङ्क्षे	याङ्क्षे
८	८९	प्रया	प्रपा
	९०	बाष्या	बाष्पा
१३	२६	दुनोति मा	दुनोतिमा
१४	४०	रस्थि	करस्थि
		गुणौ	गुणैः
२२	४८	त्वभ	त्वत्र
	५२	श्रत्वे	श्रुत्वे
२६	१२	डोय	डोप
२७	१६	नादभ्रा	नोद्भ्रा
५१	६१	किमत्य	किमस्त्य
५७	६८	भुवन	भुवनं
५९	१२	हंसा	हंसाः
६४	७१	लदली	लक्ष्मी
७३	८०	पृथे	वृथे
	८८	फण	फणा
	८९	दोर्मण्ड	दोर्मण्डल
७६	१२६	स्थोद	त्वोद
७९	७	विवधो	विविधो
८७	७	शतखण्ड	शतखण्डं
	१२	द्राङ्जा	द्राङ्निजा
८८	२०	प्रतिहत	प्रतिहतं
९६	९५ ; ९४	श्लोकानन्तरं पाठ्यः	
९३	८१	चित्त	चित्तः
९४	८५	प्रला	वेला
९५	९४	अस्तःत्क्षमा	अस्तत्क्षमा
१०१	४४	वत्का	वक्त्रा
१०१	५५	सम्राज्य	साम्राज्य
१०२	६८	काञ्चन	काचन
१०३	७७	सरो ज	सरोज
१०४	१	धान्य	धान्य
	५	कमेण	क्रमेण
	१०	यालिक	पालिक
१०५	२२	कन्दकैः	कन्दलैः
	२४	द्रीःस	द्रीस
१०६	२८	प्रवृषि	प्रावृषि
	३७	त्ययः	त्ययं
		कर्मुक	कार्मुक
१०८	५७	ध्रुवां	ध्रुवं
	५७	ललित	लालिता
	६२	वल्मा	वल्गा
१०९	७५	सभीत	समील
	७७	मीलत	मीलित
११०	८२	बला	वला
११०	८२	पारासु	परासु
	८३	मम्बुधे	मम्बुधेः
	८७	रःगर्जा	रगर्जा
१११	९०	पूर्वते	पूतैर्व
११२	१३	सन्मु	संमु
११९	२५	त्रणः	त्रणाः
१२०	३२	अवलम्ब	अवलम्ब्य
१२१	४१	दम्भै	दम्भे

पृष्ठे	श्लोके	अशुद्धम्	शुद्धम्
१२२	५६	दिशु	दिक्षु
	६४	ह्लस	ह्रस
१२४	७६	चितं	चितुं
	८६	सर्ब	सर्वां
१२८	४०	ङकृत-	प्रिय-
		चापदण्डे	विप्रयोग:
	४१	पि ीनि-	निबिडी-
		विप्रिय-	कृतचा-
		विप्रयोगः	पदण्डे
१३२	२६	अवाप्र	अवाप्त
१३३	३३	गांत	गति
१३४	४१	चोज्व	चोज्ज्व
१३५	५६	ङ्का	ङ्कुरा
	५८	प्र ल्भ	प्रगल्भ
	६०	मतिथे	मातिथे
	६२	परङ्	पराङ्
१३६	६५	निण्टु	निष्ठु
		पक्ति	पङ्क्ति
१३६	६७	मुत्सव	मुत्सह
१४६	६२	रस्था	रथ्या
१४८	७८	सलिबा	सलिला
		धर्मथ्या	धर्मस्य
		बभूबुः	बभूवुः
१५०	८७	भग्नवा	भग्नः
१५१	६५	दिक्काट	दिक्कोट
१५२	१००	जृम्भृ	जृम्भ
१५३	१०६	यशामये	यशोमये
१५३	१०८	शबर	शाबर

अथ विक्रमाङ्कदेवचरितम्

भुजप्रभादण्ड इवोर्ध्वगामी स पातु वः कंसरिपोः कृपाणः ।
यः पाञ्चजन्यप्रतिबिम्बभङ्ग्या धाराम्भसः फेनमिव व्यनक्ति ॥१॥
श्रीधाम्नि दुग्धोदधिपुण्डरीके यश्चञ्चरीकद्युतिमातनोति ।
नीलोत्पलश्यामलदेहकान्तिः स वोऽस्तु भूत्यै भगवान्मुकुन्दः ॥२॥
वक्षःस्थली रक्षतु सा जगन्ति जगत्प्रसूतेर्गरुडध्वजस्य ।
श्रियोऽङ्गरागेण विभाव्यते या सौभाग्यहेम्नः कषपट्टिकेव ॥३॥
एकः स्तनस्तुङ्गतरः परस्य वार्त्तामिव प्रष्टुमगान्मुखाग्रम् ।
यस्याः प्रियार्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री ॥४॥
सान्द्रां मुदं यच्छतु नन्दको वः सोल्लासलक्ष्मीप्रतिबिम्बगर्भः ।
कुर्वन्नजस्रं यमुनाप्रवाहसलीलराधास्मरणं मुरारेः ॥५॥
पार्श्वस्थपृथ्वीधरराजकन्याप्रकोपविस्फूर्जित[1]कातरस्य ।
नमोऽस्तु ते मातरिति प्रणामाः शिवस्य सन्ध्याविषया जयन्ति ॥६॥
वचांसि वाचस्पतिमत्सरेण साराणि लब्धुं ग्रहमण्डलीव ।
मुक्ताक्षसूत्रत्वमुपैति यस्याः सा सप्रसादास्तु सरस्वती वः ॥७॥
अशेषविघ्नप्रतिषेधदक्षमन्त्राक्षतानामिव दिङ्मुखेषु ।
विक्षेपलीला करशीकराणां करोतु वः प्रीतिमिभाननस्य ॥८॥
अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः ।
वैदर्भरीतिः कृतिनामुदेति सौभाग्यलाभप्रतिभूः पदानाम् ॥९॥
जयन्ति ते पञ्चमनादमित्रचित्रोक्तिसंदर्भविभूषणेषु ।
सरस्वती यद्व[2]दनेषु नित्यमाभाति वीणामिव वादयन्ती ॥१०॥

पाठान्तरम्— १ जंधु । २ नारविन्देष्वा

साहित्यपाथोनिधिमन्थनोत्थं कर्णामृतं रक्षत हे कवीन्द्राः ।
यदस्य दैत्या इव लुण्ठनाय काव्यार्थचौराः[1]प्रगुणीभवन्ति ॥११॥
गृह्णन्तु सर्वे यदि वा यथेष्टं नास्ति क्षतिः कापि कवीश्वराणाम् ।
रत्नेषु[2]लुप्तेषु बहुष्वमर्त्यैरद्यापि रत्नाकर एव सिन्धुः ॥१२॥
सहस्रशः सन्तु विशारदानां वैदर्भलीलानिधयः प्रबन्धाः ।
तथापि वैचित्र्यरहस्यलुब्धाः श्रद्धां विधास्यन्ति सचेतसोत्र ॥१३॥
कुण्ठत्वमायाति गुणः कवीनां साहित्यविद्याश्रमवर्जितेषु ।
कुर्यादनार्द्रेषु किमङ्गनानां केशेषु कृष्णागुरुधूपवासः ॥१४॥
प्रौढिप्रकर्षेण पुराणरीतिव्यतिक्रमः श्लाघ्यतमः पदानाम् ।
अत्युन्नतिस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि ॥१५॥
व्युत्पत्तिरावर्जितकोविदापि न रञ्जनाय क्रमते जडानाम् ।
न मौक्तिकच्छिद्रकरी शलाका प्रगल्भते कर्मणि टङ्किकायाः ॥१६॥
कथासु ये लब्धरसाः कवीनां ते नानुरज्यन्ति कथान्तरेषु ।
न ग्रन्थिपर्णप्रणयाश्चरन्ति कस्तूरिकागन्धमृगास्तृणेषु ॥१७॥
जडेषु जातप्रतिभाभिमानाः खलाः कवीन्द्रोक्तिषु के वराकाः ।
प्रशान्तिनिर्वापणगर्वमम्बु रत्नाङ्कुरज्योतिषि किं करोति ॥१८॥
उल्लेखलीलाघटनापटूनां सचेतसां वैकटिकोपमानाम् ।
विचारशाणोपलपट्टिकासु मत्सूक्तिरत्नानि निधीभवन्तु ॥१९॥
न दुर्जनानामिह कोपि दोषस्तेषां स्वभावो हि गुणासहिष्णुः ।
द्वेष्यैव केषामपि चन्द्रखण्डविपाण्डुरा पुण्ड्रकशर्करापि ॥२०॥
सहोदराः कुङ्कुमकेसराणां भवन्ति नूनं कविता विलासाः ।
न शारदादेशमपास्य दृष्टस्तेषां यदन्यत्र मया प्ररोहः ॥२१॥
रसध्वनेरध्वनि ये चरन्ति संक्रान्तवक्रोक्तिरहस्यमुद्राः ।
तेऽस्मत्प्रबन्धानवधारयन्तु कुर्वन्तु शेषाः शुकवाक्यपाठम् ॥२२॥

---

१ प्रचुरी। २ मुष्टेषु।

अनन्यसामान्यगुणत्वमेव भवत्यनर्थाय महाकवीनाम् ।
ज्ञातुं यदेषां सुलभाः सभासु न जल्पमल्पप्रतिभाः क्षमन्ते ॥२३॥
अलौकिकोल्लेखसमर्पणेन विदग्धचेतःकषपट्टिकासु ।
परीक्षितं काव्यसुवर्णमेतल्लोकस्य कण्ठाभरणत्वमेतु ॥२४॥
किं चारुचारित्रविलासशून्याः कुर्वन्ति भूपाः कविसंग्रहेण ।
किं जातु गुञ्जाफलभूषणानां सुवर्णकारेण वनेचराणाम् ॥२५॥
पृथ्वीपतेः सन्ति न यस्य पार्श्वे कवीश्वरास्तस्य कुतो यशांसि ।
भूपाःकियन्तो न बभूवुरुर्व्यां जानाति नामापि न कोपि तेषाम्॥२६॥
लङ्कापतेः संकुचितं यशो यद्यत्कीर्तिपात्रं रघुराजपुत्रः ।
स सर्व एवादिकवेः प्रभावो न [1]कोपनीयाः कवयःक्षितीन्द्रैः॥२७॥
गिरां प्रवृत्तिर्मम नीरसापि मान्या भवित्री नृपतेश्चरित्रैः ।
के वा न शुष्कां मृदमभ्रसिन्धुसंबन्धिनीं मूर्धनि धारयन्ति ॥२८॥
कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान्खलानाम् ।
निरीक्षते केलिवनं प्रविश्य क्रमेलकः कण्टकजालमेव ॥२९॥
एषास्तु चालुक्यनरेन्द्रवंशसमुद्भवानां गुणमौक्तिकानाम् ।
मद्भारतीसूत्रनिवेशितानामेकावली कण्ठविभूषणं वः ॥३०॥
लोकेषु सप्तस्वपि विश्रुतोसौ सरस्वतीविभ्रमभूः स्वयंभूः ।
चत्वारि काव्यानि चतुर्मुखस्य यस्य प्रसिद्धाः श्रुतयश्चतस्रः॥३१॥
एकस्य सेवातिशयेन शङ्के पङ्केरुहस्यासनतां गतस्य ।
आराधितो यः सकलं कुटुम्बं चकार लक्ष्मीपदमम्बुजानाम् ॥३२॥
ब्रह्मर्षिभिर्ब्रह्ममयीममुष्य सार्धं कथां वर्धयतः कदाचित् ।
त्रैलोक्यबन्धोः सुरसिन्धुतीरे प्रत्यूषसंध्यासमयो बभूव ॥३३॥
मृणालसूत्रं निजवल्लभायाः समुत्सुकश्चाटुषु चक्रवाकः ।
अन्योन्यविश्लेषणयन्त्रसूत्रभ्रान्त्येव चञ्चुस्थितमाचकर्ष ॥३४॥

---

१ वञ्चनीयाः ।

आरक्तमर्घ्यार्पणतत्पराणां सिद्धाङ्गनानामिव कुङ्कुमेन ।
बिम्बं दधे बिम्बफलप्रतिष्ठां राजीविनीजीवितवल्लभस्य ॥३५॥
सुधाकरं वार्धकतः क्षपायाः संप्रेक्ष्य मूर्धानमिवानमन्तम् ।
तद्विप्लवायेव सरोजिनीनां स्मितोन्मुखं पङ्कजवक्त्रमासीत् ॥३६॥
ज्ञात्वा विधातुश्चुलुकात्प्रसूतिं तेजस्विनोन्यस्य समस्तजेतुः ।
प्राणेश्वरः पङ्कजिनीवधूनां पूर्वाचलं दुर्गमिवारुरोह ॥३७॥
जगाम याङ्केषु रथाङ्गनाम्नां परस्परादर्शनलेपनत्वम् ।
सा चन्द्रिका चन्दनपङ्ककान्तिः शीतांशुशाणा[1]फलके ममज्ज॥३८॥
सन्ध्यासमाधौ भगवान्स्थितोथ शक्रेण बद्धाञ्जलिना प्रणम्य ।
विज्ञापितः शेखरपारिजातद्विरेफनादद्विगुणैर्वचोभिः ॥३९॥
आस्ते यदैरावणवारणस्य मदाम्बुसङ्गान्मिलितालिमाला ।
साम्राज्यलक्ष्मीजयतोरणाभे दन्तद्वये वन्दनमालिकेव ॥४०॥
यदातपत्रं मम नेत्रपद्मसहस्रलोलालिकदम्बनीलम् ।
कुरङ्गनाभीतिलकप्रतिष्ठां मुखे समारोहति राजलक्ष्म्याः ॥४१॥
यन्नन्दने कल्पमहीरुहाणां छायासु विश्रम्य रतिश्रमेण ।
गायन्ति मे शौर्यरसोर्जितानि गीर्वाणसारङ्गदृशो यशांसि ॥४२॥
किंवा बहूक्तैः पुरुहूत एष पात्रं महिम्नो यदनङ्कुशस्य ।
स्वामिन्स सर्वोपि शिरोधृतानां त्वत्पादसेवारजसां प्रभावः॥४३॥
निवेदितश्चारजनेन नाथ तथा क्षितौ संप्रति विप्लवो मे ।
मन्ये यथा यज्ञविभागभोगः स्मर्तव्यतामेष्यति निर्जराणाम्॥४४॥
धर्मद्रुहामत्र निवारणाय कार्यस्त्वया कश्चिदवार्यवीर्यः ।
रवेरिवांशुप्रसरेण यस्य वंशेन सुस्थाः ककुभः क्रियन्ते ॥४५॥
पुरंदरेण प्रतिपाद्यमानमेवं समाकर्ण्य वचो विरञ्चिः ।
संध्याम्बुपूर्णे चुलुके मुमोच ध्यानानुविद्धानि विलोचनानि ॥४६॥

---

१ शाणी ।

प्रकोष्ठपृष्ठस्फुरदिन्द्रनीलरत्नावलीकङ्कणडम्बरेण ।
बन्धाय धर्मप्रतिबन्धकानां बध्नन्सहोत्थानिव नागपाशान् ॥४७॥
उत्तर्जनीकेन मुहुः करेण कृताकृतावेक्षणबद्धलक्षः ।
रुषा निषेधन्निव चेष्टितानि दिक्पालवर्गस्य निरर्गलानि ॥४८॥
भोगाय वैपुल्यविशेषभाजं कर्तुं धरित्रीं निजवंशजानाम् ।
केयूरसंक्रान्तविमानभङ्ग्या भुजोद्धृतक्ष्माभृदिवेक्ष्यमाणः ॥४९॥
अखर्वगर्वस्मितदन्तुरेण विराजमानोऽधरपल्लवेन ।
समुत्थितः क्षीरविपाण्डुराणि पीत्वेव सद्यो द्विषतां यशांसि ॥५०॥
सुवर्णनिर्माणमभेद्यमस्त्रैः स्वभावसिद्धं कवचं दधानः ।
जयश्रियः काञ्चनविष्टराभं समुद्वहन्नुन्नतमंसकूटम् ॥५१॥
स्वःसुन्दरीवृन्दपरिग्रहाय दत्तोऽञ्जलिः संप्रति दानवेन्द्रैः ।
इति प्रहर्षादमराङ्गनानां नेत्रोत्पलश्रेणिभिरर्च्यमानः ॥५२॥
अपि स्वयं पङ्कजविष्टरेण देवेन दृष्टश्चिरमुत्सुकेन ।
वाञ्छाधिकप्रस्तुतवस्तुसिद्धिसविस्मयस्मेरमुखाम्बुजेन ॥५३॥
कषोपले पौरुषकाञ्चनस्य पङ्के यशःपाण्डुसरोरुहाणाम् ।
व्यापारयन्दृष्टिमतिप्रहृष्टामवाप्तपाणिप्रणये कृपाणे ॥५४॥
हेमाचलस्येव कृतः शिलाभिरुदारजाम्बूनदचारुदेहः ।
अथाविरासीत्सुभटस्त्रिलोकत्राणप्रवीणश्चुलुकाद्विधातुः ॥५५॥
प्रस्थाप्य शक्रं धृतिमान्भवेति हर्षाश्रुपारिप्लवदृक्सहस्रम् ।
स शासनात्पङ्करुहासनस्य मरुद्विपक्षक्षयदीक्षितोऽभूत् ॥५६॥
क्ष्माभृत्कुलानामुपरि प्रतिष्ठामवाप्य रत्नाकरभोगयोग्यः ।
क्रमेण तस्मादुदियाय वंशः शौरेः पदाद्गाङ्ग इव प्रवाहः ॥५७॥
विपक्षवीराद्भुतकीर्तिहारी हारीत इत्यादिपुमान्स यत्र ।
मानव्यनामा च बभूव मानी मानव्ययं यः कृतवानरीणाम् ॥५८॥
गलद्विलासालकपल्लवानि विशीर्णपत्रावलिमण्डनानि ।
मुखानि वैरिप्रमदाजनस्य यद्भूभृतीनां जगदुः प्रतापम् ॥५९॥

उत्खातविश्वोत्कटकण्टकानां यत्रोदितानां पृथिवीपतीनाम् ।
क्रीडागृहप्राङ्गणलीलयैव बभ्राम कीर्तिर्भुवनत्रयेपि ॥६०॥
यत्पार्थिवैः शत्रुकठोरकण्ठपीठास्थिनिर्लोठनकुण्ठधारः ।
निन्ये कृपाणः पटुतां तदीयकपालशाणोपलपट्टिकासु ॥६१॥
निरादरश्चन्द्रशिखामणौ यः प्रीतेपि लोकत्रितयैकवीरः ।
क्षिपन्कृपाणं दशमेपि मूर्ध्नि स्वयंधृतः क्ष्माधरराजपुत्र्या ॥६२॥
प्रसाध्य तं रावणमध्युवास यां मैथिलीशः कुलराजधानीम् ।
ते क्षत्रियास्तामवदातकीर्तिं पुरीमयोध्यां विदधुर्निवासम् ॥६३॥
जिगीषवः केपि विजित्य विश्वं विलासदीक्षारसिकाः क्रमेण ।
चक्रुः पदं नागरखण्डचुम्बिपूगद्रुमायां दिशि दक्षिणस्याम् ॥६४॥
तदुद्भवैर्भूपतिभिः सलीलं चोलीरहःसाक्षिणि दक्षिणाब्धेः ।
करीन्द्रदन्ताङ्कुरलेखनीभिरलेखि कूले विजयप्रशस्तिः ॥६५॥
द्वीपक्ष्मापालपरंपराणां दोर्विक्रमादुत्खननोन्मुखास्ते ।
विष्णोः प्रतिष्ठेति विभीषणस्य राज्ये परं संकुचिता बभूवुः ॥६६॥
द्वीपेषु कर्पूरपरागपाण्डुष्वासाद्य लीलापरिवर्तनानि ।
भ्रान्त्या तुषाराद्रितटे लुठन्तः शीतेन खिन्नास्तुरगा यदीयाः ॥६७॥
श्रीतैलपो नाम नृपः प्रतापी क्रमेण तद्वंशविशेषकोभूत् ।
क्षणेन यः शोणितपङ्कशेषं संख्ये द्विषां वीररसं चकार ॥६८॥
विश्वंभराकण्टकराष्ट्रकूटसमूलनिर्मूलनकोविदस्य ।
सुखेन यस्यान्तिकमाजगाम चालुक्यचन्द्रस्य नरेन्द्रलक्ष्मीः ॥६९॥
शौर्योष्मणा खिन्नकरस्य यस्य संख्येषु खड्गः प्रतिपक्षकालः ।
पुरन्दरप्रेरितपुष्पवृष्टिपरागसङ्गान्मलिनत्वमाप ॥७०॥
यस्याञ्जनश्यामलखड्गपट्टजातानि जाने धवलत्वमापुः ।
अरातिनारीशरकाण्डपाण्डुगण्डस्थलीनिर्लुठनाद्यशांसि ॥७१॥
स्फूर्जद्यशोहंसविलासपात्रं निस्त्रिंशनीलोत्पलमुत्प्रभं यः ।
उत्तंसहेतोरिव वीरलक्ष्म्याः संग्रामलीलासरसश्चकर्ष ॥७२॥

विधाय सैन्यं युधि साक्षिमात्रं दासीकृतायाः प्रतिपक्षलक्ष्म्याः ।
यः प्रातिभाव्यार्थमिवाजुहाव महीभुजः शत्रुनरेन्द्रकीर्तिम् ॥७३॥
चालुक्यवंशामलमौक्तिकश्रीः सत्याश्रयोभूदथ भूमिपालः ।
खड्गेन यस्य भ्रुकुटिक्रुधेव द्विषां कपालान्यपि चूर्णितानि ॥७४॥
यस्येषवः संयुगयामिनीषु प्रोतप्रतिक्ष्मापतिमौलिरत्नाः ।
गृहीतदीपा इव भिन्दते स्म खड्गान्धकारे रिपुचक्रवालम् ॥७५॥
अवन्ध्यपातानि रणाङ्गणेषु सलीलमाकृष्टधनुर्गुणस्य ।
यस्यानमत्कोटितया व्यराजदस्त्राणि चुम्बन्निव चापदण्डः ॥७६॥
भूभृत्सहस्रार्पितदेहरन्ध्रैः क्रौञ्चाचलच्छिद्रविशारदानाम् ।
सेहे न गर्वः पृथुसाहसस्य यस्येषुभिर्भार्गवमार्गणानाम् ॥७७॥
दृप्तारिदेहे समरोपमर्दसूत्रावशेषस्थितहारदाम्नि ।
यज्ञोपवीतभ्रमतो बभूव यस्य प्रहर्तुः क्षणमन्तरायः ॥७८॥
प्राप्तस्ततः श्रीजयसिंहदेवश्चालुक्यसिंहासनमण्डनत्वम् ।
यस्य व्यराजन्त गजाहवेषु मुक्ताफलानीव महायशांसि ॥७९॥
यस्य प्रतापेन कदर्थ्यमानाः प्रत्यर्थिभूपालमहामहिष्यः ।
अन्वस्मरंश्चन्दनपङ्किलानि प्रियाङ्कपालीपरिवर्तनानि ॥८०॥
प्रतापभानौ भजति प्रतिष्ठां यस्य प्रभातेष्विव संयुगेषु ।
सूर्योपलानामिव पार्थिवानां केषां न तापः प्रकटीबभूव ॥८१॥
यात्रासु यस्य ध्वजिनीभरेण दोलायमाना सकला धरित्री ।
आर्द्रव्रणाधिष्ठितपृष्ठपीठमकर्मठं कूर्मपतिं चकार ॥८२॥
किरीटमाणिक्यमरीचिवीचिप्रच्छादिता यस्य विपक्षभूपाः ।
चिताग्निभीत्या समराङ्गणेषु न संगृहीताः सहसा शिवाभिः ॥८३॥
यात्रासु दिक्पालपुरीं विलुण्ठ्य न दिग्गजान्केवलमग्रहीद्यः ।
पलायितास्ते जयसिन्धुराणां गन्धेन समच्छदबान्धवेन ॥८४॥
अपारवीरव्रतपारगस्य पराङ्मुखा एव सदा विपक्षाः ।
अधिज्यचापस्य रणेषु यस्य यशः परं संमुखमाजगाम ॥८५॥

यशोवतंसं नगरं सुराणां कुर्वन्नगर्वः समरोत्सवेषु ।
न्यस्तां स्वहस्तेन पुरंदरस्य यः पारिजातस्रजमाससाद ॥८६॥
तस्मादभूदाहवमल्लदेवस्त्रैलोक्यमल्लापरनामधेयः ।
यन्मण्डलाग्रं न मुमोच लक्ष्मीर्धाराजलोत्था जलमानुषीव ॥८७॥
आख्यायिकासीम्नि कथाद्भुतेषु यः सर्गबन्धे दशरूपके च ।
पवित्रचारित्रतया कवीन्द्रैरारोपितो रामइति द्वितीयः ॥८८॥
भूपेषु कूपेष्विव रिक्तभावं कृत्वा प्रयापालिकयेव यस्य ।
वीरश्रिया कीर्तिसुधारसस्य दिशां मुखानि प्रणयीकृतानि ॥८९॥
कौक्षेयकः क्ष्मातिलकस्य यस्य पीत्वातिमात्रं द्विषतां प्रतापम् ।
आलोड्य बाष्पाम्बुभिराचचाम चोलीकपोलस्थलचन्दनानि ॥९०॥
दीप्रप्रतापानलसंनिधानाद्विभ्रत्पिपासामिव यत्कृपाणः ।
प्रमारपृथ्वीपतिकीर्तिधारां धारामुदारां कवलीचकार ॥९१॥
अगाधपानीयनिमग्नभूरिभूभृत्कुटुम्बोपि यदीयखड्गः ।
भाग्यक्षयान्मालवभर्तुरासीदेकां न धारां परिहर्तुमीशः ॥९२॥
निःशेषनिर्वासितराजहंसः खड्गेन बालाम्बुदमेचकेन ।
भोजक्ष्माभृद्भुजपञ्जरेपि यः कीर्तिहंसीं विरसीचकार ॥९३॥
भोजक्ष्मापालविमुक्तधारानिपातमात्रेण रणेषु यस्य ।
कल्पान्तकालानलचण्डमूर्तिश्चित्रं प्रकोपाग्निरवाप शान्तिम् ॥९४॥
यः कोटिहोमानलधूमजालैर्मलीमसीकृत्य दिशां मुखानि ।
सत्कीर्तिभिः क्षालयतिस्म शश्वदखण्डतारापतिपाण्डुराभिः ॥९५॥
ध्रुवं रणे यस्य जयामृतेन क्षीवः क्षमाभर्तुरभूत्कृपाणः ।
एका गृहीता यदनेन धारा धारासहस्रं यशसोवकीर्णम् ॥९६॥
शतक्रतोर्मध्यमचक्रवर्ती क्रमादनेकक्रतुदीक्षितोपि ।
ऐन्द्रात्पदादभ्यधिके पदे यस्तिष्ठन्न शङ्कास्पदतामयासीत् ॥९७॥
चिन्तामणिर्यस्य पुरो वराकस्तथाहि वार्ता जनविश्रुतेयम् ।
यत्र सौवर्णतुलाधिरूढे चक्रेस पाषाणतुलाधिरोहम् ॥९८॥

विधाय रूपं मशकप्रमाणं भयेन कोणे क्व चन स्थितस्य ।
कलेरिवोत्सारणकारणेन यो यागधूमैर्भुवनं रुरोध ॥९९॥
स्वाभाविकादुष्णगभस्तिभासः क्षत्रोष्मणो दृष्टिविघातहेतोः ।
यस्मिन् परित्रस्त इति क्षितीन्द्रे क्षणं न चिक्षेप कलिः कटाक्षम्॥१००॥
अन्यायमेकं कृतवान्कृती यश्चालुक्यगोत्रोद्भववत्सलोऽपि ।
यत्पूर्वभूपालगुणान्प्रजानां विस्मारयामास निजैश्चरित्रैः ॥१०१॥
विशीर्णकर्णा कलहेन यस्य पृथ्वीभुजङ्गस्य निरर्गलेन ।
संगच्छतेद्यापि न डाहलश्रीः कर्पूरताडङ्कनिभैर्यशोभिः ॥१०२॥

पाठान्तरम्

कर्णे विशीर्णे कलहेन यस्य पृथ्वीभुजङ्गस्य निरर्गलेन ।
कीर्तिः समाश्लिष्यति डाहलोर्वी न दन्तताडङ्कनिभाधुनापि॥१०३॥
यस्यासिरत्युच्छलता रराज धाराजलेनेव रणेषु धाम्ना ।
द्रुमारिमातङ्गसहस्रसंगमभ्युद्य गृह्णन्निव वैरिलक्ष्मीम् ॥१०४॥
यद्वैरिसामन्तनितम्बिनीनामश्रान्तसंतापकदर्थ्यमाने ।
पराङ्मुखं शोषविशङ्कयेव कुचस्थले कुङ्कुमपङ्कमासीत् ॥१०५॥
एकत्र वासादवसानभाजस्ताम्बूललक्ष्म्या इव संस्मरन्ती ।
वक्त्रेषु यद्वैरिविलासिनीनां हासप्रभा तानवमाससाद ॥१०६॥
यं वारिधिः प्रज्वलदस्त्रजालं वेलावनान्तेषु नितान्तभीतः ।
भूयः समुत्सारणकारणेन समागतं भार्गवमाशशङ्के ॥१०७॥
रत्नोत्करग्राहिषु यद्भटेषु तटत्रुटन्मौक्तिकशुक्तिभङ्ग्या ।
अस्फोटयत्तीरशिलातलेषु रोषेण मूर्धानमिवाम्बुराशिः ॥१०८॥
यं वीक्ष्य पाथोधिरधिज्यचापं शोणाश्मभिः शोणितशोणदेहैः ।
क्षोभादभीक्ष्णं रघुराजबाणजीर्णव्रणस्फोटमिवाचचक्षे ॥१०९॥
राशीकृतं विश्वमिवावलोक्य वेलावने यस्य चमूसमूहम् ।
अम्भोनिधिर्भूतिरपरिक्षयेण सारस्वमब्धिर्यदु मन्यते स्म ॥११०॥

उत्तम्भयामास पयोनिधेर्यस्तीरे जयस्तम्भमदम्भवीरः ।
असूयितं स्वैरविहारशीलैरालानभीत्या जलवारणेन्द्रैः ॥१११॥
लब्ध्वा यदन्तःपुरसुन्दरीणां लावण्यनिष्यन्दमुपान्तभाजाम् ।
गृहीतसारस्त्रिदशैः पयोधिः पेयूषसंदर्शनसौख्यमाप ॥११२॥
जयैकरागी विजयोद्यमेषु दृष्ट्वा प्रयाणावधिमम्बुधिं यः ।
उत्कण्ठितोभूद्दशकण्ठशत्रुसेतौ समस्यापरिपूरणाय ॥११३॥
दोर्दण्डदर्पाद् द्रविडप्रकाण्डं यः संमुखं धावितमेकवीरम् ।
अभाजनं वीररसस्य चक्रे बाणोत्करच्छिद्रपरंपराभिः ॥११४॥
पृथ्वीभुजङ्गः परिकम्पिताङ्गीं यशःपटोल्लुण्ठनकेलिकारः ।
विधृत्य काञ्चीं भुजयोर्बलेन यश्चोलराज्यश्रियमाचकर्ष ॥११५॥
चोलस्य यद्भीतिपलायितस्य भालत्वचं कण्टकिनो वनान्ताः ।
अद्यापि किं वानुभविष्यतीति व्यपाटयन्द्रष्टुमिवाक्षराणि ॥११६॥

दहत्यशेषं प्रतियोगिवर्ग-
मनर्गले यद्भुजशौर्यवह्नौ ।
प्रत्यर्थिपृथ्वीपतिचिन्त्यमानो
न कोपि मन्त्रः प्रतिबन्धकोऽभूत् ॥११७॥

भ्रमस्तस्य किमस्त्रकौशलविधौ देवस्य विक्रामतः
पुष्पेषोरिव यस्य दुष्परिहराः सर्वैरखर्वाः शराः ।
राज्ञामप्रतिभानमेव विदधे युद्धेषु यस्योर्जित-
ज्यानिष्ठ्यूतनितान्तनिष्ठुररवप्रामाण्यवादो भुजः ॥११८॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते प्रथमः सर्गः ॥१॥

चकार कल्याणमिति क्रमादसौ पुरं परार्ध्यं पृथिवीपुरंदरः ।
यदुच्चहर्म्यावलिदीपसंपदा विभाव्यते कज्जलसंनिभं नभः ॥१॥
निवर्तिताश्चन्दनलेपपाण्डुभिर्नतभ्रुवां यत्र समुन्नतैः स्तनैः ।
मुखानिला एव कदर्थनक्षमा भवन्ति माने मलयाद्रिवायवः ॥२॥
क्षपाकरः कातररश्मिमण्डलः पुरंध्रिगण्डस्थलकान्तिसंपदा ।
विकीर्णसंमार्जनभस्मरेणुना बिभर्ति यस्मिन्मुकुरेण तुल्यताम् ॥३॥

विलासदोलायितदन्तपत्रयोः
क्षपासु यत्रेन्दुरलक्ष्यमण्डलः ।
प्रविश्य संक्रान्तिमिषेण योषितां
कपोलयोः कान्तिजलं विलुम्पति ॥ ४ ॥

गतोपि यत्र प्रतिबिम्बवर्त्मना समीपतां वञ्चयितुं प्रगल्भते ।
मुखानि जाग्रन्मदनानि सुभ्रुवां सयामिकानीव न यामिनीपतिः॥५॥
जलाशया यत्र हसन्ति संततं नवेन्द्रनीलद्रवनिर्मलोदराः ।
शरत्समुत्सारितमेघकर्दमं कलिन्दकन्याह्रदमेचकं नभः ॥६॥
प्रकर्षवत्या कपिशीर्षमालया यदुद्भटस्फाटिकवप्रसंहतिः ।
विलोकयत्यम्बरकेलिदर्पणे विलासधौतामिव दन्तमण्डलीम् ॥७॥
पुराङ्गनावक्त्रसहस्रकान्तिभिस्तिरोहिते रात्रिषु तारकापतौ ।
क्व रौप्यकर्पूरकरण्डपाण्डुरः शशीति यत्र भ्रममेति रोहिणी ॥८॥
यदीयलीलास्फटिकस्थलीभुवाममुग्धदुग्धाब्धिसमत्विषां पुरः ।
दवाग्निनिर्दग्धवनस्थलोपमं विलोक्यते कज्जलकश्मलं नभः ॥९॥
तटद्रुमाणां प्रतिबिम्बमालया सपारिजातामिव दर्शयञ्छ्रियम् ।
स यत्तडागः कुरुते विडम्बनां गृहीतसारस्य सुरैः पयोनिधेः ॥१०॥
प्रतिक्षणं क्षालितमन्युना रणे प्रयुक्तरक्षस्य नृपेण मानिना ।
न यस्य कक्षां शतमन्युरक्षिता पुरी पुरप्राग्रहरस्य गाहते ॥११॥
करोति गण्डस्थलचन्द्रमण्डले विलासवेल्लन्मणिकुण्डलातिथौ ।
न यत्र वित्रस्तकुरङ्गचक्षुषां जिघर्षभीत्येव पदं कुरङ्गकः ॥१२॥

समुच्छलन्मौक्तिककान्तिवारिभिः सुवर्णकुम्भैः सुरसद्ममूर्धगैः ।
प्रपा पिपासापरितापशान्तये नभश्चरीणामिव येन निर्मिता॥१३॥
जगत्त्रयीकार्मणकर्मणि क्षमं निरीक्ष्य लीलायितमेणचक्षुषाम् ।
स्मरेण यत्र स्मरता पराभवं भवाय भूयः परिबोध्यते धनुः ॥१४॥
स्मरप्रशस्तिप्रतिवस्तुतां गताः सलीलदात्यूहसमूहनिस्वनाः ।
भवन्ति यत्र क्षणमात्रविभ्रमप्रदायिनः कण्ठरवेषु योषिताम् ॥१५॥
निराकृते यत्र रुषां समुद्गमे भुजङ्गसौभाग्यगुणेन सुभ्रुवाम् ।
वनान्तपुंस्कोकिलपञ्चमोर्मयो भवन्ति मानज्वरशेषभेषजम्॥॥१६॥
प्रविश्य यद्देशमसु रोहिणीपतिर्गुणं महान्तं लभते न संशयः ।
यदेष राहोरुपयात्यलक्ष्यतां पुरन्ध्रिवक्त्रेन्दुसहस्रमध्यगः ॥१७॥
यदीयसौधध्वजपट्टपट्टिकाः समुच्चलन्मौक्तिककान्तिनिर्झरैः ।
नभस्तलान्दोलनविभ्रमाहृतं विनिक्षिपन्तीव सुरापगापयः॥१८॥
अविस्मृतत्र्यम्बकनेत्रपावकः स्मरः स्मितेन्दीवरदीर्घचक्षुषाम् ।
विलासपीयूषनिधानकुम्भयोर्न यत्र वासं कुचयोर्विमुञ्चति॥१९॥
स्मरस्य यत्राद्भुतमस्त्रकौशलं तथा ह्यसौ चारुदृशां विलोचनैः ।
उपागतैरुत्पलपत्रमित्रतां शिलाकठोराणि मनांसि विध्यति॥२०॥
समुद्रवेलारतिरत्नसंपदा १ वधूतडित्ताण्डवमेघमण्डली ।
नभःस्थली विभ्रमतारकस्रजा २ विभाति यत्र स्मरतल्पकल्पना।२१।
त्यजन्ति हंसाः सरसीगुणैः स्थितिं न यत्र वर्षास्वपि हर्षगद्गदाः ।
अलङ्घनीयस्य निकाममुन्नतेर्दिशन्ति वप्रस्य यशस्तु दुर्जनाः ॥२२॥
निशासु यत्रोन्नतसौधसंगतिं विगाहमानस्य विधोः कुरङ्गकः ।
वतंसदूर्वाङ्कुरमेणचक्षुषां ग्रहीतुमाकाङ्क्षति वक्रकंधरः ॥२३॥
अवागुरं नेत्रकुरङ्गबन्धनं निरक्षरं पञ्चशरस्य शासनम् ।
गृहे गृहे यत्र विचित्रमन्वहं वितन्वते नृत्तमधीरलोचनाः ॥२४॥

---

१ संपदां पा. भे. २ स्रजां पा. भे.

अमुष्य लोकत्रितयाद्भुतैर्गुणैरतीत्य मार्गं मनसोपि तिष्ठतः ॥
असौ सदा मानसगोचरस्थिता कथं तुलायामलका प्रगल्भते ॥२५॥
विजित्य सर्वाः ककुभः सभार्गवप्रचण्डकोदण्डपरिश्रमो नृपः ।
उवास तत्रार्थिशतानि पूरयन्फलं हि पात्रप्रतिपादनं श्रियः॥२६॥
जगत्यनर्घेषु समस्तवस्तुषु क्षितीश्वरः पादतले स्थितेष्वपि ।
अभूद्विना पुत्रमुखेन्दुदर्शनं प्रभातनीलोत्पलदीनलोचनः ॥२७॥
उवाच कण्ठागतवाष्पगद्गदैः पदैः कदाचित्सहधर्मचारिणीम् ।
सरस्वतीहारलताभिवोज्ज्वलां प्रकाशयन्दन्तमयूखचन्द्रिकाम्॥२८॥

फलेन शून्यः सुतरां दुनोति
मामयं गृहस्थाश्रमधर्मपादपः ।
विलोकयामि प्रतिबिम्बमात्मनः
सुताभिधानं त्वयि नाधुनापि यत् ॥ २९ ॥

अलक्षणं बालमृगाक्षि मृग्यते न किंचिदङ्गेषु तवेदृशः परम् ।
पुराकृतः पुण्यविपर्ययो मम ध्रुवं फलर्द्धिप्रतिबन्धकस्त्वयि॥३०॥
अवीक्षमाणा सदृशं गुणैर्मम क्रमागता श्रीरियमाश्रयं पुरः ।
पयोधिमध्यस्थितपोतकूपकस्थिता शकुन्तीव मुहुः प्रकम्पते॥३१॥
प्रियप्रसादेन विलाससंपदा तथा न भूषाविभवेन गेहिनी ।
सुतेन निर्व्याजमलीकहासिना यथाङ्कपर्यङ्कगतेन शोभते ॥३२॥
वहन्ति हिंस्राः पशवः कमात्मनो गुणं वितर्क्यात्मजरक्षणश्रमम् ।
पदार्थसामर्थ्यमचिन्त्यमीदृशं यदत्र विश्राम्यति निर्भरं मनः॥३३॥
किमश्वमेधप्रभृतिक्रियाक्रमैः सुतोस्ति चेन्नोभयलोकबान्धवः ॥
ऋणं पितॄणामपनेतुमक्षमाः कथं लभन्ते गृहमेधिनः शुभम् ॥३४॥
प्रतापशौर्यादिगुणैरलंकृतोऽप्युपैति तावन्न कृतार्थतां नृपः ।
सुतेन दोर्विक्रमलब्धकीर्तिना न यावदारोहति पुत्रिणां धुरि॥३५॥
निशम्य देवस्य नितान्तदुःखिता कथामिति श्रोत्रपथप्रमाथिनीम् ।
जगाद किंचिन्न नरेन्द्रसुन्दरी परं निशश्वास तरङ्गितालका ॥३६॥

स धीरमुर्वीन्दुरधीरलोचनामथाङ्कमारोप्य कृपार्द्रमानसः ।
हरन्निवातङ्ककलङ्कमुज्ज्वलद्विजावलीकान्तिजलैरवोचत॥३७॥
अलं विषादेन करोषि किं मुखं कवोष्णनिःश्वासविधूसराधरम् ।
अभीष्टवस्तुप्रतिबन्धिनामहं कृताग्रहो निग्रहणाय कर्मणाम् ॥३८॥
अधीतवेदोस्मि कृतश्रुतागमः श्रमोस्ति भूयानितिहासवर्त्मसु ।
गुरुष्ववज्ञाविमुखं सदा मनस्तदभ्युपायोत्र मया न दुर्लभः ॥३९॥
किमस्ति दुष्प्रापमसौ निषेव्यते कुलप्रभुर्बालमृगाङ्कशेखरः ।
रस्थितस्यापि चकोरलोचने न पात्रमालस्यहतास्तपस्विनः ॥४०॥
तदेष तावत्तपसे सह त्वया प्रभूतभावः प्रयते यतेन्द्रियः ।
विभावरीवल्लभखण्डमण्डनः स यावदायाति दयां जगद्गुरुः ॥४१॥
विधाय शान्त्यै कलुषस्य कर्मणस्तदेष सर्वेन्द्रियतापनं तपः ।
नयामि भक्त्या झटिति प्रसन्नतामखण्डया खण्डशशाङ्कशेखरम्॥४२॥
तथेति देव्या कृतसंमतिस्ततः समस्तचिन्तां विनिवेश्य मन्त्रिषु ।
अभूदनुष्ठानविशेषतत्परः स पार्थिवः प्रार्थितवस्तुसिद्धये ॥४३॥
तपः स्वहस्ताहृतपुष्पपूजितत्रिलोचनः स्थण्डिलवासधूसरः ।
तथा स राजर्षिरसाधयद्यथा महर्षयोस्मादपकर्षमाययुः ॥४४॥
ससौकुमार्यैकधनोपि सोढवांस्तपोधनैर्दुष्प्रसहं परिश्रमम् ।
रराज तीव्रे तपसि स्थितो नृपः शशीव ताराद्युतिमण्डलातिथिः॥४५॥
नृपं कठोरव्रतचर्यया कृशं समाहिता सा नरनाथसुन्दरी ।
निशातशाणोल्लिखितं समन्वगात्प्रभेव माणिक्यमतीव निर्मला॥४६॥
मृगाङ्कचूडस्य किरीटनिम्नगातरङ्गवातैरिव वारितश्रमा ।
उपाचरत्सम्यगसौ नराधिपं स्वहस्तलिप्तेश्वरमन्दिराजिरा॥४७॥
तथाविधायाः सदृशं यदुन्नतेर्मतं यदौदार्यधनस्य चेतसः ।
तदद्रिकन्यादयितस्य पूजने जितेन्द्रियः कल्पयति स्म पार्थिवः॥४८॥
इति क्षितीन्द्रश्चिरमिन्दुशेखरप्रसादनाय व्रतमुग्रमाश्रितः ।
कदाचिदाकर्णयति स्म भारतीं प्रभातपूजासमये नभश्चरीम् ॥४९॥

अलं चुलुक्यक्षितिपालमण्डन श्रमेण विश्राम्यतु कर्कशं तपः ॥
कमप्यपूर्वं त्वयि पार्वतीपतिः प्रसादमारोहति भक्तवत्सलः ॥५०॥
इयं त्वदीया दयिता भविष्यति क्षितीन्द्र पुत्रत्रितयस्य भाजनम्।
चुलुक्यवंशः शुचितां यदर्जितैर्यशोभिरायास्यति मौक्तिकैरिव॥५१॥
निधिः प्रतापस्य पदं जयश्रियः कलालयस्ते तनयस्तु मध्यमः।
दिलीपमान्धातृमुखादिपार्थिवप्रभामतिक्रम्य विशेषमेष्यति ॥५२॥
सुतद्वयं ते निजकर्मसंभवं मम प्रसादात्तनयस्तु मध्यमः।
पयोनिधेः पारगतामपि श्रियं स दोर्बलाद्राम इवाहरिष्यति॥५३॥
गिरं निपीय श्रुतिशुक्तिमागतां सुधामिव व्योमपयोनिधेरिति ।
उदञ्चिरोमाञ्चतया समन्ततः स शैत्यसंपर्कमिव न्यवेदयत् ॥५४॥
उदञ्चदानन्दजलप्लुतेक्षणस्ततः प्रमोदालसलोचनोत्पलाम् ।
स वल्लभामन्यपुरंध्रिदुर्लभैर्गुणैरुपेतां गुणवानतोषयत् ॥५५॥
शनैर्विधाय व्रतपारणाविधिं धनैः कृतार्थीकृतविप्रमण्डलः ।
अखण्डसौभाग्यविलासया पुनस्तया समं राज्यसुखेष्वरज्यत ॥५६॥
क्रमेण तस्यां कमनीयमात्मजं शुभे मुहूर्ते पुरुहूतसंनिभः ।
अवाप्य संपादितमांसलोत्सवः परामगान्निर्वृतिमीश्वरः क्षितेः ॥५७॥
स सोमवन्नेत्रचकोरपारणां चकार गोत्रस्य यदुज्ज्वलाननः ।
यथोचितं सोम इति क्षमापतेस्ततः प्रसन्नादभिधानमाप्तवान् ॥५८॥
अनन्यसामान्यतनूजशंसिनीं स्मरन्नजस्रं गिरमुद्गतां दिवः ।
द्वितीयगर्भार्थमभूत्स निर्भरं समुत्सुको मध्यमलोकनायकः ॥५९॥
स्थितस्य गर्भे प्रभयेव कस्यचिद्विलिप्यमानां स्फटिकामलत्विषः ।
स गण्डपालीं बिसदण्डपाण्डुरां ददर्श देव्याः पृथिवीपतिस्ततः ।६०।
स हेमवृष्टिं महतीमकारयच्चकार चित्राण्युपयाचितानि च ।
हरप्रसादोचितसूनुलालसश्चकार किं किं न नरेन्द्रचन्द्रमाः ॥६१॥

---

१ यदूर्जितै B. G. S.

उवाह धौतां क्षितिपालवल्लभा सुधाप्रवाहैरिव देहकन्दलीम् ।
विषादपङ्कक्षयतः क्षमापतेर्निरन्तरं तु प्रससाद मानसम् ॥६२॥
निपीड्य चन्द्रं पयसे निवेशिता ध्रुवं तदीयस्तनकुम्भयोः सुधा ।
यदुत्पलश्यामलमाननं तयोः सलाञ्छनच्छायमिव व्यराजत ॥६३॥
नरेन्द्रकान्ताकुचहेमकुम्भयोः सुधारसं क्षीरमिषेण बिभ्रतोः ।
हिमोपचारार्पितमार्द्रचन्दनं श्रियं दधे गालनशुभ्रवाससः ॥६४॥

नरेन्द्रपुत्रस्य कृते सुरक्षितं
क्षितीशकान्ताकुचकुम्भयोः पयः ।
विलासहारोज्ज्वलमौक्तिकच्छला
त्समल्लिकावासमिव व्यधीयत ॥ ६५ ॥

मृगीदृशः श्यामलचूचुकच्छलात्कुचद्वये भूपसुतोपयोगिनि ।
प्रभावसंक्रान्तरसायनौषधीदलद्वयं नीलमिव व्यराजत ॥६६॥
निरन्तरायाससमर्थमर्थिनां कथं नु दारिद्र्यमसौ सहिष्यते ।
न येन मध्यस्थमपि व्यषह्यत स्थितेन गर्भे नरनाथयोषितः॥६७॥
वलेः समुल्लासमपाचकार यः स कारणादत्र कुतोऽपि वर्तते ।
इतीव गर्भः क्षितिपालयोषितः शशंस भञ्जन्नुदरे वलिस्थितिम्॥६८॥
कृतावतारः क्षितिभारशान्तये न पीड्यमानां सहते महीमयम् ।
इतीव सा गर्भभरालसा शनैः पदानि चिक्षेप मृगायतेक्षणा ॥६९॥
सशब्दकाञ्चीमणिबिम्बितैर्बभौ सखीजनैः साद्भुतगर्भधारिणी ।
उपास्यमाना कुलदेवतागणैः समन्ततो यामिकतां गतैरिव ॥७०॥
अलंकृता दुष्प्रसहेन तेजसा रराज सा रत्नमयीषु भूमिषु ।
महागृहाणां प्रतिबिम्बडम्बरैः प्रणम्यमानेव कुलाचलैरपि ॥७१॥
कलत्रमुर्वीतिलकस्य मेखलाकलापमाणिक्यमरीचिभिर्दधे ।
उदेष्यतः सूर्यसमस्य तेजसः समुद्गतं जालमिवाततं पुरः ॥७२॥
क्षपामुखेषु प्रतिबिम्बितः शशी हृदि क्षमावल्लभलोलचक्षुषः ।
बभार गर्भे दधतः सुखस्थितिं नरेन्द्रसूनोरुपधानतामिव ॥७३॥

नृपप्रिया स्थापयितुं पदद्वयीमियेष दिक्कुञ्जरकुम्भभित्तिषु ।
चिराय धाराजलपानलम्पटा कृपाणलेखासु मुमोच लोचने ॥७४॥
मुहुः प्रकोपादुपरि स्थितासु सा चकार तारास्वपि पाटले दृशौ ।
गुरुस्मया कारयितुं दिगङ्गनाः पदाब्जसंवाहनमाशुवाह च ॥७५॥
उदञ्चितभ्रूर्मुखराणि संततं विलोकयामास विभूषणान्यपि ।
अजायत स्तब्धशिरःसु तेजसा गृहप्रदीपेष्वपि मत्सरान्विता ॥७६॥
इति स्फुरच्चारुविचित्रदोहदा निवेदयन्ती सुतमोजसां निधिम् ।
प्रतिक्षणं सा हरिणायतेक्षणा दृशोः सुधावर्तिरभून्महीभुजः ॥७७॥
कृतेषु सर्वेष्वथ शास्त्रवर्त्मना यथाक्रमं पुंसवनादिकर्मसु ।
विशेषचिन्हैर्निजमीशितुः क्षितेर्वधूः समासन्नफलं न्यवेदयत् ॥७८॥
त्रिलोकलक्ष्म्येव सलीलमीक्षितः कृतद्रवैश्चन्द्रकरैरिवाप्लुतः ।
अदूरवाञ्छालतिकाफलोदयः क्वचिन्न माति स्म मुदा नरेश्वरः ॥७९॥
भिषग्भिरापादितसर्वभेषजं वितीर्णरक्षाविधिमण्डलाक्षतम् ।
विशारदाभिः प्रसवोचिते विधौ निरन्तरं गोत्रवधूभिरर्चितम् ॥८०॥
विवेश सुभ्रूरथ सूतिकागृहं प्रधानदैवज्ञनिवेदिते दिने ।
समुल्लसद्भिः शकुनैः सहस्रशः समर्पयन्ती नृपतेर्महोत्सवम् ॥८१॥
ततः प्रदीपेष्वपि तत्र विस्फुरत्प्रभाधरेष्वर्तिवशाज्जपत्स्विव ।
विलासहंसीमपि बालकान्वितां परिच्छदे प्रष्टुमुपायमुत्सुके ॥८२॥
निखातरक्षौषधिगेहदेहलीसमीपसज्जीकृतशस्त्रपाणिषु ।
इतस्ततश्छोटनमक्षतोत्करैर्विधाय हुंकारिषु मन्त्रवादिषु ॥८३॥
गृहोदरस्थे जरतीपरिग्रहे किमप्युपांशु स्वमतोपदेशिनि ।
वितीर्णकर्णासु निवासपञ्जरादनल्पशोकासु शुकाङ्गनास्वपि ॥८४॥
अलभ्यत प्राक्तनचक्रवर्तिना न जन्म यत्राद्भुतधाम्नि केनचित् ।
तथाविधं लग्नमवाप्य नन्दनः शिवप्रसादान्नृपतेरजायत ॥८५॥

चतुर्भिः पताका ।

सुरप्रसूनान्यपतन्सषट्पद-
ध्वनीनि दध्वान सुरेन्द्रदुन्दुभिः ।
परं प्रसादं ककुभः प्रपेदिरे
गुणैकुमारस्य सहोत्थितैरिव ॥८६॥

नवप्रतापाङ्कुरचक्रकान्तया निरन्तरा रात्रिकदीपसंपदा ।
श्रियं जगल्लोचनबालचन्द्रमाः समाजहारोदयसंध्ययेव सः ॥८७॥

आसन्नरत्नगृहभित्तिषु निर्मलासु
लोकोत्तरेण वपुषा प्रतिबिम्बितेन ।
सेवां स्मरिष्यति कृतज्ञतयेति दिग्भि-
रङ्के गृहीत इव राजसुतो रराज ॥८८॥

अकथयदवनीन्दोर्नन्दनोत्पत्तिवार्तां
प्रथममवृन्दानन्दिनान्दीनिनादः ।
तदनु तदनुरूपोत्साहतः सुन्दरीणां
त्वरितगमनलीलागद्गदो वाग्विलासः ॥८९॥

चञ्चच्चारणदीयमानकनकं संनद्धगीतध्वनि
स्फूर्जद्गाथकलुण्ठ्यमानकरटप्रारब्धनृत्तोत्सवम् ।
पूर्णं मङ्गलतूर्यदुन्दुभिरवैरुत्तालवैतालिक-
श्लाघालङ्घितपूर्वपार्थिवमथ क्ष्माभर्तुरासीद्गृहम् ॥९०॥

अथ समुचिते कर्मण्यास्थापरेण पुरोधसा
कथितमवनीनाथः सर्वं विधाय विधानवित् ।
प्रतिमुहुरसौ सूनुस्पर्शान्महोत्सवमन्वभू-
दिह हि भुवने गार्हस्थस्य प्रधानमिदं फलम् ॥९१॥

इति श्रीविक्रमांकचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते द्वितीयः सर्गः ॥२॥

स विक्रमेणाद्भुततेजसा च चेष्टाविशेषानुमितेन बालः ।
श्रीविक्रमादित्य इति क्षितीन्दोरवाप विख्यातगुणः समाख्याम्॥१॥
देवस्य चालुक्यविभूषणस्य भार्या यशोरञ्जितदिङ्मुखेन ।
तेनावदातद्युतिना रराज साम्राज्यलक्ष्मीरिव विक्रमेण ॥२॥
आलम्ब्य हारं करपल्लवेन पयोधरं पातुमसौ प्रवृत्तः ।
भोगेष्ववाञ्छा गुणिनो ममेति स्वभावमात्मीयमिवाभ्यधत्त ॥३॥
मातृस्तनोत्संगविलासहारप्रभा प्रविश्येव विनिःसरन्ती ।
तस्यानिमित्तस्मितचन्द्रिकाभून्नरेन्द्रनेत्रोत्सववैजयन्ती ॥४॥
मुष्टिप्रविष्टारुणरत्नदीपप्रभालता तस्य समुल्लसन्ती ।
विपक्षकण्ठक्षतजानुलिप्ता कृपाणलेखा सहजेव रेजे ॥५॥
त्यक्त्वोपविष्टान्यदसौ कुमारः समुत्थितानां सविधे जगाम ।
आगामि तेनाधिकमुन्नतात्मा नीचेषु वैमुख्यमिवाचचक्षे ॥६॥
धात्रेयिकायाः स्मितपूर्वकं यद्दत्त हुङ्कारमसौ कुमारः ।
अपूरयत्तेन नृपस्य कर्णौ पेयूषगण्डूषपरंपराभिः ॥७॥
यदुत्थितः सोङ्गुलिसंग्रहेण यत्किंचिदव्यक्तमवोचतापि ।
अभीक्ष्णमक्ष्णोः श्रवसोश्च तेन क्षमापतेः संवननं बभूव ॥८॥
क्रमेण संपादितचूलकर्मा चालुक्यभूपालधुरंधरस्य ।
विनोदलीलाकुसुमोच्चयानां स नन्दनो नन्दनतामवाप ॥९॥
उत्संगमारुह्य नरेश्वरस्य स पांसुलीलापरिधूसराङ्गः ।
निजाङ्गतः संगलितैः परागैश्चक्रे मनः कार्मणचूर्णयोगम् ॥१०॥
राज्ञां प्रणामाञ्जलिसंपुटेषु किमप्यवज्ञामुकुलीकृताक्षः ।
तस्यैकहस्ताम्बुरुहप्रणामे कृतार्थमात्मानममंस्त देवः ॥११॥
प्रतिक्षणं कुन्तलपार्थिवस्य वितन्वतस्तन्मुखचुम्बनानि ।
तदीयदन्तच्छदजन्मनेव रागेण चेतः परिपूर्णमासीत् ॥१२॥
मुखेन्दुसंचारकृताभिलाषकुरङ्गमीत्यर्थमिवार्पितेन ।
कण्ठावसक्तेन स राजसूनुरराजत व्याघ्रनखाङ्कुरेण ॥१३॥

क्रीडन्समुत्सारितवारनारीमञ्जीरनादागतराजहंसः ।
एकः क्षितेः पालयिता भविष्यन्स राजहंसासहनत्वमूचे ॥१४॥
स पीडयन्नायसपञ्जरस्थान्क्रीडापरः केसरिणां किशोरान् ।
समाददे भाविरिपुद्विपेन्द्रयुद्धोपयोगीव तदीयशौर्यम् ॥१५॥
प्राप्तोदयः पादनखैश्चकासे स बालचन्द्रः परिवर्धमानः ।
अभ्यर्थ्यमानः सहखेलनाय बालैरपत्यैरिव शीतरश्मेः ॥१६॥
परां प्रतिष्ठां लिपिषु क्रमेण जगाम सर्वासु नरेन्द्रसूनुः ।
पुण्यात्मनामत्र तथाविधानां निमित्तमात्रं गुरवो भवन्ति ॥१७॥
अभ्यासहेतोः क्षिपतः पृषत्कान्नरेन्द्रसूनोः सकलासु दिक्षु ।
प्रहारभीतेव परिभ्रमन्ती पार्थस्य कीर्तिर्विरलीबभूव ॥१८॥
लावण्यलुब्धाभिरलब्धमेव भूपालकन्यामधुपाङ्गनाभिः ।
कवित्ववक्तृत्वफला चुचुम्ब सरस्वती तस्य मुखारविन्दम् ॥१९॥
तं बालचन्द्रं परिपूर्यमाणमालोक्य लावण्यकलाकलापैः ।
कुमुद्वतीनामिव कामिनीनां निशासु निद्रा विमुखीबभूव ॥२०॥
धैर्येण तस्मिन्नवधीर्य याति स्मरोत्सुकानां नगराङ्गनानाम् ।
आबद्धमुग्धभ्रुकुटिच्छटानां पेतुः सकोपं नयनोत्पलानि ॥२१॥
लावण्यलक्ष्मीकुलधाम्नि तत्र विवर्धमाने शनकैः कुमारे ।
कासामजायन्त न कामिनीनां निद्रादरिद्राणि विलोचनानि ॥२२॥
तेजस्विनामुन्नतिमुन्नतात्मा सेहे न बालोपि नरेन्द्रसूनुः ।
देवोपि भास्वाञ्छरणेच्छयेव समाश्रितो विष्णुपदं रराज ॥२३॥
उच्चैः स्थितं तस्य किरीटरत्नं तेजोधनानामुपरि स्थितस्य ।
क्षमामिव प्रार्थयितुं लुलोठ संक्रान्तिभङ्ग्या मणिपादपीठे ॥२४॥
अत्रान्तरे भूज्जयसिंहनामा पुत्रस्तृतीयोपि नराधिपस्य ।
स्वप्नेपि संवादयशोदरिद्रश्चन्द्रार्धचूडस्य न हि प्रसादः ॥२५॥
सर्वासु विद्यासु किमप्यकुण्ठमुत्कण्ठमानं समरोत्सवेभ्यः ।
श्रीविक्रमादित्यमथावलोक्य स चिन्तयामास नृपः कदाचित् ॥२६॥

अलङ्करोत्यद्भुतसाहसाङ्कः सिंहासनं चेदयमेकवीरः ।
एतस्य सिंहीमिव राजलक्ष्मीमङ्कस्थितां कः क्षमतेभियोक्तुम् ॥२७॥
करोमि तावद्युवराजमेनमत्यक्तसाम्राज्यभरस्तनूजम् ।
तदद्वयीसंश्रयणाद्दधातु धुनीव साधारणतां नृपश्रीः ॥२८॥
एवं विनिश्चित्य कृतप्रयत्नमूचे कदाचित्पितरं प्रणम्य ।
सरस्वतीनूपुरसिञ्जितानां सहोदरेण ध्वनिना कुमारः ॥२९॥
आज्ञा शिरश्चुम्बति पार्थिवानां त्यागोपभोगेषु वशे स्थिता श्रीः ।
तव प्रसादात्सुलभं समस्तमास्तामयं मे युवराजभावः ॥३०॥
जगाद देवोथ मदीप्सितस्य किं वत्स धत्से प्रतिकूलभावम् ।
ननु त्वदुत्पत्तिपरिश्रमे मे स चन्द्रचूडाभरणः प्रमाणम् ॥३१॥
धत्से जगद्रक्षणयामिकत्वं न चेत्त्वमङ्गीकृतयौवराज्यः ।
मौर्वीरवापूरितदिङ्मुखस्य क्लान्तिः कथं शाम्यतु मद्भुजस्य ॥३२॥
आकर्ण्य कर्णाटपतेः सखेदमित्थं वचः प्रत्यवदत्कुमारः ।
सरस्वतीलोलदुकूलकान्तां प्रकाशयन्दन्तमयूखलेखाम् ॥३३॥
वाचालतैषा पुरतः कवीनां कान्त्या मदीयं सविधे सुधांशौ ।
त्वत्संनिधौ पाटवनाटनं यत्तथापि भक्त्या किमपि ब्रवीमि ॥३४॥
विचारचातुर्यमपाकरोति तातस्य भूयान्मयि पक्षपातः ।
ज्येष्ठे तनूजे सति सोमदेवे न यौवराज्येस्ति ममाधिकारः ॥३५॥
चालुक्यवंशोपि यदि प्रयाति पात्रत्वमाचारविपर्ययस्य ।
अहो महद्वैशसमाः किमन्यदनङ्कुशोभूत्कलिकुञ्जरोयम् ॥३६॥
लक्ष्म्याः करं ग्राहयितुं तदादौ तातस्य योग्यः स्वयमग्रजो मे ।
कार्यं विपर्यासमलीमसेन न मे नृपश्रीपरिरम्भणेन ॥३७॥
ज्येष्ठं परिम्लानमुखं विधाय भवामि लक्ष्मीप्रणयोन्मुखश्चेत् ।
किमन्यदन्यायपरायणेन मयैव गोत्रे लिखितः कलङ्कः ॥३८॥
तातश्चिरं राज्यमलंकरोतु ज्येष्ठे ममारोहतु यौवराज्यम् ।
सलीलमाक्रान्तदिगन्तरोहं द्वयोः पदातिव्रतमुद्वहामि ॥३९॥

रामस्य पित्रा भरतोऽभिषिक्तः क्रमं समुल्लङ्घ्य यदात्मराज्ये ।
तेनोत्थिता स्त्रीजित इत्यकीर्तिरद्यापि तस्यास्ति दिगन्तरेषु ॥४०॥
तदेष विश्राम्यतु कुन्तलेन्द्र यशोविरोधी मयि पक्षपातः ।
न किं समालोचयति क्षितीन्दुरायासशून्यं मम यौवराज्यम् ॥४१॥
पुत्राद्वचः श्रोत्रपवित्रमेवं श्रुत्वा चमत्कारमगान्नरेन्द्रः ।
इयं हि लक्ष्मीर्धुरि पांसुलानां केषां न चेतः कलुषीकरोति ॥४२॥
सस्नेहमङ्के विनिवेश्य चैनमुवाच रोमाञ्चतरङ्गिताङ्गः ।
क्षिपन्निवात्युज्ज्वलदन्तकान्त्या प्रसादमुक्तावलिमस्य कण्ठे ॥४३॥
भाग्यैः प्रभूतैर्भगवानसौ मे सत्यं भवानीदयितः प्रसन्नः ।
चालुक्यगोत्रस्य विभूषणं यत्पुत्रं प्रसादीकृतवान्भवन्तम् ॥४४॥
एतानि निर्यान्ति वचांसि वक्त्रात्कस्यापरस्य श्रवणामृतानि ।
मधूनि लेह्यानि सुरद्विरेफैर्न पारिजातादपरः प्रसूते ॥४५॥
यस्याः कृते भूमिभृतां कुमाराः केषां न पात्रं नयविप्लवानाम् ।
उन्मत्तमातङ्गसहस्रगुर्वी सा राज्यलक्ष्मीस्तृणवल्लघुस्ते ॥४६॥
लङ्कासमीपाम्बुधिनिर्गतेयं रक्तासवैस्तृप्यति राक्षसीव ।
लक्ष्मीरसौ त्वद्भुजदण्डबद्धा पात्रं भवित्री विनयव्रतस्य ॥४७॥
जानामि मार्गं भवतोपदिष्टं ममापि चालुक्यकुले प्रसूतिः ।
किं त्वत्र लक्ष्मीर्गुणबन्धहीने निसर्गलोला कथमेति दार्ढ्यम् ॥४८॥
किंचिन्न मे दूषणमस्ति पृच्छ दैवज्ञचक्रं यदि कौतुकं ते ।
एतस्य साम्राज्यममन्यमानाः पापग्रहा एव गृहीतपापाः ॥४९॥
साम्राज्यलक्ष्मीदयितं जगाद त्वामेव देवोऽपि मृगाङ्कमौलिः ।
लोकस्तुतां मे बहुपुत्रतां तु पुत्रद्वयेन व्यतनोत्परेण ॥५०॥
तन्मे प्रमाणी कुरु वत्स वाक्यं चालुक्यलक्ष्मीश्चिरमुन्नतास्तु ।
निर्मत्सराः क्षोणिभृतः स्तुवन्तु ममाकलङ्कं गुणपक्षपातम् ॥५१॥
श्रुत्वेति वाक्यं पितुरादरेण जगाद भूयो विहसन्कुमारः ।
मद्भाग्यदोषेण दुराग्रहोऽयं तातस्य मत्कीर्तिकलङ्कहेतुः ॥५२॥

यदि ग्रहास्तस्य न राज्यदूताः कारुण्यशून्यः शशिशेखरो वा ।
तैरेव तातो भविता कृतार्थस्तद्वार्यतां कीर्तिविपर्ययो मे ॥५३॥
अशक्तिरस्यास्ति न दिग्जयेषु यस्यानुजोहं शिरसा धृताज्ञः ।
स्थानस्थ एवाद्भुतकार्यकारी बिभर्तु रक्षामणिना समत्वम् ॥५४॥
इत्यादिभिश्चित्रतरैर्वचोभिः कृत्वा पितुः कौतुकमुत्सवं च ।
अकारयज्ज्येष्ठमुदारशीलः स यौवराज्यप्रतिपत्तिपात्रम् ॥५५॥
स्वयं समाधास्यति चन्द्रमौलिरम्लानकीर्तेरभिवाञ्छितं मे ।
कार्यं विचार्येति सुतोपदिष्टं स सर्वमुर्वीपतिरन्वतिष्ठत् ॥५६॥
ज्येष्ठे कृतेपि प्रतिपत्तिपात्रे तमेव लक्ष्मीरनुमन्यते स्म ।
पूरेण निम्ने निहितापि सिन्धुरपेक्षते सागरमार्गमेव ॥५७॥
देवोपदेशाद्गुणदर्शनाच्च स एव चित्ते नृपतेरुवास ।
यथा स्तुतं रत्नपरीक्षकेण दृष्टप्रभावं च महार्हरत्नम् ॥५८॥
स यौवराज्यश्रियमाश्रितस्य ज्येष्ठस्य राज्ये तु पितुः स्थितस्य ।
कार्यं द्वयोरप्यखिलं बभार भूशेषयोर्भारमिवादिकूर्मः ॥५९॥
आज्ञापयामास स वन्दिताज्ञं तमेव सर्वत्ररणोत्सवेषु ।
पपौ च भूपस्तदुपार्जितानि यशोवतंसानि जयामृतानि ॥६०॥
तत्कुम्भिकुम्भस्थलचीनपिष्टविपाटलो वारिनिधिर्बभासे ।
आपूरितश्चोलवलक्षयोत्थरक्तापगानामिव मण्डलेन ॥६१॥
चालुक्यरामे हरिवाहिनीभिः सहागते तत्र तटीं पयोधिः ।
प्रादुर्भवन्मौक्तिकशुक्तिभङ्ग्या भयेन दन्तानिव निश्चकर्ष ॥६२॥
तस्मिन्प्रविष्टे मलयाद्रिगुञ्जं तद्वाहिनीकुञ्जरकर्णतालैः ।
वियोगिनीनामुपतापनाय चैत्रं विना चन्दनवायुरासीत् ॥६३॥
अदर्शयत्कामपि राजहंसलीलामसौ कुन्तलराजसूनुः ।
निस्त्रिंशधाराजलसंगतं यद्द्विषां यशःक्षीरमिवाचकर्ष ॥ ६४ ॥
तस्मिन्समाकर्षति चापदण्डं वीरप्रकाण्डे विजयोद्यमेषु ।
मुखान्यभूवन्द्रविडाङ्गनानामुष्णोष्णनिःश्वासविधूसराणि ॥६५॥

तस्मिन्विरूढे गिरिनिर्झराम्बु
श्रमातिरेकात्पशुवन्निपीय ।
मातेति चोलः क्षितिमाद्भिर्भर्ता
कृत्वा स्तनास्वादमिवोत्ससर्ज ॥६६॥

स मालवेन्दुं शरणं प्रविष्टमकण्टके स्थापयतिस्म राज्ये ।
कन्याप्रदानच्छलतः क्षितीशाः सर्वस्वदानं बहवोस्य चक्रुः ॥ ६७ ॥

त्रिलोकवीरः कियतो विजिग्ये न दुर्दमानां प्रतिपार्थिवानाम् ।
दोर्विक्रमेणाद्भुतसाहसेन महाहवानाहवमल्लसूनुः ॥ ६८ ॥

उत्कंधरानेव रणाङ्गणेषु यस्यातितुङ्गस्य हठात्प्रहर्तुः ।
न नम्रभावादपरो नृपाणामासीत्कृपाणप्रतिषेधमार्गः ॥ ६९ ॥

व्याजावतीर्णेन जनार्दनेन तेनोदरे हाररुचिच्छटाभिः ।
नाभीसरोजोद्गमवारणाय संचारिता चन्द्रमसः प्रभेव ॥ ७० ॥

न भोजराजः कविरञ्जनाय मुञ्जोथवा कुञ्जरदानदक्षः ।
हस्ताम्बुजे तस्य गुणिप्रियस्य सहर्षमाविष्कृतहेमवर्षे ॥ ७१ ॥

तस्यारिलक्ष्मीपरिरम्भकेलिसमुत्सुकप्राज्यभुजद्वयस्य ।
केयूररत्नाङ्कुरकण्टकानां तैरयं कृपाणाहतिभिर्निरस्तम् ॥७२॥

एकातपत्रोर्जितराज्यलोभाच्छत्रान्तराणामिव वारणाय ।
स भूभृतामुन्नतवंशभाजां दण्डानशेषाञ्छतधा बभञ्ज ॥ ७३ ॥

गायन्तिस्म गृहीतगौडविजयस्तम्बेरमस्यावहे
तस्योन्मूलितकामरूपनृपतिप्राज्यप्रतापश्रियः
भानुस्यन्दनचक्रघोषमुषितप्रत्यूषनिद्रारसाः ।
पूर्वाद्रेः कटकेषु सिद्धवनिताः प्रालेयशुद्धं यशः ॥ ७४ ॥

आसीत्तस्य समुत्सुकः सुरपतिः संग्रामसंदर्शने
सेहे किंतु न गाढपीडितधनुष्टंकारमुच्चैः श्रवाः ।
आरूढः सुरवारणं रणरसक्रुद्धेभगन्धग्रहा-
त्तेनाप्येष पलायनप्रणयिना दूरं समुत्सारितः ॥ ७५ ॥

काञ्ची पदातिभिरमुष्य विलुण्ठिताभू
द्देवालयध्वजपटावलिमात्रशेषा ।
लुण्ठाकलुप्तनिखिलाम्बरडम्बराणां
कौपीनकार्पणपरेव पुराङ्गनानाम् ॥ ७६ ॥
अत्र द्रावितभूमिपालदलनक्रीडारसोत्थे रणे
कोदण्डध्वनिभिर्विधुन्वति घनध्वानानुकारैर्जगत् ।
वैदेहीरमणस्य रावणशिरश्छेदेऽप्यशान्तक्रुधः
प्रत्यावृत्तिरकाण्डकम्पतरलैराशङ्किलङ्काचरैः ॥ ७७ ॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-काश्मीरकभट्टबिल्हणविरचिते तृतीयः सर्गः ॥ ३ ॥

कार्यतो युवराजत्वे राजसूनुरवस्थितः ।
स दिग्विजयमव्याजवीरः स्मर इवाकरोत् ॥ १ ॥
अभज्यन्त गजैस्तस्य लीलया मलयद्रुमाः ।
समं केरलकान्तानां चूर्णकुन्तलवल्लिभिः ॥ २ ॥
मदस्तम्बेरमैस्तस्य मलये निर्द्रुमीकृते ।
मन्ये चन्दनवायूनामभूद्दुर्भिक्षमक्षयम् ॥ ३ ॥
चन्दनस्यन्दडिण्डीरच्छलेन मलयाचलः ।
पिण्डं श्रीखण्डवृक्षाणां परोक्षाणामिवाकरोत् ॥ ४ ॥
सान्द्रचन्दननिस्यन्दपङ्क्लैस्तस्य वारणैः ।
क्षणमौर्वाग्निसंतापः प्रविश्य शमितोम्बुधेः ॥ ५ ॥
और्वाग्नितप्तपाथोधौ चन्दनस्यन्दवासिताः ।
शीतोपचारसाम्राज्यं भेजुर्मलयनिम्नगाः ॥ ६ ॥
सखीव निखिलैस्तस्य सेना सीमन्तिनीजनैः ।
प्रीत्या मलयवायूनां जन्मभूमिरदृश्यत ॥ ७ ॥
मलयेन तदीयस्त्रीसुरभिश्वसितानिलैः ।
गुहाश्चन्दनवायूनां बीजार्थमिव पूरिताः ॥ ८ ॥
गजोन्मूलितनिक्षिप्तचन्दनद्रुमसंपदः ।
स मूल्यमिव रत्नानि जग्राह महतोम्बुधेः ॥ ९ ॥
शिलाभिः करटिक्षुण्णश्रीखण्डस्यन्दपाण्डुभिः ।
मलयस्तद्बलक्षोभादस्थिशेष इवाभवत् ॥ १० ॥
अम्भोधिः श्रीभुजंगस्य निद्राभङ्गविधायिना ।
चमूकलकलेनेव कुपितः क्षोभमाययौ ॥ ११ ॥
क्षुण्णास्तत्करिभिस्तोयद्विपाङ्घ्रिनिगडोपमाः ।
शयानाः कुण्डलीभूय वार्धितीरे महोरगाः ॥ १२ ॥
दधिरे तद्गजाः पादलग्नपाथोधिमौक्तिकाः ।
तुरगानक्षत्रपुञ्जस्य सौन्दर्यं सुरदन्तिनः ॥ १४ ॥

तस्य वाहनमेकैकं गाहमानममन्यत ।
मन्दुरास्मरणायातमुच्चैः श्रवसमम्बुधिः ॥ १४ ॥
तद्दन्तिपदसंघट्टत्रुटन्मौक्तिकशुक्तिकः ।
चक्रेऽम्बुधिर्भयोद्भ्रान्तहृदयस्फुटनभ्रमम् ॥ १५ ॥
अन्विष्यन्मरणोपायं दुःखात्तत्सैन्यलुण्ठितः ।
कालकूटं हरग्रस्तं शुशोच पयसां निधिः ॥ १६ ॥
विद्रुमेषु समुद्रस्य कान्ताबिम्बौष्ठकान्तिषु ।
अराजन्राजपुत्रस्य प्रीतिपात्रीकृता दृशः ॥ १७ ॥
तेन केरलभूपालकीलालकलुषीकृतः ।
अगस्त्यमुनिसंत्रासमत्याज्यत पयोनिधिः ॥ १८ ॥
उदरालोडनाद्भ्रान्तदन्तसंक्रान्तपन्नगैः ।
पाथोधेरन्त्रमालेव तद्दन्तिभिरकृष्यत ॥ १९ ॥
तद्भयात्सिंहलद्वीपभूपतिः शरणागतः ।
विशश्रामाश्रमपदे लोपामुद्रापतेर्मुनेः ॥ २० ॥
धुनानेन धनुश्चित्रं कृतास्तेन मुखेन्दवः ।
गाङ्गकुण्डपुरस्त्रीणां गलत्कुण्डलमण्डलाः ॥ २१ ॥
यशः कूर्चिकया चित्रं दिग्भित्तिषु निविष्टया ।
द्रविडीगण्डफलके तेनावर्त्यत पाण्डिमा ॥ २२ ॥
गलितोत्तुङ्गशृङ्गत्वाद्द्विषां तेन जिगीषुणा ।
अपि लूनशिरस्केव राजधानी व्यधीयत ॥ २३ ॥
तत्प्रतापमबोधन्त वस्त्रैर्विगलदस्रुभिः ।
पुरन्ध्रयो नरेन्द्राणां जलार्द्रासमतां गतैः ॥ २४ ॥
चोलान्तःपुरगेहेषु सिंहानां तस्य बाहुना ।
लोल लाङ्गूलदण्डानां द्वाररक्षा समर्पिता ॥ २५ ॥
चिन्तया दुर्बलं देहं द्रविडो यत्पलायितः ।
संकटाद्रिदरीद्वारप्रवेशे बह्वमन्यत ॥ २६ ॥

दृश्यन्तेऽद्यापि तद्भीतिविद्रुतानां द्रुमालिषु ।
अलिकाश्चोलकान्तानां कर्पूरतिलकाङ्किताः ॥२७॥
सणाद्विगलितानर्घ्यपदार्थो द्रविडक्षितेः ।
प्राकारसूत्रशेषाभूत्काञ्ची तद्बाहुकम्पिता ॥२८॥
तेनानास्पदमात्मीयप्रतापोत्कर्षरागिणा ।
चक्रेऽनङ्गप्रतापस्य चेङ्गिभूपाङ्गनाजनः ॥२९॥
आक्रान्तरिपुचक्रेण चक्रकोटपतेः परम् ।
लिखितास्चित्रशालासु तेनामुच्यन्त दन्तिनः ॥ ३० ॥
कृतकार्यः परावृत्य कियत्यप्यध्वनि स्थितः ।
अथ गम्यत्वमरतेरकस्मादेव सोऽगमत् ॥ ३१ ॥
स शङ्कातङ्कमासाद्य स्फुरणाद्वामचक्षुषः ।
श्रेयोऽस्तु त.त्पादानामिति साश्रुमवोचत ॥ ३२ ॥
अदृश्यैः कैश्चिदागत्य चिन्तया शून्यचेतसः ।
तस्यामङ्गलवार्तेव कापि कर्णे न्यधीयत ॥ ३३ ॥
शुभाशुभानि वस्तूनि संमुखानि शरीरिणाम् ।
प्रतिबिम्बमिवायान्ति पूर्वमेवान्तरात्मनि ॥ ३४ ॥
अवगाहितनिःशेषशास्त्रनिर्मलधीरपि ।
अकारणमसौ प्राप्तः कुमारो यदधीरताम् ॥ ३५ ॥
सर्वस्वदानमालोक्य दुर्निमित्तप्रशान्तये ।
अप्रयाणमसौ चक्रे ततः कृष्णनदीतटे ॥ ३६ ॥
स तत्क्षणात्परिम्लानमुखं संमुखपातिनम् ।
ददर्श राजधानीतः प्रधानं दूतमागतम् ॥३७ ॥
अप्रियावेदने जिह्वामवगम्य पराङ्मुखीम् ।
कथयन्तमिवानर्थं श्वासैरस्पष्टमायतैः ॥ ३८ ॥
निर्यद्भिरतिमात्रोष्णैर्मुहुः निःश्वासवायुभिः ।
निवेदयन्तं दुर्वार्तावज्रानलमुपस्थितम् ॥ ३९ ॥

ककुभां भर्तृभक्तानां पृच्छतीनां नृपस्थितिम् ।
विद्रवन्तमिवाभान्तमत्यन्तत्वरितैः पदैः ॥ ४० ॥
अनर्थवार्त्तावहनमहापातकदूषितम् ।
गणयित्वेव धैर्येण सर्वथापि निराकुलम् ॥ ४१ ॥
कृतप्रणाममासन्नमथ तं राजनन्दनः ।
कुशलं तातपादानामिति पप्रच्छ वत्सलः ॥४२॥
उपविश्य शनैः पार्श्वे स निरुत्साहया गिरा ।
कथयामास नासाग्रविलुठद्बाष्पशीकरः ॥४३॥
विधेहि दृढमात्मानं मावधीरय धीरताम् ।
कुमार व्यापिपर्त्येष दुर्वार्त्ताप्रलयाम्बुदः ॥४४॥
आपाण्डुपाण्ड्यमालोलचोलमाक्रान्तसिंहलम् ।
देवस्त्वद्दिग्जयं श्रुत्वा भेजे सुखमयीं स्थितिम् ॥४५॥
अकाण्डे विधिचाण्डालस्तस्मै दाहज्वरं ददौ ।
न कैश्चिदपि लभ्यन्ते निष्कम्पाः सुखसंपदः ॥४६॥
अपरिश्रान्तसन्तापश्चन्दनालेपनेन सः ।
त्वदङ्कपालीपेयूषमाचकाङ्क्ष पुनः पुनः ॥४७॥
क्रमादर्धप्रबुद्धानि शिशिरे वीक्षितानि सः ।
वासवस्येव दूतेषु कुर्वन्गजनिमीलिकाम् ॥४८॥
अन्तर्दाहमवालोक्य प्रियां कीर्तिं विनिर्गताम् ।
दर्शयन्दशनज्योत्स्नामथोवाच स मन्त्रिणः ॥४९॥
क्षिप्ता मुकुटमाणिक्यपट्टिकासु महीभुजाम् ।
टङ्केनेव प्रतापेन निजाज्ञाक्षरमालिका ॥५०॥
दिग्भित्तयः शरश्रेणीकृतच्छिद्रपरंपराः ।
स्वयशोराजहंसस्य प्रापिताः पञ्जरश्रियम् ॥५१॥
अदरिद्रीकृता भूमिर्विमुद्राभिर्विभूतिभिः ।
नीताः कुलवधूसाम्यं साधूनां वेश्मसु श्रियः ॥५२॥

प्राप्तः कोदण्डपाण्डित्यजातलक्ष्मीसमागमः ।
काकुत्स्थनिबिडस्थामा सूनुर्विक्रमलाञ्छनः ॥५३॥
तेनैव युवराजत्वं समारोप्य यशस्विना ।
एष साम्राज्यभारस्य वोढा सोमेश्वरः कृतः ॥५४॥
इति मे कृतकृत्यस्य माहेश्वरशिरोमणेः ।
गिरिजानाथनगरे समारोहणमुत्सवः ॥५५॥
आत्मानमुन्मदद्वाःस्थगलहस्तितसेवकाः ।
अगम्यमपि दैवस्य विदन्ति हतपार्थिवाः ॥५६॥
मम शुद्धे कुले जन्म चालुक्यवसुधामृताम् ।
कियत्योपि गताः श्रोत्रमैत्रीं शास्त्रार्थविप्रुषः ॥५७॥
जानामि करिकर्णान्तचञ्चलं हतजीवितम् ।
मम नान्यत्र विश्वासः पार्वतीजीवितेश्वरात् ॥५८॥
उत्सङ्गे तुङ्गभद्रायास्तदेष शिवचिन्तया ।
वाञ्छाम्यहं निराकर्तुं देहग्रहविडम्बनाम् ॥५९॥
यातोयमुपकाराय कायः श्रीकण्ठसेवया ।
कृतघ्नव्रतमेतस्य यत्र तत्र विसर्जनम् ॥६०॥
तथेति वचनं राज्ञः प्रत्यपद्यन्त मन्त्रिणः ।
उचिताचरणे केषां नोत्साहचतुरं मनः ॥६१॥
ततः कतिपयैरेव प्रयाणैः प्रणयिप्रियः ।
तां क्षोणीपतिरद्राक्षीद्दक्षिणापथजाह्नवीम् ॥६२॥
तुङ्गभद्रा नरेन्द्रेण तेनामन्यत मानिना ।
तरङ्गहस्तैरुत्क्षिप्य क्षिपन्तीवेन्द्रमन्दिरे ॥६३॥
उद्दण्डा तेन डिण्डीरे पिण्डपंक्तिरदृश्यत ।
विमानहंसमालेव प्रहिता पद्मसद्मना ॥६४॥
अतिदूरं समुत्प्लुत्य निपतद्भिः स शीकरैः ।
अराजत धराचन्द्रः प्रत्युद्गत इव ग्रहैः ॥६५॥

तत्रावतीर्य धौरेयो धीराणां धरणीपतिः ।
स्नात्वा चण्डीशचरणद्वन्द्वचिन्तापरोभवत् ॥६६॥
अदत्त चापरिच्छिन्नमखिन्नः काञ्चनोत्करम् ।
न कृच्छ्रेपि महाभागास्त्यागव्रतपराङ्मुखाः ॥६७॥
प्रविश्य कण्ठदघ्नेथ सरित्तोये जगाम सः ।
कल्लोलतूर्यनिर्घोषैश्चन्द्रचूडामणेः पुरीम् ॥६८॥
इत्युक्त्वा विरते तत्र कृतनेत्राम्बुदुर्दिनः ।
हृतासिधेनुः पार्श्वस्थैः साक्रन्दगलकन्दलः॥६९॥
स्वभावादार्द्रभावेन पितृस्नेहाच्च तादृशः
तथा रुरोद वपुषा भूपृष्ठलुठितेन सः ॥७०॥
एवंविधदुराचारगृहीतनियमं यमम् ।
मन्यतेस्म यथा वंशे तिग्मांशुरपि कण्टकम् ॥७१॥
एतद्दुःखानभिज्ञेभ्यो दिनेभ्यः स्पृहयन्मुहुः ।
दिवसोपि यथात्मानं मन्दभाग्यममन्यत ॥७२॥
अथ कालकलाः स्थित्वा कियतीरप्यसौ तथा ।
अचिन्तयदविश्रान्तवाष्पसंतानदुर्दिनः ॥७३॥
तवादिकूर्म कर्माणि निषेधन्ति सुखस्थितिम् ।
प्रयाहि शेष निष्पेषादस्थिपञ्जरशेषताम् ॥७४॥
दिग्गजास्त्यजत स्वैरक्रीडाविहरणादरम् ।
संभूय भूयः सर्वेपि धारयन्तु धरामिमाम् ॥७५॥
बाहुराहवमल्लस्य सुवर्णस्तम्भविभ्रमः ।
पुरंदरधुरां धर्तुं धात्रा व्यवहितः कृतः ॥७६॥
निजासु राजधानीषु स्थितिं दधतु पार्थिवाः ।
तादृशः पुनरुत्साहो वीरसिंहासने कुतः ॥७७॥
तद्बाहुदण्डविश्लेषे किं पौरुष करिष्यसि ।
प्रतिपालकवैधुर्यात्प्रताप परितप्यसे ॥७८॥

पद्मे पद्माकरानेव पुनः सद्मत्वमानय ।
अयं त्वया पतिभ्रंशसंतापोन्यत्र दुःसहः ॥७९॥
श्लाघ्यःशेषफणाचक्रविटङ्कात्पतनं भुवः ।
अथवा स्नेहपाण्डित्यं मृत्पिण्डस्येदृशं कुतः ॥८०॥
अपूर्वः कोपि दुर्मेधाः शङ्के वेधाः समुत्थितः ।
पुराणक्लेशनिष्पन्नां स्वकृतिं नाशयेत्कथम् ॥८१॥
अहो शौर्यमहो धैर्यं चित्रं गाम्भीर्यविभ्रमाः ।
यत्सत्यं क्वचिदेकत्र गुणास्ते दुर्लभाः पुनः ॥८२॥
कुण्ठीकृतारिशस्त्रस्य तस्य वज्रोपमाकृतेः ।
भाग्यानामेव मे दोषादेष जातः परिक्षयः ॥८३॥

पाठान्तरम्

मद्भाग्यदोषादेवैष जाने जातः परिक्षयः ।
विधास्यति कथं धाता सर्गरत्नं तथाविधम् ।
कथं वा संघटिष्यन्ते तादृशाः परमाणवः ॥८४॥
प्रधावत्संमुखानेकवाहिनीगाहनक्षमः ।
अम्भोधिरिव दुष्प्रापः सत्त्वराशिस्तथाविधः ॥८५॥
आर्येण सौकुमार्यैकभाजनेन हहा कथम् ।
अयं विषादवज्राग्निरसह्यत मया विना ॥८६॥
साक्रन्दमिति चान्यच्च स संचिन्त्य पुनः पुनः ।
शनैर्विवेकदीपेन पन्थानं प्रत्यपद्यत ॥८७॥
यथाविधि विधायाथ संस्थितस्य पितुः क्रियाम् ।
अग्रजालोकनोत्कण्ठाप्रेषितः सोचलत्पुरः ॥ ८८ ॥
कियद्भिरपि सोध्वानमुल्लङ्घ्य दिवसैस्ततः ।
निःशब्दसैन्यसङ्घातसहितः प्राविशत्पुरीम् ॥ ८९ ॥
सरोजिनीव हंसेन नयेनेव नरेन्द्रता ।
कविना सुखगोष्ठीव चन्द्रेणेव विभावरी ॥ ९० ॥

लक्ष्मीरिव प्रदानेन कवित्वेनेव वाग्मिता ।
मेने तेनापवित्रेव पित्रा विरहिता पुरी ॥ ९१ ॥ युगलकम्

अग्रे समागतेनाथ मानितः सोग्रजन्मना ।
सह तेनैव सक्लेशं विवेश नृपमन्दिरम् ॥ ९२ ॥

अन्योन्यकण्ठाश्लेषेण पीडितस्येव निर्ययुः ।
वाष्पाम्भसस्तयोर्धाराश्चिरं तत्रातिमांसलाः ॥ ९३ ॥

क्रमात्ताभ्यामदुःखाभ्यामन्योन्यस्नेहवृत्तिभिः ।
केपि कैतववाह्याभिरत्यवाह्यन्त वासराः ॥ ९४ ॥

ज्येष्ठं गुणैर्गरिष्ठोपि पितुस्तुल्यममंस्त सः ।
महात्मनाममार्गेण न भवन्ति प्रवृत्तयः ॥ ९५ ॥

स दिग्वलयमालोक्य वस्तुजातमुपार्जितम् ।
तस्मै समर्पयामास नास्ति लोभो यशस्विनाम् ॥ ९६ ॥

जातः पापरतः कैश्चिद्दिनैः सोमेश्वरस्ततः ।
एषा भगवती केन भज्यते भवितव्यता ॥ ९७ ॥

मदिरेव नरेन्द्रश्रीस्तस्याभून्मदकारणम् ।
न विवेद परिभ्रष्टं यदशेषं यशोंशुकम् ॥ ९८ ॥

बाधिर्यमिव मङ्गल्यतूर्यध्वनिभिरागतः ।
ईषदप्येष नाश्रौषीद्वचनानि महात्मनाम् ॥ ९९ ॥

कुर्वन्नङ्गेषु वैक्लव्यमाविष्कृतमदज्वरः ।
स निनाय श्रियं राजा राजयक्ष्मेव संक्षयम् ॥ १०० ॥

अपास्तकुन्तलोल्लासा वैराग्यं दधती धरा ।
जीवत्येव धवे तस्मिन् विधवेव व्यराजत ॥ १०१ ॥

चक्रुस्तस्वेरमाः पृष्ठे तदारोहणदूषिते ।
अभ्युक्षणमिवोदस्तहस्तशीकरवारिभिः ॥ १०२ ॥

पालैर्दिव्यमिवागृह्णन्मण्डलभ्रमणोद्यताः ।
अयोग्यतां साधयितुं तस्य तेनातुरंगमाः ॥ १०३ ॥

स जातु जातुषीं मेने मन्ये नरपतिश्रियम् ।
एतद्गलनभीत्येव क्षात्रं तेजो यदत्यजत् ॥ १०४ ॥
जातास्वादः स्वयं लक्ष्म्याः पिशाच्या इव चुम्बनात् ।
रुधिरं कण्ठरन्ध्रेभ्यः सर्वेषामाचकाङ्क्ष सः ॥ १०५ ॥
उद्धूतचामरोद्दामसमीरासङ्गिनेव सः ।
रजसा पूर्यमाणोभून्मार्गं द्रष्टुमनीश्वरः ॥ १०६॥
तेजोनिधीनां रत्नानां संभारं धारयन्नपि ।
बभूव दैवोपहतस्तमःस्तोमैस्तिरोहितः ॥ १०७ ॥
उपरि प्रतिबन्धेन ध्यात्वेव नमतोखिलान् ।
अधोगमनमेवासौ विह्वलो बहुमन्यत ॥ १०८ ॥
पिशाच इव सर्वेषां छलान्वेषणतत्परः ।
नासौ किमपि कर्तव्यं विवेद मदमूर्च्छया ॥ १०९ ॥
व्यरज्यत समस्तोपि लोभैकवसतेर्जनः ।
त्यागो हि नाम भूपानां विश्वसंवननौषधम् ॥ ११० ॥
अकार्येपि कुमारस्य तात्पर्यमतनोदसौ ।
किं लक्ष्मीसुखमुग्धानामसंभाव्यं दुरात्मनाम् ॥ १११ ॥
भ्रमयन्नङ्कुशं दर्पाद्द्विपेन्द्रमधिरुह्य सः ।
अख्यातिबीजवापाय चखानेव नभःस्थलीम् ॥ ११२ ॥
बहुना किं प्रलापेन तथा राज्यं चकार सः ।
यथेन्दुमित्रे चालुक्यगोत्रे प्राप कलङ्कताम् ॥ ११३ ॥
न शशाक निराकर्तुमग्रजस्य दुराग्रहम् ।
राज्यग्रहगृहीतानां को मन्त्रः किं च भेषजम् ॥ ११४ ॥
अचिन्तयच्च किं कार्यं विपर्यस्तधियामुना ।
अकीर्तिसंविभागस्य गमिष्याम्यत्र पात्रताम् ॥ ११५ ॥
त्यागमेव प्रशंसन्ति गुरोरुत्पथगामिनः ।
तदितः साधयाम्येष दक्षिणाम्बुधिसंमुखः ॥ ११६ ॥

मया निपीड्यमानास्ते निविडं द्रविडादयः ।
आर्यं विपर्यस्तमपि प्रभवन्ति न बाधितुम् ॥ ११७ ॥
इति स मनसा निश्चित्यार्थं चुलुक्यशिखामणिः
श्रवणसरणिं भिन्दन्भेरीरवेण विनिर्ययौ ।
अपि च कुपितः क्ष्माभृत्सेनागजेषु निजेषुभिः
कतिषु विदधे धैर्यध्वंसं न साहसलाञ्छनः ॥ ११८ ॥
प्रत्यक्ता मधुनेव काननमही मौर्वीव चापोज्झिता
शुक्तिर्मौक्तिकवर्जितेव कविता माधुर्यहीनेव च ।
तेनैकेन निराकृता न शुशुभे चालुक्यराज्यस्थितिः
सामर्थ्यं शुभजन्मनां कथयितुं कस्यास्ति वाग्विस्तरः ॥११९॥

इति श्रीविक्रमांकदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति–
काश्मीरकभट्टबिल्हणविरचिते चतुर्थः सर्गः ॥ ४ ॥

नैष दुर्मतिरिमं सहिष्यते राज्यकण्टकविशोधनोद्यतः ।
अग्रजादिति विशङ्क्य संकटं सिंहदेवमनुजं निनाय सः ॥ १ ॥
गुप्तभूषणरवेव सर्वतस्तूर्यमङ्गलनिनादशान्तितः ।
श्रीरलक्ष्यत विलक्षचेतसा तस्य पृष्ठचलितेव भूभुजा ॥ २ ॥
अङ्कवर्तिनमशङ्कमाः कथं हन्तुमेनमुपरुद्धवानिति ।
तल्पनिर्लुठनशीर्णचन्दनः पर्यतप्यत विभावरीषु सः ॥ ३ ॥
तस्य मग्नमवनीपतेर्मनस्त्रासपङ्कपटले पटीयसि ।
भूरिसंख्यभरकर्षणक्षमैरप्यकृष्यत न मत्तदन्तिभिः ॥ ४ ॥
स व्यसर्जयदथ क्रथन्मनाः पुष्कलं बलममुष्य पृष्ठतः ।
किं न संभवति चर्मचक्षुषां कर्म लुब्धमनसामसात्त्विकम् ॥५॥
प्राप्तमप्यनयपङ्कशङ्कितस्तद्बलं न सहसा जघान सः ।
अप्रतर्क्यभुजवीर्यशालिनः संकटेप्यगहनास्तथाविधाः ॥ ६ ॥
अन्तकः प्रतिभटक्षमाभृतां निर्दयप्रहरणोद्यतं ततः ।
तन्मदद्विरदपादचूर्णितं सैन्यमेककवलं चकार सः ॥ ७ ॥
किं बहुप्रलपितैः पुनः पुनः प्रत्यनीकपृतनाः समागताः ।
कालवक्त्रकुहरे निवेश्य स स्वाङ्गशेषमकरोन्महीपतिम् ॥ ८ ॥
राजहंसमिव बाहुपञ्जरे श्रीविलासभुवि लालयन्यशः ।
तत्र तामरसपत्रलोचनश्चित्रमभ्युदयमाससाद सः ॥ ९ ॥
मन्युपङ्ककलुषं समुद्वहन्भ्रातृदुश्चरितचिन्तनान्मनः ।
सुप्रसन्नपयसा प्रसन्नतां द्रागनीयत स तुङ्गभद्रया ॥ १० ॥
तत्करीन्द्रनिवहावगाहनैर्वाहिनी पतिपथेन सागमत् ।
दन्तिदानजलनिम्नगाः पुनर्लेभिरे प्रणयमापगापतेः ॥११॥
वारणः प्रतिगजं विलोकयंस्तद्विमर्दरसमांसलस्पृहः ।
आददे न विशदं नदीजलं शीलमीदृशममर्षशालिनाम् ॥ १२ ॥
षट्पदध्वनिभिराकुलीकृतः पातुमैच्छदुदकं न कुञ्जरः ।
तान्प्रविश्य पयसि न्यपीडयद्दूषणं हि मुखरत्वमर्थिनाम् ॥१३॥

अत्यजत्प्रतिगजं मतङ्गजः पार्श्वसंगतकरेणुलोभतः ।
यत्र तत्र भुजदण्डचण्डिमा चित्रमप्रतिहतो मनोभुवः ॥१४॥
रुद्धवर्त्मसु गजेषु वाजिनः प्रापुरम्भसि निमज्जनं चिरात् ।
लब्धतीरतरुकण्टकैः पुनर्नेक्षितापि तटिनी क्रमेलकैः ॥१५॥
अस्मरद्द्विरददानवारिणा तेन वारिनिधिराविलीकृतः ।
हन्त संततमदस्य विभ्रमानभ्रमुप्रियतमस्य दन्तिनः ॥१६॥
स्नानसक्तपरिवारसुन्दरीवृन्दमध्यमवधीरिताङ्कुशः ।
यज्जगाम मदलङ्घितः करी भाग्यसंपदुपरि स्थितस्य सा ॥१७॥
तां विधाय कतिचिद्दिनानि स प्रेयसीघुसृणपङ्किलां नदीम् ।
चोलसंमुखमगाहताहवप्राप्तिदुर्ललितबाहुराग्रहम् ॥१८॥
केलिकाननशकुन्तकूजितश्लाघ्यमानगलकन्दलस्वनाः ।
प्राप्नुवन्ति न विदग्धतागुणं यत्र दर्शयितुमेणलोचनाः ॥१९॥
यत्र तिष्ठति विरोधमुद्वहन्दाहतः प्रभृति तेजसा सह ।
मेचकक्रमुककाननावलीमीलितोष्णकिरणार्चिषि स्मरः ॥२०॥
यत्र मारुतविधूतकेतकव्रातधूलिधवलासु भूमिषु ।
कामिनीशरणमाश्रिते स्मरे भर्गवह्निरिव भस्मसाद्भूत् ॥२१॥
नारिकेलफलखण्डताण्डवत्तुण्णतत्कुहरवारिवीचयः ।
यत्र यान्ति मरुतः स्मरास्त्रतां धूतपक्वकदलीसमृद्धयः ॥२२॥
अध्युवास वनवासमण्डलं तद्दिनानि कतिचिन्नृपात्मजः ।
योषितामुपवनस्थलीभुवः कर्तुमद्भुतविलाससाक्षिणीः ॥२३॥
उच्चचाल पुरतः शनैरसौ लीलया मलयदेशभूभुजाम् ।
पूर्वदर्शितपराक्रमस्मृतिं सैन्यतूर्यनिनदैः प्रबोधयन् ॥२४॥
एनमेत्य जयकेशिपार्थिवः प्रार्थितादधिकमर्पयन्धनम् ।
निश्चलामकृत हासचन्द्रिकां कौङ्कणप्रणयिनीमुखेन्दुषु ॥२५॥

१ ह. B. G. S.

आलुपेन्द्रमवदातविक्रमस्त्यक्तचापलमसाववर्धयत् ।
दीपयत्यविनयाग्रदूतिका कोपमप्रणतिरेव तादृशाम् ॥२६॥
व्यापृतैरविरतं शिलीमुखैः केरलक्षितिपवामचक्षुषाम् ।
पूर्वकल्पितमसावदर्शयद्गण्डपालिषु निवासमश्रुणः ॥२७॥
तं विभाव्य रभसादुपागतं क्ष्माभुजंगमुपजातसाध्वसा ।
लोलवारिनिधिनीलकुण्डला द्राविडक्षितिपभूरकम्पत ॥२८॥
तस्य सज्जधनुषः प्रतिक्रियाशून्यपौरुषविशेषशालिनः ।
द्राविडेन्द्रपुरुषस्ततः सभामाजगाम नयमार्गकोविदः ॥२९॥
मौलिचुम्बितवसुंधरातलः कुन्तलेन्द्रतनयं प्रणम्य सः ।
व्याजहार दशनांशुपल्लवन्यस्तकोमलपदां सरस्वतीम् ॥३०॥
कश्चुलुक्यनृपवंशमंडन त्वद्गुणान्गणयितुं प्रगल्भते ।
धाम पङ्करुहिणीविलासिनः कस्य संकलयितुं विदग्धता ॥३१॥
वर्णयामि विमलत्वमम्भसः किं त्वदीयकरवालवर्तिनः ।
एति यत्प्रभवमैन्दवीं द्युतिं विश्वशुक्तिपुटमौक्तिकं यशः ॥३२॥
खड्गवारि भवतः किमुच्यते लोलशैवलमिवारिकुन्तलैः ।
तत्र राजति निवेशितं त्वया राजहंसनिवहोपमं यशः ॥३३॥
त्वद्भुजप्रणयिचापनिस्वनः कैरसौ समरसीम्नि सह्यते ।
व्यक्तिमेति रिपुमन्दिरेषु यः क्रन्दितध्वनिभिरेणचक्षुषाम् ॥३४॥
निर्मदत्वमुपयान्ति हन्त ते ज्यारवैः करटिनो दिशामपि ।
कश्मलैः परिहृता इवालिभिर्यद्भजन्ति ककुभः प्रसन्नताम् ॥३५॥
त्वादृशेन विजिगीषुणा विना क्षत्रमक्षममसाध्यसाधने ।
प्लावनाय जगतः प्रगल्भते नो युगान्तसमयं विनाम्बुधिः ॥३६॥
अग्रजे तृणवदर्पितं निजं राज्यमूर्जितगुणेन यत्त्वया ।
वज्रलेपघटितेव तेन ते निश्चला जगति कीर्तिचन्द्रिका ॥३७॥
किं करोषि निजयाथवा भुवा त्वं समस्तवसुधातलेश्वरः ।
केसरी वसति यत्र भूधरे तत्र याति मृगराजतामसौ ॥३८॥

यानि पुण्यफलपात्रतामसौ यां भुवं निवससे महाभट ।
सा कुपार्थिवकदर्थनोज्झिता त्वां पतिं हि लभते गुणोज्ज्वलम् ॥३९॥
त्वद्भिया गिरिगुहाश्रये स्थिताः साहसाङ्क गलितत्रपा नृपाः ।
ज्यारवप्रतिरवेण तानपि त्वद्धनुः समरसीम्नि बाधते ॥४०॥
उत्प्रतापदहनं मुखं वहन्नाहवे त्वदसिरैन्द्रजालिकः ।
दिव्यमस्तकसमागमं द्विषां लूनमर्त्यशिरसां करोति यत् ॥४१॥
भाग्यभूमिमपि भारतादिषु त्वादृशं न शृणुमः प्रतापिनम् ।
दर्शनेन विजयश्रियं रणेष्वन्यसङ्गविमुखीं करोति यः ॥४२॥
किं किरीटमणयः क्षमाभुजां लोहकर्षकदृषत्सहोदराः ।
आनयन्ति यदुपान्तवर्त्मनि त्वत्कृपाणमतिदूरवर्तिनम् ॥४३॥
चोलभूमिपतिरुज्ज्वलैर्गुणैः किं न वक्ति भवतानुरञ्जितः ।
पश्यतस्तृणसमां तव श्रियं श्रीप्रदानकथनेन लज्जते ॥४४॥
अन्यपौरुषगुणेष्वपि श्रुतिं प्राप्तवत्सु घनगर्जितेष्विव ।
राजहंसवनितेव मानसान्नास्य निःसरति तावकी स्तुतिः ॥४५॥
कन्यकां कुलविभूषणं गुणैरद्भुतैस्त्रिभुवनातिशायिनीम् ।
त्वत्करप्रणयिनीं विधाय स प्राप्तुमिच्छति समस्तवन्द्यताम् ॥४६॥
तेन तस्य वचनेन चारुणा प्राप कुन्तलपतिः प्रसन्नताम् ।
तीव्ररोषविषवेगशान्तये भेषजं विनय एव तादृशाम् ॥४७॥
कीदृशी शशिमुखी भवेदिति स्पृश्यतेस्म हृदये स चिन्तया ।
कामुकेषु मिषमात्रमीक्षते नित्यकुण्डलितकार्मुकः स्मरः ॥४८॥
अब्रवीच्च मनसः प्रसन्नतां दन्तकान्तिभिरुदीरयन्निव ।
ओष्ठपृष्ठलुठितस्मिताङ्कुलः कुन्तलीनयनपूर्णचन्द्रमाः ॥४९॥
ईदृशीं सुजनतामजानता कार्मुकेण मुखरत्वमत्र मे ।
यत्कृतं किमपि तेन लज्जया भारती कथमपि प्रवर्तते ॥५०॥
दोषजातमवधीर्य मानसे धारयन्ति गुणमेव सज्जनाः ।
क्षारभावमपनीय गृह्णते वारिधेः सलिलमेव वारिदाः ॥५१॥

दिग्जयव्यसनिना पुनःपुनस्तस्य किं प्रियमनुष्ठितं मया ।
रज्यते मयि दृढं तथाप्यसौ वेत्ति कश्चरितमुन्नतात्मनाम् ॥५२॥
तस्य भूरिगुणरत्नशालिनः स्नेहपूतहृदयस्य वाञ्छितम् ।
पारयामि न विधातुमन्यथा यत्स्थितं मनसि तद्विधीयताम् ॥५३॥
दर्शयन्तममृतद्रवोपमां वाचमिन्दुकरनिर्मलामिति ।
विक्रमाङ्कमपयातसाध्वसः साधुरेनमथ स व्यजिज्ञपत् ॥५४॥
किं तवान्यदुचितं वदान्यता यत्समादिशति तत्त्वयाकृतम् ।
प्रार्थितार्थपरिपन्थितामगात्कश्चुलुक्यकुलपार्थिवोर्थिनाम् ॥५५॥
वेत्सि मे पतिमवञ्चकं यदि स्वच्छतां स्पृशति चात्र ते मनः ।
तन्निवृत्य कुरु तुङ्गभद्रया मुद्रिते पदमुपान्तवर्त्मनि ॥५६॥
कैश्चिदेव सततप्रयाणकैस्तत्र शुद्धहृदयः करिष्यति ।
स त्वया परिचयं प्रतापिना पर्वणीन्दुरिव तिग्मरश्मिना ॥५७॥
गाहतेत्र धृतकार्मुके त्वयि प्रीतिदानमपि भीतिदानताम् ।
तेन तस्य महती विलक्षता यत्र वेत्सि गुणपक्षपातिताम् ॥५८॥
नाद्य यावदवलोकिता जनैः क्वापि तस्य वचसामसत्यता ।
मादृशां शुभविपर्ययाद्यदि व्यक्तिमेष्यति भवादृशेषु सा ॥५९॥
एवमादिभिरनेन बोधितः कोविदेन वचनैः पुनः पुनः ।
ज्ञातचोलहृदयः स्वयं च स प्राङ्निवेदितमगान्नदीतटम् ॥६०॥
चोलभूमिपतिरप्यनन्तरं निर्जगाम नगरात्कृतोत्सवः ।
पुष्पसायकपताकया तया कन्यया सह सहासवक्त्रया ॥६१॥
सन्धिबन्धमवलोक्य निश्चलं तस्य कुन्तलनरेन्द्रसूनुना ।
शान्तसाध्वसमहारुजः प्रजाः स्वेषु धामसु बबन्धुरादरम् ॥६२॥
दिग्गजश्रवणभङ्गकारिभिर्दुन्दुभिध्वनिभिरस्य भैरवैः ।
अभ्रमभ्रमुभुजङ्गडिण्डिमध्वाननिर्भरमिव व्यराजत ॥६३॥
सर्वतः श्रवणभैरवस्फुरद्दुन्दुभिप्रतिरवापदेशतः ।
सस्वनं द्विरदवृन्दचक्रवत्स्फुरन्निव दिक्तलविग्रहः ॥६४॥

कर्णतालपवनोर्मिशीतलैः सिञ्चतिस्म करशीकराम्बुभिः ।
दिग्गजानिव भयेन मूर्छितांस्तस्य वारणपरंपरा पुरः ॥६५॥
तत्र भूरजसि दूरमुद्गते यन्न दिग्भ्रममधत्त भास्करः ।
हेतुरत्र रजसां निवारणं कुञ्जरध्वजपटान्तवीजनैः ॥६६॥
क्षोणिरेणुमिषतः सदाध्वगः स्यन्दने रचयतिस्म भास्करः ।
पश्चिमाद्रिविषमस्थलीभुवां पूरणार्थमिव संग्रहं मृदः ॥६७॥
नन्दनद्रुमनिकुञ्जपुञ्जितैः पांसुभिः कुसुमधूलिवासितैः ।
चौर्यकेलिशयनोपयोगतस्तुष्यतिस्म सुरपांशुलाजनः ॥६८॥
वीक्ष्य पुष्पमधु पांसुदूषितं नन्दनं ध्रुवममुच्यतालिभिः ।
अन्धकारपटलच्छलेन यद्भृङ्गपूरितमिवाभवन्नभः ॥६९॥
जैत्रवाजिपृतनाखुरक्षतक्षोणिधूलिपटलीभिरध्वसु ।
तद्बलस्य सुभगत्वमागमत्पूरितानि विषमस्थलान्यपि ॥७०॥
चेतसोपि दधतीरलङ्घ्यतां लङ्घयद्भिरवटस्थलीभुवः ।
तस्य वाजिभिरजायत क्षितिभ्रान्तवातहरिणेव सर्वतः ॥७१॥
तेन सैन्यधनुषां शिलीमुखज्यालताप्रणयिनां विभूतिभिः ।
तत्र तत्र विजयश्रियः कृते केलिकाननमिव व्यधीयत ॥७२॥
अप्रयाणरहितैः स पार्थिवः प्राप कैरपि दिनैस्तरङ्गिणीम् ।
कार्यजातमसमाप्य धीमतां निद्रया परिचयोपि कीदृशः ॥७३॥
रञ्जितः परिजनोऽस्य शीतलस्वच्छया सपदि तुङ्गभद्रया ।
आगताः किमपि पृष्ठतस्तु ये पङ्कशेषमलभन्त ते जलम् ॥७४॥
दक्षिणार्णवतटादुपागतैस्तद्गजैः पिशुनतां गतैरिव ।
शीघ्रमक्रियत मध्यवर्तिभिः सा प्रतीपगतिरब्धिवल्लभा ॥७५॥
सिन्धुतीरनिलयानुरोधतस्तत्तथा बलमवाप दीर्घताम् ।
अन्तरक्षपितरात्रिभिर्जनैः प्राप्यतेस्म नृपमन्दिरं यथा ॥ ७६ ॥
चोलकेलिसलिलावगाहनप्राप्तभूरिघनसारपाण्डुरा ।
सा हिमाचलविटङ्कनिर्गता जाह्नवीव तटिनी व्यराजत ॥७७॥

तत्र दक्षिणतटे कृतस्थितिः कुन्तलेन्दुरवलोक्य तद्बलम् ।
बाहुमाहवसहस्रदीक्षितं वन्दते च परिचुम्बतिस्म च ॥ ७८ ॥
द्राविडोपि नृपतिः कुतूहलाद्वीक्ष्य तत्कटकमुत्कटद्विपम् ।
राज्यमुद्धृतमनर्थपङ्कतः कन्यकावितरणादमन्यत ॥ ७९ ॥
प्रेषितैरथ तयोः परस्परं प्रेम्णि योग्यपुरुषैः प्रपञ्चिते ।
संगमः सकललोकसंमतो जायतेस्म गुरुपुष्ययोरिव ॥ ८० ॥
एष स प्रियतमः श्रियः स्वयं कर्मणा मम शुभेन दर्शितः ।
इत्युदश्रुनयनः प्रभावतः कुन्तलक्षितिपतेरमंस्त सः ॥८१॥
पादयोः प्रणतये कृतोद्यमं तं मुदा द्रविडपार्थिवं ततः ।
विक्रमाङ्कनृपतिर्न्यवर्तयत्तस्य संभ्रमविशेषतोषितः ॥८२॥
किं करोषि वयसाधिकेन मे क्षिप्यतां शिरसि पादपल्लवः ।
अद्यजातमपि मूर्ध्नि धार्यते किं न रत्नममलं वयोधिकैः ॥८३॥
इत्युदीरितवता निरन्तरं तेन हर्षजलपूर्णचक्षुषा ।
कुन्तलेन्दुरगमन्मुदं परां द्राविडक्षितिपमालिलिङ्ग च ॥ ८४ ॥

अर्धासनप्रणयपूर्णमनोरथोथ
श्रीकुन्तलेश्वरमवोचत चोलभूपः ।
प्रत्यादिशन्दशनचन्द्रिकया किरीट-
रत्नातपं सदसि राजपरंपराणाम् ॥ ८५ ॥

अङ्गानि चन्दनरसादपि शीतलानि
चन्द्रातपं वमति बाहुरयं यशोभिः ।
चालुक्यगोत्रतिलक क्व वसत्यसौ ते
दुर्वृत्तभूपपरितापगुरुः प्रतापः ॥ ८६ ॥

धैर्यस्य धाम निधिरद्भुतचेष्टितानां
दृष्टान्तभूरनवधेः करुणारसस्य ।
त्वं वेधसा विरचितः सकलादिराज-
निर्माणसारपरमाणुसमुच्चयेन ॥ ८७ ॥

कन्या विभूषणमियं भुवनत्रयस्य
सिंहासनं विपुलमेतदयं ममात्मा ।
व्यस्तं समस्तमथवा तदिदं गृहाण
पुण्यैर्मम प्रणयमेतु यशःपताका ॥८८ ॥

कन्यान्तःपुरधाम्नि धैर्यनिधिना माधुर्यधुर्यैः पदै-
रित्यादि द्रविडेश्वरेण निबिडप्रेम्णा मुहुर्व्याहृतः ।
चोलीनां कुटिलासु कुन्तललतादोलासु लोलां दृशं
देवः सोथ विनोदयन्मुदमगाच्चालुक्यविद्याधरः ॥८९॥

*इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते पञ्चमः सर्गः ॥ ५ ॥*

सह विभवभरेण तत्र पुत्रीं गुणनिधये नृपनन्दनाय दत्त्वा ।
कथमपि परिणेतुरभ्यनुज्ञामथ समवाप्य चचाल चोलराजः ॥१॥
द्रविडनरपतेरदत्त वित्तं निरवधि कुन्तलनाथनन्दनोपि ।
यशसि रसिकतामुपागतानां तृणगणना गुणरागिणां धनेषु ॥२॥
मुदितमनसि जातमानसिद्धौ गतवति तत्र गुणैकपक्षपाती ।
प्रतिपदमुदकण्ठत क्षितीन्दुः कुसुममृदूनि मनांसि निर्मलानाम्॥३॥
द्रविडपतिकथाद्भुतक्षणेषु क्षितिपतिसूनुरसौ गुणानुरागी ।
पुलकपरिकरैः कपोलपालीं विपुलमतिः परिपूरयां चकार ॥४॥
किमिति न गमनान्निवारितोसौ परिचयमेष्यति चक्षुषोः पुनः किम्।
इति सुजनशिखामणिः कुमारः किमपि चिरं परिचिन्तयांचकार ।५।
द्रविडनृपतिपुत्रिकां चकार त्रिभुवनदुर्लभसंपदास्पदं सः ।
प्रणयिषु शुभचेतसां प्रसादः प्रसरति सन्ततिमप्यनुग्रहीतुम् ॥६॥
रणरभसविलासकौतुकेन स्थितिमथ बिभ्रदसौ यशोवतंसाम् ।
विधिहतकदुराग्रहादकाण्डे गतमशृणोद् द्रविडेन्द्रमिन्द्रधाम्नि ॥७॥
मृदुहृदयतया गुणानुरागादतिमहतः प्रणयाच्च राजपुत्रः ।
हिमकरकरकाण्डपाण्डुगण्डस्थलजलदश्रुजलश्चिरं ललाप ॥८॥
द्रविडविषयराज्यविप्लवेन श्रवणपथातिथिना ततः सखेदः ।
अभिजनवति चोलराजपुत्रे श्रियमभिषेक्तुमसौ समुच्चचाल ॥९॥
करटिशतविकीर्णकर्णतालव्यजनसमीरणशीतलीकृतानि ।
अथ धरणिभुजां पिबन्यशांसि क्षितिपतिरादिपुरीमवाप काञ्चीम्॥१०
समजनि कलमेखलाकलापध्वनिजयडिण्डिमसज्जपुष्पचापम् ।
अथ चटुलकटाक्षबाणवर्षप्रगुणममुष्य पुरः पुरंध्रिचक्रम् ॥११॥
अधरहसितकिंशुका शुकाय क्रमुकदलं वदनस्थमर्पयन्ती ।
क्षितिपतितनयेत्र कापि नेत्रप्रणयिनि चुम्बनचातुरीमुवाच ॥१२॥
गृहशिखरमगम्यमध्यरोहद् द्रुतमवधीरितपातभीतिरन्या ।
मरणमपि तृणं समर्थयन्ते मनसिजपौरुषवासितास्तरुण्यः ॥१३॥

कलकलमपरा मुधा विधाय क्षितितिलकाभ्ययनान्तमाससाद ।
अवतरति मृगीदृशां तृतीयं मनसिजचक्षुरुपायदर्शनेषु ॥१४॥
हृदि विहितपदेन शुद्धभासा कृतमधरं धरणीन्द्रसूनुनेव ।
निपतितमवधीर्य हारमन्या हरिणविलोलविलोचना जगाम॥१५॥
उरसि मनसिजावतंसलीलासमुचितकोमलपल्लवानुकाराम् ।
नखलिपिमपरा प्रकाशयन्ती सुरतविमर्दसहत्वमाचचक्षे ॥१६॥
अभजत मणिकुण्डलं परस्याः श्रवणपरिच्युतमंसदेशमेत्य ।
गलविगलितपुष्पबाणचक्रश्रियमसितोत्पलचारुलोचनायाः ॥१७॥
परिकलितचुलुक्यराजपुत्रप्रथमविलोकनकौतुकत्वराणाम् ।
इति नगरकुरङ्गलोचनानामभवदनङ्गविलोभनो विलासः ॥१८॥
नरपतितनयः कयापि कोपस्फुरितरदच्छदलेखयालुलोके ।
प्रकटितपटुपञ्चबाणलीलाकलकिलकिञ्चितमीक्षणाञ्चलेन ॥१९॥
कनकसदनवेदिकान्तरालग्रथितपदः क्षितिपालनन्दनोऽसौ ।
सुरशिखरितटीविटङ्कमध्यप्रणयिनमुष्णकरं निराचकार ॥ २० ॥
कतिचिदपि दिनानि तत्र नीत्वा परिसरभूमिषु भूरिभिर्विलासैः।
चरणतलनिविष्टदुष्टवर्गः पुरमवलोकयतिस्म गाङ्गकुण्डम् ॥२१॥
द्रविडनरपतिप्रतापभीत्या किमपि गते पयसां निधौ परस्तात् ।
यदविहितविवाहमङ्गलाया बहिरिव निर्गतमादिधाम लक्ष्म्याः॥२२।
गगनमुपगतेन शोभते यन्निरुपमकाञ्चनवप्रमण्डलेन ।
सुरपुरमिव हेमशैलमध्ये विबुधविभूतिभरात्कृतप्रवेशम् ॥ २३ ॥
विघटितपरिपन्थिसैन्यसार्थः पदमधिरोप्य स तत्र चोलसूनुम् ।
नयनचुलुकलुण्ठ्यमानकान्तिर्द्रविडवधूभिरुवास मासमात्रम् ॥२४॥
विघटनमटवीधनुर्धराणां विषमपथेषु विधाय लीलयैव ।
पुनरपि स जगाम तुङ्गभद्रां विरचितवन्दनमालिकां तरङ्गैः ॥२५॥
अथ कतिषुचिदेव दैवयोगात्परिगलितेषु दिनेषु चोलसूनोः ।
श्रियमहरत राजिगाभिधानः प्रकृतिविरोधहतस्य वेङ्गिनाथः॥२६॥

कुटिलमतिरसौ विशङ्कमानः पुनरमुमेव पराभवप्रगल्भम् ।
प्रगुणमकृत पृष्ठकोपहेतोः प्रकृतिविरोधिनमस्य सोमदेवम् ॥२७॥
सुभटशतनिशातखड्गधाराविहरणसव्रणपादपल्लवेव ।
अपि नयनिपुणेषु नो भरेण क्षिपति पदं किमुत प्रमादिषु श्रीः ॥२८॥
अवतरति मतिः कुपार्थिवानां सुकृतविपर्ययतः कुतोपि तादृक् ।
झटिति विघटते यया नृपश्रीस्तटगिरिसंघटितेव नौः पयोधेः॥२९॥
व्रतमिदमिह शस्त्रदेवतानां दृढमधुनापि कलौ निरङ्कुशेपि ।
अविनयपथवर्तिनं यदेताः प्रबलमपि प्रधनेषु वञ्चयन्ति ॥ ३० ॥
इति मुषितधियः श्रिया प्रयान्त्या रभसवशादविचिन्त्य दग्धभूपाः।
बलभरबहुमानतः पतङ्गव्रतमुपयान्ति परप्रतापदीपे ॥३१॥
सकलमपि विदन्ति हन्त शून्यं क्षितिपतयः प्रतिहारवारणाभिः।
क्षणमपि परलोकचिन्तनाय प्रकृतिजडा यदमी न संरभन्ते ॥३२॥

विदधति कुधियोत्र देवबुद्धिं
स्फटिकशिलाघटनासु वर्तुलासु ।
इति मनसि विधाय दग्धभूपास्त्रि-
नयनलिङ्गमपि स्पृशन्ति मिथ्या ॥ ३३ ॥

अविरततरुणीसहस्रमध्यस्थितिविगलत्पुरुषव्रता इवैते ।
प्रतिपदमतिकातराः क्षितीशाः परिकलयन्ति भयं समन्ततोपि ।३४।
अभिसरणपरा सदा वराकी समरमहाध्वसु रक्तपङ्किलेषु ।
हृदि धरणिभुजामियं नृपश्रीर्निहितपदेव कलङ्कमातनोति ॥३५॥
गुणिनमगुणिनं वितर्कयन्ती स्वजनममित्रमनाप्तमाप्तवर्गम् ।
वितरति मतिविप्लवं नृपाणामियमुपसर्पणमात्रकेण लक्ष्मीः ॥३६॥

विधिलिखितमिदं कुटुम्बमध्ये
नृपक्षितिपदं समुपैति कश्चिदेव ।
इति हृदि न विचारयन्ति भूपाः
कुलमपि निर्दलयन्ति राज्यलुब्धाः ॥३७॥

अनुचितममुना किमग्रजस्य व्यवसितमुन्नतचेतसा यदस्मिन् ।
अपकरणधिया चकार संधिं कुलरिपुणा सह चोलराजिगेन ॥३८॥
अथ नृपतनये कृतप्रयाणे गलितनयस्य वधाय राजिगस्य ।
त्वरिततरमुपागतोस्य पृष्ठे सह सकलेन बलेन सोमदेवः ॥३९॥
अनुसरदसितातपत्रमैत्रीं मधुकरमण्डलमाससाद येषाम् ।
अतिविपुलकपोलदानपङ्कप्रभवसरोरुहिणीदलानुकारम् ॥४०॥
अगणितसृणिभिः प्रधावितैर्यैः कुलगिरयः परिघट्टितास्तटेषु ।
मुमुचुरिव मुखैरजस्रमस्रं विगलितधातुतरङ्गिणीमिषेण ॥४१॥
निजदशनयुगैकबद्धवासां श्रियमिव कर्तुमुपोढकौतुका ये ।
स्मरणशरणपङ्कजानि चक्रुः सततममर्षपुरःसराः सरांसि ॥४२॥
श्रवणमधुरविस्फुरद्ध्वनीनां व्यधुरुपकारधियेव षट्पदानाम् ।
मदसलिलमुदारसौरभं ये विटपिविधूननपातिभिः प्रसूनैः ॥४३॥
निजतनुभरगौरवाद्गलन्तीं क्षितिमिव ये दधतिस्म शैलतुङ्गाः ।
मदमुकुलितलोचनाश्चलन्तः किमपि करैः सविलासमुन्नमद्भिः॥४४॥
रणजलधिविलोडनप्रचण्डा गिरय इव द्विरदेश्वरास्तदीयाः ।
दधुरतिमहतीमतीतसंख्याः श्रियमधिरोहितयोधमण्डलास्ते ॥४५॥
कुलिशकठिनलोहबन्धयोगा निजगृहकुट्टिमवद्विलङ्घ्यतेस्म ।
विशिखशकलकण्टकावकीर्णा रणखुरली रथमण्डलैर्यदीयैः ॥४६॥
व्यजनचटुलवालधिप्रपञ्चप्रचुरसमीरणपुञ्जमध्यवर्ती ।
त्वरितगमनलङ्घितोपि येषां मरुदविभाव्यतया न लज्जतेस्म ॥४७॥
प्रतिफलननिभाः सहस्रभासा मणिमयपल्ययनप्रतिष्ठितेन ।
निजरथवहनार्थमाश्रिता ये स्वयमधिरुह्य परीक्षिता इवासन्॥४८॥
रवमनुमितधावनानुरूपं किमिति कृता पृथुला त्वया न पृथ्वी ।
नभसि खुरपुटैरिति स्फुरद्भिर्विधिमिव ये स्म मुहुः प्रतिक्षिपन्ति ४९
प्रतिदिशमधिरोहिताश्ववाराः परिचितकाञ्चनचित्रवर्मबन्धाः ।
अगणितकृतपङ्क्तयो हयास्ते कमिव न चक्रुरुपक्रमं तदीयाः ॥५०॥

असितविलसितेन तद्बलानामसिलतिकानिवहेन निर्मलेन ।
गगनगिरितटी नवेन्द्रनीलद्युतिशतनिर्झरधारिणीव रेजे ॥५१॥
क्व नु न विलसतिस्म कुन्तमाला कलितशिखण्डिशिखण्डमण्डनश्रीः
क्षणमविरहिता विपक्षसेनाभटशिरसामिव मण्डलैस्तदीया ॥५२॥
बहुभिरभिहितैः किमद्भुतैर्वा भयजननं भुवनैकमल्लसैन्यम् ।
रणरसचलितं विलोक्य केषामलभत चेतसि नान्तरं विकल्पः ॥५३॥
द्रविडबलभरे क्रमादवाप्ते निकटमुदारभुजस्य राजसूनोः ।
अपि नृपतिरसौ समीपमागादपकरणावसरं चिरादवाप्य ॥५४॥
ग्रहकलितमिवाग्रजं विलोक्य प्रहरणसंमुखमश्रुपूर्णनेत्रः ।
किमपि किमपि विक्रमाङ्कदेवश्चिरमनुचिन्त्य निवेदयाञ्चकार ॥५५॥
अहह महदनर्थबीजमेतद्विधिहतकेन विरोधसारिणीभिः ।
अविनयरसपूरपूरिताभिर्विहितमकीर्तिफलप्रदानसज्जम् ॥५६॥
इह निहतनयः समागतो यत्सममनुना परिपन्थिनाग्रजो मे ।
समरशिरसि संचरन्पृषत्कैः कथमपरामृशता मया निवार्यः ॥५७॥
पितुरपि परिपन्थिनीं विधाय श्रियमहमत्र निवेशयांबभूव ।
सपदि कथमिमं कदर्थयामि व्यथयति मामहहा महाननर्थः ॥५८॥
अपसरणमितः करोमि किंचित्प्रसरति गोत्रवधाय नैष बाहुः ।
परमयमयशांसि दुष्टलोकः किमपि निपात्य मयि प्रमोदमेति ॥५९॥
इति गिरमभिधाय निष्कलङ्कां विशदमनाः शनकैर्यशोधनोऽसौ ।
अनुनयवचनानि तस्य पार्श्वे कति न विसर्जयतिस्म राजपुत्रः ॥६०॥
स तु शपथशतैः प्रपद्य सर्वं वितथवचाः कुलपांसनत्वमाप्तः ।
क्षणमनुगुणमैक्षत प्रहर्तुं मलिनधियां धिगनार्जवं चरित्रम् ॥६१॥
किमिदमुपनतं यशोविरोधि त्रिदिवगतः किमु वक्ष्यते पिता मे ।
इति मनसि निधाय जातनिद्रं नृपतनयं शशिमौलिरादिदेश ॥६२॥
त्वमिह महति वत्स देवकार्ये ननु गुणवानवतारितो मयैव ।
तरलयति मुधा विकल्पदोला मनस्तव शुद्धधैर्यधाम्नः ॥६३॥

सपदि न शुभमस्ति मोहहेतोस्तिलपरिमाणमपि त्वदग्रजस्य ।
इह हि विहितभूरिदुष्कृतानां विगलति पुण्यचयः पुरातनोपि॥६४॥

भव भुवनमहोत्सवे तदत्र
प्रगुणधनुः परिपन्थिनां प्रमाथे ।
स्मरसि न किमिति स्थितिस्तवैषा
ननु भुवि धर्मविरोधिनां वधाय ॥६५॥

गिरमिति स निशम्य विश्वभर्तुर्गिरितनयादयितस्य मुक्तनिद्रः ।
वचनमिदमलङ्घ्यमिन्दुमौलेरिति रणकर्मणि निश्चयं चकार ॥६६॥
प्रसरदुभयतः प्रहारसज्जं बलयुगलं तदवेक्ष्य वीक्षते स्म ।
समुचितसमरोपभोगलोभात्प्रतिकलमुत्पुलकं भुजद्वयं सः ॥६७॥
मदकरटिनमुत्कटप्रतापः प्रकटितवीरमृदङ्गधीरनादः ।
मथनगिरिमिवाधिरुह्य वेगात्प्रतिबलवारिधिलोडनं चकार ॥६८॥
अहमहमिकया प्रधाविताभ्यां मिलितममुष्य बलं तयोर्बलाभ्याम् ।
सलिलमभिमुखं सहाम्बुराशेस्तदनु महानद्योरिवोदकाभ्याम्॥६९॥
मुखमसितपताकया पतन्त्या ध्वजगरुडः परिचुम्बितं दधानः ।
वदनपरिगृहीतपन्नगस्य व्यतनुत सत्यगरुत्मतः प्रतिष्ठाम् ॥७०॥
प्रकटितपटुमौक्तिकावतंसद्विरदशिरः स्थलसंगतिं प्रपद्य ।
अलभत परमार्थसिंहलीलां करिवरकेतुपरिच्युतो मृगेन्द्रः ॥७१॥
कथमपि विनिपत्य संचरन्तः क्षतजतरंगवतीषु चित्रमत्स्याः ।
सुरयुवतिविलोचनानि संख्ये विदधुरकृत्रिममत्स्यशङ्कितानि ॥७२॥
रुधिरपटलकर्दमेन दूरं रणभुवि दुर्गमतामुपागतायाम् ।
गमनमनिमिषप्रियाजनस्य प्रियमकरोदवलम्बनानपेक्षम् ॥७३॥
प्रहतिनिवहमूर्छितोधिरोहः स्वकरटिकर्णपुटानिलैः प्रबुध्य ।
अपरसुभटपातिते प्रहर्तर्यनुशयमापदलब्धवैरशुद्धिः ॥७४॥
नयनगतमरातिवीरचूडामणिदलनप्रभवं परागमेकः ।
करिदशनविदारितात्मवक्षः स्थलरुधिराञ्जलिभिर्निराचकार॥७५॥

महति समरसंकटे भटोन्यः प्रतिभटनिर्दलनात्समाप्तशास्त्रः ।
अगणितमरणः प्रविश्य वेगादरिकरतः करवालमाचकर्ष ॥७६॥
असुभिरपि वियासुभिः प्रविश्य प्रतिभटमूर्धनि कोपि दत्तपादः ।
फलममनुत जन्मनोपि लब्धं यशसि रतिर्महतां न देहपिण्डे॥७७॥
विघटितकवचश्चचार कश्चित्प्रतिभटमुज्झितकङ्कटं विलोक्य ।
विमलविजयलालसाः खलानामवसरमल्पमपि प्रतिक्षिपन्ति ॥७८॥
रुधिरभृतकपालपंक्तिमध्ये मदकरटी विनिपत्य कर्णतालैः ।
शिशिरमिव चकार पानपात्रप्रणयिनमासवमागतस्य मृत्योः॥७९॥
उपरि निपतितः कपालशुक्तेः श्रवणपुटः करिणः कृपाणलूनः ।
समरभुवि कृतान्तपानलीलाचषकपिधानविलासमाससाद ॥ ८० ॥
अनियतविजयश्रियि प्रवृत्ते चिरमिति तत्र महाहवप्रबन्धे ।
प्रतिसुभटकपालपाटनाय द्विरदमुदञ्चयतिस्म राजसूनुः ॥ ८१ ॥
क्षणमुदचलदुच्चलत्पताके द्रविडबले क्षणमग्रजस्य सैन्ये ।
रणभुवि स चचार यत्रतत्र न्यपिबदरातियशांसि तत्रतत्र ॥८२॥
पददलितबृहत्कपालजाले करटिनि तस्य दुरापभाजनानाम् ।
सुभटरुधिरसीधुपानकेलिर्व्यघटत तत्र पिशाचसुन्दरीणाम् ॥८३॥
भ्रुवमरिषु पदं व्यधत्त लक्ष्मीः सुरभिकुशेशयकोशकेलिसक्ता ।
नृपसुतकरवाललेखया यन्मधुकरमालिकयेव चुम्ब्यतेस्म ॥ ८४ ॥
अनुकृतसमवर्तिपानलीलाचषककरालकपालशुक्तिमध्ये ।
करिदशनपरंपरा निपत्य श्रियमतनोदुपदंशमूलकानाम् ॥ ८५ ॥
वशमवनिपतिद्वयं नयन्ती चटुलपृषत्ककटाक्षमालिकाभिः ।
क्षितिपतितनयेन वीरलक्ष्मीः सुचिरमनर्त्यत संगराग्ररङ्गे ॥८६॥
कुलिशनिशितकङ्कपत्रभिन्नास्त्रिभुवनभीमभुजस्य राजसूनोः ।
प्रतिभटकरटिस्थिताः प्रवीराः प्रणतिपरा इव संमुखा निपेतुः ॥८७॥
द्विरदपतिरमुष्य शत्रुसेनाभटमुखपद्मविमर्दकेलिकालः ।
झटिति रणसरश्चकार लक्ष्मीकरधृतविभ्रमपुंडरीककोशम् ॥८८॥

धृतसुभटकरङ्कमङ्कवर्तिद्विरदघटाविकटास्थिचक्रवालम् ।
रणमनणु कृतान्तभुक्तशेषप्रणयि बभूव शिवासहस्रयोग्यम् ॥ ८९ ॥

किमपरमुपरि प्रतापभाजां विहितपदः स बभञ्ज राजयुग्मम् ।
द्रविडपतिरगात्क्वचित्पलाय्य न्यविशत बन्धनधाम्नि सोमदेवः॥९०॥

उभयनरपतिप्रतापलक्ष्म्यौ विलुलुठतुश्चरणद्वये तदीये ।
त्रिभुवनमहनीयबाहुवीर्यद्रविणविभूतिमतां किमत्यसाध्यम् ॥९१॥

विहितसमरदेवतासपर्यः परिकरितः क्षितिपालयुग्मलक्ष्म्या ।
अथ शिथिलितकङ्कटस्तटान्तस्थितकटकां स जगाम तुङ्गभद्राम्॥९२॥

वितरितुमिदमग्रजस्य सर्वं पुनरुपजातमतिः स राजपुत्रः ।
तुहिनकिरणखण्डमण्डनेन स्फुरदशरीरगिरा रुषा न्यषेधि॥९३॥

मुखपरिचितराजहंसभङ्ग्या सरसिरुहेष्विव पूरयत्सु शङ्खान् ।
सरिति घटिकयेव शोधयन्त्यां प्रतिफलितार्कमिषेण लग्नवेलाम्॥९४॥

अतिशिशिरतया मरुत्सु सक्त्या कुलसरितामिव वारि धारयत्सु ।
नभसि विकिरतीव गाङ्गमम्भः पवनसमाहृतशीकरच्छलेन ॥ ९५ ॥

अतिविशदतया दिशां मुखेषु स्मितमिव केतकमित्रमुद्वहत्सु ।
निखिलभुवनमानसेषु हर्षप्रसरवशेन नितान्तमुत्सुकेषु ॥ ९६ ॥

वरकरिषु गभीरदुन्दुभीनां ध्वनिमिव संजयनत्सु गर्जितेन ।
दिशिदिशि तुरगेषु सान्द्रशंखस्वनकमनीयसहर्षहेषितेषु ॥ ९७ ॥

अथ सुरपथवल्गद्दिव्यभेरीनिनादं
प्रशमितपरितापं भर्तृलाभात्पृथिव्याः ।
अलभत चिरचिन्ताचान्तचालुक्यलक्ष्मी-
क्लमसुषमभिषेकं विक्रमादित्यदेवः ॥ ९८ ॥

श्रीचालुक्यनरेन्द्रसूनुरनुजं तत्रैव पुण्ये दिने
कारुण्यातिशयादसूत्रयदसौ पात्रं महत्याः श्रियः ॥
दासी यद्भवनेषु विक्रमधनक्रीता ननु श्रीरियं
तेषामाश्रितपोषणाय गहनं किं नाम पृथ्वीभुजाम् ॥ ९९ ॥

इति श्रीविक्रमांकदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते षष्ठः सर्गः ॥ ६ ॥

स सर्वमावर्ज्य रिपुप्रमाथी मनोरथानामथ पूरणेन ।
परिभ्रमन्युद्धकुतूहलेन दिग्दन्तिशेषाः ककुभश्चकार ॥ १ ॥
गते समाप्तिं नरनाथचक्रे निचोलकारासितचापदण्डः ।
निर्वाप्य चोलस्य पुनः प्रतापं क्रमेण कल्याणमसौ विवेश ॥ २ ॥
अत्रान्तरे मन्मथबाणमित्रं लतावधूविभ्रमसूत्रधारः ।
स्थानोपदेशी पिकपञ्चमस्य शृङ्गारबन्धुर्मधुराविरासीत् ॥ ३ ॥
शीतर्तुभीत्या विविशुः समस्ताः किं कन्दरासीमनि चन्दनाद्रेः ।
यन्निःसरन्तिस्म हिमव्यपाये दिवा च रात्रौ च ततः समीराः ॥४॥
कृतप्रकोपाः पवनाशनानां निवासदानादिव पन्नगानाम् ।
विनिर्ययुश्चन्दनशैलकुञ्जादाशामुदीचीं प्रति गन्धवाहाः ॥ ५ ॥
रथस्थितानां परिवर्तनाय पुरातनानामिव वाहनानाम् ।
उत्पत्तिभूमौ तुरगोत्तमानां दिशि प्रतस्थे रविरुत्तरस्याम् ॥ ६ ॥
अहो नु चैत्रं प्रति कापि भक्तिरकृत्रिमा केरलमारुतस्य ।
द्राघिष्ठमध्वानमसौ विलङ्घ्य सर्वत्र तस्यानुचरो यदासीत् ॥ ७ ॥
देया शिलापट्टकपाटमुद्रा श्रीखण्डशैलस्य दरीगृहेषु ।
वियोगिनीकण्टक एष वायुः कारागृहस्यास्तु चिरादभिज्ञः ॥८॥
विरूक्षणीयः सखि दाक्षिणात्यस्त्वया न वायुः परुषैर्वचोभिः ।
यत्कोपनिःश्वासपरंपराभिः पीनत्वमायात्ययमुष्णतां च ॥ ९ ॥
बाणेन हत्वा मृगमस्य यात्रा निवार्यतां दक्षिणमारुतस्य ।
इत्यर्थनीयः शबराधिराजः श्रीखण्डपृथ्वीधरकन्दरस्थः ॥ १० ॥
यद्वा मृषा तिष्ठतु दैन्यमेतन्नेच्छन्ति वैरं मरुता किराताः ।
केलिप्रसङ्गे शबराङ्गनानां स हि स्मरग्लानिमपाकरोति ॥ ११ ॥
दुराग्रहश्चन्दनमारुतस्य सदा यदन्यर्तुपराङ्मुखोऽयम् ।
अनेन चैत्रः सुतरामसह्यश्चन्द्रोदयेनेव शरत्प्रदोषः ॥ १२ ॥
वियोगिनीनां किमु पापमेतन्मेधाथवा दक्षिणमारुतस्य ।
कदापि दिग्मोहवशाद्यदेष न चन्दनाद्रेः पुरतः प्रयाति ॥ १३ ॥

इति भ्रमत्सौरभमांसलेन निमीलितानां मलयानिलेन ।
अभूच्चिरं भूमिगृहस्थितानां प्रलापमालाः प्रियकाङ्क्षिणीनाम् ॥१४॥
कन्दर्पदेवस्य विमानसृष्टिः प्रसादमाला रसपार्थिवस्य ।
चैत्रस्य सर्वर्तुविशेषचिह्नं दोलाविलासः सुदृशां रराज ॥१५॥
दोलाधिरूढस्य वधूजनस्य नितम्बभारेण गतागतेषु ।
त्रुटिर्यदालम्बगुणेषु नाभूत्सा भाग्यशक्तिः कुसुमायुधस्य ॥ १६ ॥
जनेषु दोलातरलाः पुरंध्रीः संभूय भूयःसु विलोकयत्सु ।
लक्ष्यस्य विस्तीर्णतया मनोभूरवन्ध्यपातैरिषुभिर्ववर्ष ॥ १७ ॥
दोलाविनोदेन विलासवत्यः सुदूरमारुह्य निवर्तमानाः ।
अर्धं नभः प्राङ्गणसङ्गिनीनां विलासमापुस्त्रिदशाङ्गनानाम् ॥१८॥
विलासदोलाफलके नितम्बविस्ताररुद्धे परितस्तरुण्याः ।
लब्धः परं कुञ्चितकार्मुकेण तत्रावकाशः कुसुमायुधेन ॥ १९ ॥
सौन्दर्यमिन्दीवरलोचनानां दोलासु लोलासु यदुल्ललास ।
यदि प्रसादाल्लभते कवित्वं जानाति तद्वर्णयितुं मनोभूः ॥ २० ॥
दोलासु यद्दोलनमङ्गनानां यन्मल्लिका यच्च लवङ्गवायुः ।
सा विश्वसंमोहनदीक्षितस्य मुख्याङ्गसंपत्कुसुमायुधस्य ॥ २१ ॥
प्रसार्य पादौ विहितस्थितीनां दोलासु लोलांशुकपल्लवानाम् ।
मनोरथानामपि यन्नगम्यं तद्द्रष्टुमापुः सुदृशां युवानः ॥ २२ ॥
उन्नम्य दूरं मुहुरानमन्त्यः कान्ताः श्लथीभूतनितम्बजाड्याः ।
दोलाविलासेन जितश्रमत्वात्प्रकर्षमापुः पुरुषायितेषु ॥ २३ ॥
कुचस्थलैर्निर्दलितो वधूनां संजीवितः श्वाससमीरणेन ।
क्लेशातिरेकान्मलयानिलोभूद्भृत्येषु मान्यः कुसुमायुधस्य ॥२४॥
यत्पूरयामास विलासदोलाः पुरंध्रिभिः सिञ्जितनूपुराभिः ।
तेनोद्वसां मन्मथराजधानीं मन्ये वसन्तीमकरोद्वसन्तः ॥ २५ ॥
चुचुम्ब वक्त्राणि चकर्ष वस्त्रं चिरं विशश्राम नितम्बबिम्बे ।
दोलाविलासे गुरुरङ्गनानामनङ्कुशः केरलमारुतोभूत ॥ २६ ॥

गीतेषु याताः किमु शिष्यभावं वामभ्रुवां विभ्रमदोलिनीनाम् ।
पुंस्कोकिलाः काननचारिणो यच्चातुर्यमापुः कलपञ्चमस्य ॥२७॥
सङ्गादजस्रं वनदेवतानां लीलावनान्तस्थितयः शकुन्ताः ।
आरुह्य दोलासु विलासिनीनां ताभिः सह भ्रेमुरसंभ्रमेण ॥२८॥
हस्तद्वयीगाढगृहीतलोलदोलागुणानां जघने वधूनाम् ।
असंवृतस्रस्तदुकूलबन्धे किमप्यभूदुच्छ्वसितो मनोभूः ॥ २९ ॥
त्वरोपयातप्रियबाहुपाशरुद्धेषु कण्ठेषु वियोगिनीनाम् ।
वृथा समाहूतकृतान्तपाशः स्मितं लतानां मधुराततान ॥ ३० ॥
निवारणं पल्लववीजनानां स्थितिर्निवातेषु गृहोदरेषु ।
मूर्छाप्रबन्धेषु वियोगिनीनामासीदपूर्वः परिहारमार्गः ॥ ३१ ॥
लीलाशुकाः कोकिलकूजितानामतिप्रहर्षाद्विहितानुकाराः ।
गृहादवाह्यन्त वियोगिनीभिर्गुणो हि काले गुणिनां गुणाय ॥३२॥
श्रुत्वेव वृत्तावसरं तुषारं बहिः स्थितानामलिनां निनादैः ।
द्विवर्षकन्यामुखकोमलाभं पङ्कोदरात्पङ्कजमाविरासीत् ॥ ३३ ॥
नवीनदन्तोद्गमसुन्दरेण वासन्तिकाकुड्मलनिर्गमेन ।
उत्संगसङ्गी विपिनस्थलीनां बालो वसन्तः किमपि व्यराजत् ॥३४॥
सुगन्धिनिःश्वासमिवानुवेलमुद्वेल्लता दक्षिणमारुतेन ।
मुखं प्रसूनस्मितदन्तुरं तच्चुचुम्ब मुग्धस्य मधोर्वनश्रीः ॥ ३५ ॥
संक्रान्तभृङ्गीपदपङ्क्तिमुद्रं पौष्पं रजः क्ष्माफलके रराज ।
क्रमाल्लिपिज्ञानकृतक्षणस्य क्षणं मधोरक्षरमालिकेव ॥ ३६ ॥
समारुरोहोपरि पादपानां लुलोठ पुष्पोत्करेणुपुञ्जे ।
लताप्रसूनांशुकमाचकर्ष क्रीडन्वनैः किं न चकार चैत्रः ॥ ३७ ॥
दत्तप्रवालौष्ठसमर्पणाय लतावधूनां मुकुलस्तनीनां ।
मत्तालिवैतालिकगीतकीर्तिर्भ्रमन्मधुर्यौवनमारुरोह ॥ ३८ ॥
सलीलमङ्गीकृतपञ्चबाणसाम्राज्यभारस्य मधोरभङ्गः ।
एको भुजस्तस्य लवङ्गवायुरन्यः पिकस्त्रीकलपञ्चमोऽभूत् ॥ ३९ ॥

राशीकृताः पुष्पपरागपुञ्जाः पदेपदे दक्षिणमारुतेन ।
मत्तस्य चैत्रद्विरदस्य कर्तुमनूणहेतोरिव पांसुतल्पान् ॥ ४० ॥
लग्नद्विरेफध्वनिपूर्यमाणं वासन्तिकायाः कुसुमं नवीनम् ।
आसादयामास वसन्तमासजन्मोत्सवे मङ्गलशङ्खलीलाम् ॥४१॥
गते हिमर्तौ ध्रुवमुष्णखिन्नः शीतोपचारं मलयः सिषेवे ।
यदाजगाम व्यजनोपमानां समीरणश्चन्दनपल्लवानाम् ॥ ४२ ॥
मनस्विनीनां मनसोवतीर्य मासस्य वेगेन पलायितस्य ।
जीवग्रहायेव वसन्तमित्रं बभ्राम वायुः ककुभां मुखानि ॥ ४३ ॥
वियोगिनीनामवशाल्लुलोठ कण्ठेषु लीलाकलपञ्चमो यः ।
तेनैव चक्रे मदनस्य कार्यं पुण्यैर्यशोभूत्पिकपञ्चमस्य ॥ ४४ ॥
पदातिसंवर्गणकारणेन पदेपदे चम्पकराशिभङ्ग्या ।
वसन्तसामन्तविकीर्यमाणं हेमेव रेजे स्मरपार्थिवस्य ॥ ४५ ॥
चचार चूतद्रुममञ्जरीषु चुचुम्ब नानाकलिकामुखानि ।
स्त्रीराज्यमध्यस्थ इव द्विरेफः स्थातुं न लेभे क्षणमेवमेव ॥ ४६ ॥
विलासिनामादिगुरुस्त्रिलोक्यामन्योन्यलीलाभुजबन्धनेषु ।
उत्तम्भिताशोकपलाशपाणिर्न चैत्रमल्लः प्रतिमल्लमाप ॥ ४७ ॥
पुरंध्रिगंडूषसुराभिलाषं पश्यन्नशोको बकुलद्रुमस्य ।
प्रियप्रियापादतलप्रहारमात्मानमल्पव्यसनं विवेद ॥ ४८ ॥
चूतद्रुमालीभुजपञ्जरेण रणद्द्विरेफावलिकङ्कणेन ।
मित्रं मधुः कोकिलमञ्जुनादपूर्वाभिभाषी स्मरमालिलिङ्ग ॥४९॥
उन्निद्रपङ्क्तिस्थितचम्पकानि चकाशिरे केलिवनान्तराणि ।
वियोगिनीनां कवलीकृतानां सुवर्णकाञ्चीभिरिवाञ्चितानि ॥५०॥
मर्मव्यथाविस्मयघूर्णमाना मूर्धोच्छलत्कुण्डलविभ्रमेण ।
शब्दानुसारेण वियोगिनीभिः क्षिप्ताः पिकानामिव कण्ठपाशाः॥५१॥
उदञ्चयन्किंशुकपुष्पसूचीः सलीलमाधूतलताकशाग्रः ।
वियोगिनां निग्रहणाय सज्जः कामाज्ञया दक्षिणमारुतोभूत ॥५२॥

प्रसूननाराचपरंपराभिर्वर्षत्सु योधेष्विव पादपेषु ।
वसन्तमत्तद्विरदाधिरूढः प्रौढत्वमाप स्मरभूमिपालः ॥ ५३ ॥

समर्प्यमाणाद्भुतकौसुमास्त्रैश्चैत्रेण चित्रीकृतकाननेन ।
अधिज्यधन्वापि पराङ्मुखोभून्निषङ्गभारे भगवाननङ्गः ॥ ५४ ॥

शृङ्गारिणीमार्जितदन्तपङ्क्तिकान्त्येव निर्यन्त्रणमुच्छलन्त्या ।
प्रक्षाल्यमानस्य शनैरवापुरनिन्द्यमिन्दोः किरणाः प्रसादम् ॥५५॥

त्वं चैत्र मित्रं यदि मन्मथस्य तस्मिन्ननङ्गे कथमक्षताङ्गः ।
ज्ञातं तवान्तर्गतमागतोसि मिषेण नाशाय वियोगिनीनाम् ॥५६॥

नूनं महापातकिनं वितर्क्य वियोगिवर्गक्षयदीक्षितं त्वाम् ।
पस्पर्श न त्र्यम्बकनेत्रवह्निः पापैरखण्डैः प्रियखण्डितानाम् ॥५७॥

हराहवे पञ्चशरं विमुच्य पलायितः क्षत्रपराङ्मुखस्त्वम् ।
अस्य क्षताङ्गस्य पुरोधुनात्र हा चैत्रचण्डाल कथं स्थितोसि ॥ ५८॥

इहैव सङ्गः फलवान्बभूव त्वया महापातकिनां पिकानाम् ।
यदर्धदग्धोल्मुककश्मलेन देहेन लोकस्य बहिश्चरन्ति ॥ ५९ ॥

त्वं दृष्टदोषोपि पुनः स्मरेण यत्संगृहीतः शृणु तत्र हेतुम् ।
अङ्गीकृतस्त्रीवधपातकेन केनापि न स्वीकृत एष भारः ॥ ६० ॥

इत्थं वियोगज्वरजर्जराणामुद्वेजितानां मधुमासलक्ष्म्या ।
आसन्मुहुः पक्ष्मललोचनानां चैत्रे विचित्रोक्तिविचेष्टितानि ॥६१॥

गम्भीरता चाटुपराङ्मुखत्वं सौभाग्यमन्यप्रमदारदाङ्कः ।
दोषोपि यूनां गुण एव मेने पुरन्ध्रिभिर्मानपराङ्मुखीभिः ॥६२॥

मानग्रन्थिकदर्थनाय कथिताः सर्वत्र पुंस्कोकिलाः
केलीकर्मणि दाक्षिणात्यमरुतामध्यक्षभावोर्पितः ।
पुष्पास्त्रस्य जगत्त्रयेपि विरहप्रत्यूहहेवाकिनः
सन्नद्धोयमसाध्यसाधनविधौ साम्राज्यमैत्री मधुः ॥६३॥

लीलास्नानविधिक्षमं मधुलिहां पुष्पेषु जातं मधु
स्थायित्वं कलकण्ठकण्ठकुहरेष्वासेवते पञ्चमः ।
एकच्छत्रजगज्जयार्जनरुमैर्देवस्य शृङ्गारिणः
चैत्रश्चित्रमकाण्ड एव समभूत्त्रैलोक्यजैत्रो भटः ॥६४॥

भृङ्गैर्विश्वविंयोगिवर्गदलनोत्तालस्य वैतालिकैः
प्रारब्धा बिरुदावलीव पठितं शृङ्गारबन्धोर्मधोः ।
नादः कोकिलयोषितां प्रमुषितत्रैलोक्यमानग्रहः
कामः संप्रति कौतुकाद्यदि परं पौष्पं धुनीते धनुः ॥ ६५ ॥
कूजत्कोकिलकोपिता गुरुधनुःशिक्षां समासेवते
खिन्ना चन्दनमारुतेन मलये दावाग्निमाकांक्षति ।
किंचान्विष्यति दुर्मना दलयितुं कामेन मैत्रीं मधोः
कर्तुं धावति दुर्लभे त्वयि सखी कां कां न वातूलनाम् ॥ ६६ ॥
संनद्धं माधवीनां मधु मधुपवधूकेलिगण्डूषयोग्यं
विश्राम्यन्ति श्रमेण क्वचिदपि मरुतो न क्षणं दाक्षिणात्याः ।
क्रीडाशैलीभवन्ति प्रतिकलमलिनां कौसुमाः पांसुकूटा-
श्चैत्रे पुष्पास्त्रमित्रे तदिह विरहिणां कीदृशी जीविताशा ॥६७॥
पुष्पैर्भ्राजिष्णुभस्त्राकरणिमगणितैः शाखिनः के न याता-
स्त्र्युन्निस्त्रिंशलेखामयमिव भुवनं भृङ्गमालाभिरास्ते ।
त्रैलोक्याकाण्डचण्डप्रहरणनिबिडोत्साहकण्डूलदोष्णः
पुष्पेषोर्जैत्रशस्त्रव्यतिकरविधये साधु सज्जो वसन्तः ॥६८॥
शून्याः श्रीखण्डवातैरभिलषति भुवश्चन्दनार्द्रैः परस्ता-
त्क्रीलोद्याने सखीनां सृजति कलकलं कोकिलोत्सारणाय ।
स्तौति क्रीडावनालीनिखिलपरिमलाचान्तये चञ्चरीकां-
श्चारुभ्रूस्त्वद्वियोगे कमिव न भजते जीवरक्षाभ्युपायम् ॥ ६९ ॥

मलयगिरिसमीराः सिंहलद्वीपकान्ता-
मुखपरिचयलब्धस्फारकर्पूरवासाः ।
द्रविडयुवतिदोलाकेलिलोलन्नितम्ब-
स्थलशिथिलितवेगाः सेव्यतामाप्नुवन्ति ॥ ७० ॥
पानीयं नालिकेरीफलकुहरकुहूत्कारि कल्लोलयन्तः
कावेरीतीरतालद्रुमभरितसुराभाण्डभांकारचण्डाः ।

उन्मीलन्नीलमोचापरिचयशिशिरा वान्त्यमी द्राविडीनां
कर्पूरापाण्डुगण्डस्थललुठितरया वायवो दाक्षिणात्याः ॥ ११ ॥
भृङ्गालीभिरधिज्यमन्मथधनुर्लीलां लभन्ते लताः
किं पुष्पं न बिभर्ति पुष्पधनुषस्त्रैलोक्यजैत्रास्त्रताम् ।
दोलान्दोलनकेलिलोलवनितासंचारिताङ्गोऽधुना
पञ्चेषुश्चललक्ष्यभेदविधिना गर्वं समारोहति ॥ १२ ॥
उन्माद्यन्मधुपेन पुष्पमधुनः केलीभुवः पङ्किलाः
सर्वे भङ्गभयं दिशन्ति कुसुमप्राग्भारतः पादपाः ।
चैत्रेणास्त्रपरंपराव्ययविधौ दैन्यं परित्याजितः
कामः संप्रति बाणमोक्षरसिको लक्ष्येष्वलक्ष्येषु च ॥ १३ ॥
नीता नूतनयौवनप्रणयिना चैत्रेण चित्रां लिपिं
हर्षोद्धर्षति का न काननमही पुष्पैः कटाक्षैरिव ।
दोलारूढपुरंध्रिपीनजघनप्राग्भारमाधुन्वतः
किं मानद्रुमभञ्जनाय गहनं लङ्कानिलस्याधुना ॥ १४ ॥
पौलस्त्योद्यानलीलाविटपितलमिलन्मैथिलीपादमुद्राः
कर्पूरद्वीपवेलाचलविपिनतटीपांसुकेलीरसज्ञाः ।
क्रीडाताम्बूलचूर्णग्लपितमुखहृतक्लान्तयः केरलीना-
मामोदन्ते समीराः स्मरसुभटजयाकाङ्क्षिणो दाक्षिणात्याः ॥१५॥
यश्चूताङ्कुरकन्दलीकवलनात्कर्णामृतग्रामणी-
श्छायामात्रपरिग्रहोऽपि जगृहे पञ्चेषुजैत्रेषुताम् ।
ताम्यत्तालुविटङ्कसङ्कटतटीसंचारतः पञ्चमः
सोऽयं कोकिलकामिनीगलबिलादामूलमुन्मूलति ॥ १६ ॥
विरहविधुरकामिनीसहस्रप्रहितमनोभवलेखसूक्तिमिश्रैः ।
सुरभिसमयवर्णनैरकुर्वन्निति नृपतेरथ वन्दिनः प्रसादम् ॥१७॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते सप्तमः सर्गः ॥ ७ ॥

समये तत्र पुष्पास्त्रमित्रे विक्रमभूपतेः ।
उद्भूतनूतनाश्चर्या श्रोत्रमैत्रीमगात्कथा ॥ १ ॥
यथास्ति विजयस्तम्भप्रशस्तिरिव मान्मथी ।
करहाटपतेः पुत्री त्रिजगन्नेत्रकार्मणम् ॥ २ ॥
विद्याधरकुमारी सा गौरीदयितशासनात् ।
कृते कस्यापि कुरुते स्वयंवरमहोत्सवम् ॥ ३ ॥
चन्द्रलेखेति नामास्याश्चन्द्रलेखासमत्विषः ।
मृत्युंजयमहामन्त्रमैत्रीमेति मनोभुवः ॥ ४ ॥
अन्तरङ्गमनङ्गस्य शृङ्गारकुलदैवतम् ।
अङ्गीकरोति तन्वङ्गी सा विलासमयं वयः ॥ ५ ॥
तस्याः पादनखश्रेणिः शोभते लटभभ्रुवः ।
रत्नावलीव लावण्यरत्नाकरसमुद्गता ॥ ६ ॥
स्तनभारोत्र वक्त्रेन्दुचन्द्रिकावरणं मम ।
इति तत्पादयोर्लग्ना वेद्मि प्राङ्गणपद्मिनी ॥ ७ ॥
अमूल्यस्य मम स्वर्णतुलाकोटिद्वयं कियत् ।
इति कोपादिवाताम्रं पादयुग्मं मृगीदृशः ॥ ८ ॥
तत्पादनखरत्नानां यदलक्तकमार्जनम् ।
इदं श्रीखण्डलेपेन पाण्डुरीकरणं विधोः ॥ ९ ॥
जाग्रतः कमलाल्लक्ष्मीं यज्जग्राह तदद्भुतम् ।
पादद्वंद्वस्य मत्तेभगतिस्तेये तु का स्तुतिः ॥ १० ॥
अत्यपूर्वस्य रागस्य पूर्वपक्षाय पल्लवाः ।
पद्मानि पादयुग्मस्य प्रत्युदाहरणानि च ॥ ११ ॥
दृश्यन्ते मानसोत्तंसाः राजहंसा क्वचिद्यदि ।
गतौ चरणयोस्तस्याः प्रक्ष्यते यावदन्तरम् ॥ १२ ॥
नितम्बपीड्यमानेन पादयुग्मेन सुभ्रुवः ।
कृता भ्रुकुटिभङ्गीव नीलनूपुरमालया ॥ १३ ॥

हेममञ्जीरमालाभ्यां भाति जङ्घालताद्वयम् ।
कृतालवालं लम्बाभ्यां कुङ्कुमेनेव सुभ्रुवः ॥ १४ ॥
लम्भिताः कदलीस्तम्भास्तदूरुभ्यां पराभवम् ।
अत्यन्तमृदुभिर्लब्धो जङ्गैः क्व जयडिण्डिमः ॥ १५ ॥
मन्ये तदूरू संम्भाव्य हस्तसर्वस्वहारिणी ।
वहन्त्यस्पृश्यताहेतोर्मातङ्गत्वं मतङ्गजाः ॥ १६ ॥
नितम्बबिम्बं बिम्बोष्ठी चन्द्रकान्तशिलाघनम् ।
धत्ते कन्दर्पदोःस्तम्भप्रशस्तिफलकोपमम् ॥ १७ ॥
विस्तारिणा मुहुस्तस्याः श्रोणीबिम्बेन पीडिता ।
त्रुटिता त्रुटितास्मीति पूत्करोतीति मेखला ॥ १८ ॥
अपर्याप्तभुजायामः सखेदोस्याः सखीजनः ।
श्रोण्यां कथंचित्कुरुते रशनादामबन्धनम् ॥ १९ ॥
अनङ्गरङ्गपीठोस्याः शृङ्गारस्वर्णविष्टरः ।
लावण्यसारसंघातः सा घना जघनस्थली ॥ २० ॥
तन्नितम्बस्य निन्दन्ति वृद्धिं परिजनाङ्गनाः ।
काञ्चीनवनवग्रन्थिग्रथनेन कदर्थिताः ॥ २१ ॥
नितम्बगौरवेणासौ गौराङ्गी खिद्यते दृढम् ।
हारयत्यपरिस्पन्दा कन्दुकं क्रीडितेषु यत् ॥ २२ ॥
तदीयजघनाभोगगरिमा विस्मयास्पदम् ।
दूरपाती पृषत्कोभूद्येनानङ्गस्य साङ्गना ॥ २३ ॥
नाभिरन्ध्रं प्रविष्टास्याः श्यामला रोमवल्लरी ।
ग्रस्ता तिमिरलेखेव मेखलामणिकान्तिभिः ॥ २४ ॥
भाति रोमावली तस्याः पयोधरभरोन्नतौ ।
जाता रत्नशलाकेव श्रोणिवैदूर्यभूमितः ॥ २५ ॥
नाभिसङ्गेन गौराङ्ग्याः शोभते रोममञ्जरी ।
कन्दर्पहेमकटकाल्लाक्षाधारेव निर्गता ॥ २६ ॥

नाभीवलयसंबद्धा रोमाली भाति सुभ्रुवः ।
सहिता निगडेनेव शृङ्खला स्मरदन्तिनः ॥ २७ ॥
रोमावली विलासिन्याः प्रविष्टा नाभिमण्डलम् ।
कियद्गाम्भीर्यमत्रेति तात्पर्यमिव बिभ्रती ॥ २८ ॥
स्तनौ तुङ्गौ समारूढे चापन्यस्तभरे स्मरे ।
कोदण्डाटनिमुद्रेव जाता नाभी नतभ्रुवः ॥ २९ ॥
मन्ये समाप्तलावण्यसारे सर्गे मृगीदृशः ।
अपूरयित्वेव गतो नाभिरन्ध्रं प्रजापतिः ॥ ३० ॥
लिखन्त्याः कामसाम्राज्यशासनं यौवनश्रियः ।
गलितेव मषीधारा रोमाली नाभिगोलकात् ॥ ३१ ॥
जाने रात्रिषु तन्मध्ये ददाति शनकैः पदम् ।
गम्भीरनाभिकुहरप्रवेशाशङ्कया स्मरः ॥ ३२ ॥
हारः कुरङ्गशावाक्ष्या राजति स्थूलमौक्तिकः ।
नाभिलावण्यपानीयघटीयन्त्रगुणोपमः ॥ ३३ ॥
स्तनभाराय मध्येन त्रिवलिव्याजतः कृता ।
तस्याः शङ्कितभङ्गेन भ्रूभङ्गानामिवावलिः ॥ ३४ ॥
तदीयत्रिवलीमार्गसोपानारोहणश्रमः ।
अनङ्गत्वादनङ्गस्य जातो रत्येकगोचरः ॥ ३५ ॥
परिहृत्य दुरारोहं तस्याः स्तनतटं कृता ।
कन्दर्परथसंचारमार्गालीव वलित्रयी ॥ ३६ ॥
दरिद्रमुदरं दृष्ट्वा चक्रे लावण्यपूर्णयोः ।
पन्थानं स्तनयोस्तस्यास्त्रिवलीविषमं विधिः ॥ ३७ ॥
राजति त्रिवली तस्याः स्तनभारोन्नतिक्रमात् ।
उपर्युपरि जातेव हारमुद्रापरंपरा ॥ ३८ ॥
युक्तं मध्ये कृशा तन्वी कार्मुकीकरणाय यत् ।
अत्रैव कुसुमास्त्रेण पीड्यते श्लिष्टमुष्टिना ॥ ३९ ॥

स्तनौ भारार्पणाव्यग्रौ काञ्ची कलकलोन्मुखी ।
कस्यां दिशि न मध्यस्य तस्याः कार्श्यं सहेतुकम् ॥ ४० ॥
भाति निर्विवरे तस्याश्चित्रं कुचयुगान्तरे ।
क्रीडाकुण्डलितोच्चण्डकोदण्डः कुसुमायुधः ॥ ४१ ॥
कुचद्वये चकोराक्षी चिबुकप्रान्तचुम्बिनि ।
नर्मोक्तिषु न शक्नोति स्थातुं लज्जानतानना ॥ ४२ ॥
शङ्के तच्चित्तमक्लेशसाध्यं कुसुमधन्वनः ।
काठिन्यं बहिरेवास्याः स्तनाभ्यां येन धारितम् ॥ ४३ ॥
सा स्तनाञ्जलिबंधेन मन्मथं प्रथमागतम् ।
करोतीवोन्मुखं बाला बान्धवं यौवनश्रियः ॥ ४४ ॥
अस्त्यप्रतिसमाधेयं स्तनद्वंद्वस्य दूषणम् ।
स्फुटतां कञ्चुकानां यन्नायात्यावरणीयताम् ॥ ४५ ॥
कुम्भौ सदम्भौ करिणां कलशौ मन्दकौशलौ ।
चक्रवाकौ वराकौ च तदीयकुचयोः पुरः ॥ ४६ ॥
मुखेन्दुचन्द्रिकापूरप्लाव्यमानौ पुनःपुनः ।
शीतभीताविवान्योन्यं तस्याः पीडयतः स्तनौ ॥ ४७ ॥
तत्कुचौ चरतः किंचिन्नूनं मनसिजव्रतम् ।
नित्योन्मुखौ यदासाते मौलिरत्नस्य भास्वतः ॥ ४८ ॥
सा धारयत्यधीराक्षी दुर्वहं स्तनमंडलम् ।
गर्वपर्वतमारूढश्चित्रं कुसुमकार्मुकः ॥ ४९ ॥
तस्यास्तुङ्गस्तनच्छाया चकास्ति त्रिवलीतटे ।
लीना तिमिरलेखेव वदनेन्दोरगोचरे ॥ ५० ॥
अयं त्रयाणां ग्रामाणां निधानं मधुरध्वनिः ।
रेखात्रयमितीवास्याः सूत्रितं कण्ठकन्दले ॥ ५१ ॥
असावुद्वेललावण्यरत्नाकरसमुद्भवः ।
जगद्विजयमङ्गल्यशंखः कुसुमधन्वनः ॥ ५२ ॥

श्रोत्रपीयूषगण्डूषैः काकलीकलगीतिभिः ।
कण्ठः कुण्ठितचातुर्यो विपञ्चीपञ्चमध्वनेः ॥ ५३ ॥
कुसुमायुधकोदण्डे हस्तौ विस्तीर्णचक्षुषः ।
अशोकपल्लवास्त्राणां प्रतिहस्तत्वमागतौ ॥ ५४ ॥
नाहं धार्यमधीराक्षि मुखेन्दोः सम्मुखं त्वया ।
इतीव लीलापद्मेन करेऽस्याः कान्तिरर्पिता ॥ ५५ ॥
आयूरेखां चकारास्याः करे द्राघीयसीं विधिः ।
शौण्डीर्यगर्वनिर्वाहप्रत्याशां च मनोभुवः ॥ ५६ ॥
गौराङ्ग्या भुजलावण्यमीलितं हेमकङ्कणम् ।
कण्ठाश्लेषे वयस्याभिः काठिन्यादन्वमीयत ॥ ५७ ॥
प्रकोष्ठबन्धे बिम्बोष्ठ्यास्तस्याः काञ्चनकङ्कणम् ।
नालं वलयितं हस्ते हेमाब्जस्येव राजते ॥ ५८ ॥
सौवर्णकङ्कणश्रेण्या भाति तद्बाहुकन्दली ।
तूणचम्पकमौर्व्येव पुष्पचापेन वेष्टिता ॥ ५९ ॥
अङ्गुलीभिः कुरङ्गाक्ष्याः शोभते मुद्रिकावलिः ।
प्रोतेव बाणैः पञ्चेषोः सूक्ष्मलक्ष्यपरंपरा ॥ ६० ॥
सहेमकटकं धत्ते सा करं पद्मतस्करम् ।
पद्मिनीवल्लभस्येव मूले वेष्टितमंशुना ॥ ६१ ॥
हस्ते चकास्ति बालायास्तस्याः कङ्कणमालिका ।
मनः कुरङ्गबन्धाय पाशालीव मनोभुवः ॥ ६२ ॥
कृशाङ्ग्याः कुचभारेण दूरमुत्सारितौ भुजौ ।
वहतः कलहायेव वाचालां वलयावलिम् ॥ ६३ ॥
सरले एव दोर्लेखे यदि चञ्चलचक्षुषः ।
अमुग्धाभ्यो मृणालीभ्यः कथमाजह्रतुः श्रियम् ॥ ६४ ॥
बाहू तस्याः कुचाभोगनिरुद्धान्योन्यदर्शनौ ।
मन्त्रितं कथमेताभ्यां मृणालीकीर्तिलुण्ठनम् ॥ ६५ ॥

मुखारविन्ददत्तश्रीः सुतनोरुरुणोधरः ।
कुरुते हारमाणिक्यप्रदीपान्पाण्डुरत्विषः ॥ ६६ ॥
संततोदयसंध्येव वदनेन्दोरनिन्दिता ।
तदोष्ठमुद्रा लावण्यसमुद्रस्येव विद्रुमः ॥ ६७ ॥
मुखं वहति बन्धूकबन्धुरेणाधरेण सा ।
पूर्णेन्दुमिव सोदर्यादङ्कलालितकौस्तुभम् ॥ ६८ ॥
अधरोसौ कुरङ्गाक्ष्याः शोभते नासिकातले ।
सुवर्णनलिकामध्यान्माणिक्यमिव विच्युतम् ॥ ६९ ॥
पुराणबाणत्यागाय नूतनास्त्रकुतूहलात् ।
तन्नासा भाति कामेन तूणीवाधोमुखीकृता ॥ ७० ॥
अमुष्य मुषिता लक्ष्मीश्चक्षुषेति न नूतनम् ।
न वेद्मि कथयत्यस्याः कर्णे लग्नं किमुत्पलम् ॥ ७१ ॥
मृगीसम्बन्धिनी दृष्टिरसौ यदि न सुभ्रुवः ।
धावति श्रवणोत्तंसलीलादूर्वाङ्कुरे कुतः ॥ ७२ ॥
तस्याः श्रवणमार्गेण चलिते यदि लोचने ।
कुतः प्रकामधवले धत्तः कृष्णानुरक्तताम् ॥ ७३ ॥
श्रूयतां कौतुकं सोपि स्मरः शृङ्गारिणां गुरुः ।
अमुष्याः शिष्यतामेति श्रवणोन्मुखयोर्दृशोः ॥ ७४ ॥
सौन्दर्यपात्रे वक्त्रेन्दौ कुरङ्गासङ्गभीतया ।
सूत्रितौ श्रोत्रपाशाभ्यां पाशाविव मृगीदृशा ॥ ७५ ॥
किंचित्सविभ्रमोदञ्चिभ्रूलता भाति भामिनी ।
बालक्रीडाप्रतिद्वंद्विं तर्जयन्तीव यौवनम् ॥ ७६ ॥
भास्वत्कुण्डलमाणिक्यप्रभाप्रतिहतेरिव ।
नताङ्ग्याः श्रवणोत्संगमारूढा नयनद्वयी ॥ ७७ ॥
भ्रूलेखायुगलं भाति तस्याश्चटुलचक्षुषः ।
पत्रद्वयीव हरिता नासावंशस्य निर्गता ॥ ७८ ॥

नासावंशविनिर्मुक्तमुक्ताफलसनाभिना ।
भाति भालतलस्थेन बालाचन्दनबिन्दुना ॥ ७९ ॥
तस्याः कचभरव्याजात्तनयस्नेहलालितः ।
आरूढः पार्वतीबुद्ध्या गुहबर्हीव मूर्धनि ॥ ८० ॥
गण्डे मण्डनमात्मनैव कुरुते वैदग्ध्यगर्वादसौ
त्यक्त्वा हेमविभूषणानि तनुते ताडीदलेष्वाग्रहम् ।
मन्दा कन्दुकखेलनाय भजते शारीषु शिक्षारसं
तन्व्या चित्रमकाण्ड एव लटभाभावे निबद्धो भरः ॥ ८१ ॥
भृङ्गालीमुदरे क्षिपन्ति शतशः पद्मानि शस्त्रीमिव
प्रत्यागच्छति लङ्घनार्थमसकृद्व्योमाङ्गणं चन्द्रमाः ।
वक्त्रेणापहृते कुरङ्गकदृशस्त्रैलोक्यरूपोच्चये
प्रत्यावर्तनवाञ्छयेव कति न क्लेशं समातन्वते ॥ ८२ ॥
दायादत्वं मनसिजधनुर्भ्रूविलासस्य धत्ते
योगक्षेमौ वहति नयनद्वन्द्वमिन्दीवराणाम् ।
तद्गात्राणां पुनरिह जगज्जैत्रलावण्यभाजा-
माभात्यग्रे मलवदखिलं मूलवर्णं सुवर्णम् ॥ ८३ ॥
दृशोः सीमावादः श्रवणयुगलेन प्रतिकलं
स्तनाभ्यां संरुद्धे हृदि मनसिजस्तिष्ठति बलात् ।
नितम्बः साक्रन्दं क्षिपति रशनादाम परतः
प्रवेशस्तन्वङ्ग्या वपुषि तरुणिम्नो विजयते ॥ ८४ ॥
दोलायां जघनस्थलेन चलता लोलेक्षणा लज्जते
धत्ते दिक्षु निरीक्षणं स्मितमुखी पारावतानां रुतैः ।
स्पर्शः कण्टककोटिभिः कुटिलया लीलावने नेष्यते
सज्जं मौग्ध्यविसर्जनाय सुतनोः शृङ्गारमित्रं वयः ॥ ८५ ॥
लास्याभ्यासमिषेण चित्रमनया गात्रार्पणं शिक्षितं
लीलापद्मनदोलनेन दलिता कण्ठस्य कुण्ठा गतिः ।

किं वा वर्णनया समस्तलटभालंकारतामेष्यति
स्वल्पेनैव परिश्रमेण रमणी देवस्य रामागुरोः ॥ ८६ ॥
वक्त्रं निर्मलमुन्नता कुचतटी मध्यप्रदेशः कृशः
श्रोणीमण्डलमङ्गनाकुलगुरोर्देवस्य सिंहासनम् ।
कृत्वा चारुदृशश्चतुष्टयमिदं तुष्टाव मन्ये विधि-
ईर्षोद्गद्गद्गद्यपद्यरचनागर्भैश्चतुर्भिर्मुखैः ॥ ८७ ॥
इत्थं कर्णरसायनं श्रुतवतः कर्णाटपृथ्वीपते-
राकृष्टस्य कुतूहलेन पुनरप्याकाङ्क्षतस्तत्कथाम् ।
प्राप्तः पार्श्वममुष्य पल्लवयितुं तामेव वार्त्तां पुनः
सिञ्जाचालनचञ्चलः श्रुतिगलत्ताडङ्कपत्रः स्मरः ॥ ८८ ॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचितेऽष्टमः सर्गः ॥ ८ ॥

विजृम्भबाणेष्वथ पञ्चबाणकोदण्डसिञ्जाघनगर्जितेषु ।
विलासिनी मानसमाविवेश सा राजहंसीव नरेश्वरस्य ॥१॥
क्षिप्ते पदे चारुदृशा विशन्त्या बालप्रबालप्रतिमल्लभासि ।
चेतः क्षितीन्दोः स्फटिकावदातमुपाधियोगादिव रक्तमासीत् ॥२॥
वित्रासितस्त्रैत्रसमीरणेन मयूखदण्डैः स्खलितः सुधांशोः ।
नासौ बभूव स्मरपार्थिवस्य कस्याः पदं रोषविभीषिकायाः ॥३॥
गृह्णन्गुणानह्नि विभावरीणां दिनप्रशंसां विदधन्निशासु ।
क्रमादसौ तां क्षितिमाचकाङ्क्ष यत्र द्वयं नास्ति दिनं निशा च ॥४॥
त्रैलोक्यसंमोहनविद्ययेव तया जयास्थां महतीं दधानः ।
तं धन्विनां धुर्यमपि प्रहर्तुं विलासधन्वा धनुराचकर्ष ॥ ५ ॥
निजप्रभानिन्दुलचन्द्रभासा प्रभातलक्ष्म्येव परिस्फुरन्त्या ।
तया समानीयत पाण्डिमानं चालुक्यभूपालकुलप्रदीपः ॥६॥
शृङ्गाररत्नाकरवेलयेव तया प्रवेशे विहिते तरुण्या ।
नवानुरागेण मनस्तदीयं रत्नोत्करेणेव सनाथमासीत् ॥ ७ ॥
असौ भवित्री सुभगा नतभ्रूः करिष्यते पञ्चशरः प्रसादम् ।
आन्दोलितोभूदिति चिन्तयासौ त्रैलोक्यचिन्ताहरणक्षमोपि ॥८॥
यथा यथा निःश्वसिति स्म राजा निरङ्कुशं कार्श्यमदर्शयच्च ।
तथातथा जागरयन्धनुर्ज्यां भेजे जयास्थां भगवाननङ्गः ॥ ९ ॥
जाते धरित्रीतिलके चिरेण प्रकोपपात्रे मकरध्वजस्य ।
प्रकाशयन्तीव पतिव्रतात्वं पराङ्मुखी तत्र रतिर्बभूव ॥१०॥
उर्वीपतेः पार्वणचन्द्रवक्त्रा समुद्वहन्ती हृदये निवासम् ।
विकासदीक्षामपराङ्गनानां सरोजिनीनामिव संजहार ॥११॥
नितम्बबिम्बस्य नितम्बवत्याः प्रकामविस्तारवशादिवास्य ।
पृथ्वीपतेरुत्तमनायिकापि न कापि लेभे हृदयेवकाशम् ॥१२॥
नितान्तमेकान्तनिषेवणेन द्वेषेण चान्तःपुरसुन्दरीषु ।
प्रच्छादनार्थं विहितक्षणोपि क्षोणीपतिस्ताडितडिण्डिमोभूत् ॥१३

ताडीदले कर्णपरिच्युतेपि कन्दर्पलेखभ्रममाससाद ।
उत्तंसमागच्छति षट्पदेपि प्रत्याशया कर्णमदत्त देवः ॥१४॥
आकाशगर्भां गिरमाचकांक्ष विलोकयामास विलासभित्तीः ।
तदीयवार्त्ताश्रवणाभिलाषात्कुत्रार्थितां प्राप न पार्थिवेन्द्रः॥१५॥
सा कीदृशीति क्षितिवल्लभस्य कुतूहलेनोत्तरलीकृतस्य ।
आलिख्य चेतःफलके मनोभूर्दर्शयत्सायकतूलिकाभिः ॥ १६ ॥
प्रारम्भि रम्भाललितोरुकान्तेरुपायनीकृत्य मुखं प्रियायाः ।
सेवा सहेवाकविलोचनस्य पृथ्वीभुजंगस्य दिगङ्गनाभिः ॥१७॥
मौनग्रहे तस्य परिग्रहेण चित्रार्पितेनेव भियावतस्थे ।
लीलाशुकानामपि शङ्कितानां न निर्ययुः कण्ठतटाद्वचांसि॥१८॥
निरीक्षमाणः सरसोक्तिदक्षां दूतीमसौ वारपुरंध्रिमध्ये ।
मौखर्यचर्यामपि मेखलासु महान्तमुद्भावयतिस्म दोषम् ॥१९॥
अचिन्तनीयं तुहिनद्रवाणां श्रीखण्डवापीपयसामसाध्यम् ।
असूत्रयत्पत्रिषु पारसीकतैलाग्निमेतस्य परं मनोभूः ॥ २० ॥
श्रान्ते च निद्रालसलोचने च शून्ये च पञ्चेषुरिषून्विमुञ्चन् ।
न तत्र चित्रं गणयाम्बभूव क्षत्रव्रतस्य क्षतिमेकवीरः ॥ २१ ॥
सैका पताकां सुभगासु लेभे यया हृतः कुन्तलकामदेवः ।
आसीत्परं पञ्चशरः प्रतापी तस्यापि यस्तापयिता बभूव ॥२२॥
लग्नामिवाङ्के लिखितामिवाग्रे चक्रभ्रमेणेव परिभ्रमन्तीम् ।
क्षपासु लब्धक्षणमात्रनिद्रस्तामेव राजीवमुखीं ददर्श ॥२३॥
चन्द्रातपाच्चन्दनपङ्कवापीं ततस्तमस्मादपि तां जगाम ।
तस्येति बहुयः स्मरतापितस्य गतागतैरेव गतास्त्रियामाः॥२४॥
श्रोत्रामृतस्य स्फटिकप्रणालीं दिव्याम्बुधारां स्मरबाधकस्य ।
वार्त्तां गृहीत्वा हरिणेक्षणायाश्चरः क्षमाभर्तुरथाजगाम ॥२५॥
कथारसस्येव मुखस्थितस्य धाराः किरन्दन्तमयूखमञ्जुः ।
प्रहर्षविस्फारितवक्त्रकान्तिः स कुन्तलक्ष्मातिलकं बभाषे॥

अचन्द्रजा नेत्रचकोरवृत्तिरपुष्पनिर्माणमनङ्गशस्त्रम् ।
रागस्य लोकत्रयरञ्जनाय विद्येव विद्याधरराजकन्या ॥२७॥
अकृत्रिमाद्वा गुणपक्षपाताद्विधेः समायोगकुतूहलाद्वा ।
देव त्वदाकर्णनमात्रकेण सा त्वन्मयं पश्यति जीवलोकम्॥२८॥
अपारमापूरयता पृषत्कैस्तनिम्नि मग्नं वपुरुत्पलाक्ष्याः ।
लक्ष्येषु लब्धः कुसुमायुधेन बालाग्रसूक्ष्मेषु परः प्रकर्षः ॥२९॥
तथा गता चम्पकदामगौरी शरीरयष्टिः कृशतां कृशाङ्ग्याः ।
यथा गलच्चापमनोरथोऽस्यां मौर्वीलतास्थां मदनः करोति ॥३०॥
नूनं स्म...ः सौगतदर्शनोत्थं रहस्यमस्याः कथयाम्बभूव ।
त्वया विना व्यर्थमनोरथा यदात्मन्यवज्ञां प्रकटीकरोति॥३१॥
दूरं गता कार्मुककर्मवार्त्ता तस्यास्तनुं तन्तुकृशां वहन्त्याः।
नितान्तमप्राणतया मृगाक्षी शिञ्जापि जाता न मनोभवस्य।३२।
प्राप्ता तथा तानवमङ्गयष्टिस्त्वद्विप्रयोगेण कुरङ्गदृष्टेः ।
धत्ते गृहस्तम्भनिवर्तितेन कम्पं यथा श्वाससमीरणेन ॥३३॥
शीतांशुबिम्बप्रतिबिम्बभङ्ग्या कुरङ्गदृष्टेः कुचकुम्भपीठे ।
स्मरानलद्रावितहारदाममुक्ताफलानामिव पिण्डमासीत्॥३४॥
वातायनाद्गच्छति चित्रवेश्म तस्माद्वनान्तं वलभीं ततोऽपि ।
एकत्र न क्वापि पदं करोति सा मन्मथास्कन्दविशङ्कितेव॥३५॥
आज्ञापितः स्वप्नविधौ हरेण स्वयंवरोऽस्याः क्रियतां त्वयेति
तस्याः पिता कस्यचिदर्थिभावं न भूमिभर्तुः सफलं विधत्ते।।३६।
पिता तदीयस्त्वयि सान्द्ररागः किं प्रार्थनाभङ्गभयान्न वक्ति ।
भवादृशानां प्रणयं हि लब्ध्वा प्रयान्ति कन्याः कुलभूषणत्वम्।३७।
स्वयंवरस्यावसरोऽपि जातः प्रसीद भूपाल कुरु प्रयाणम् ।
असौ जयश्रीरिव ते द्वितीया सर्वान्विनिर्धूय वधूत्वमेतु ॥३८॥
श्रुत्वेति तुष्टः स जगाम तत्र तुरङ्गमैरेव जवोत्तरङ्गैः ।
स्वयंवरायातनरेन्द्रचक्रा सा यत्र पुष्पायुधराजधानी ॥३९॥

अमानिवाङ्क्षेषु मुदः प्रकर्षात्प्रत्युद्ययौ तं जनकः कुमार्याः ।
अनुष्ठितं सम्यगुपायवद्भिर्नीतः परिस्पन्दमिवार्थसार्थः ॥४०॥
निधानलाभादिव हर्षमाप स कुन्तलेन्दुप्रणयान्नरेन्द्रः ।
कन्यापितॄणां पदमुत्सवस्य न श्लाघ्यजामातृसमंसमस्ति॥४१॥
प्रणम्य तेनाथ निवेद्यमानमार्गः कृताशेषयथोचितेन ।
श्रीकुन्तलेन्द्रः प्रविवेश भूमिं स्वयंवरोत्कंठितराजचक्राम् ॥४२॥
स दुन्दुभीनां ध्वनिभिः सतूर्यैः प्रकाश्यमानाभिनवोत्सवायाम् ।
प्रविश्य तस्यां भुवि कौतुकेन कान्तासमन्वेषणतत्परोभूत्॥४३॥
सोपानपंक्तिं स विलङ्घ्य तत्र तरंगमालामिव राजहंसः ।
सौवर्णपद्मप्रभमारुरोह हेमासनं मन्मथशासनेन ॥ ४४ ॥
रराज भूपैः परिवारितोसौ शुभ्रे स्थितः सद्मनि कुन्तलेन्द्रः ।
यूथे प्रविष्टः करिपोतकानां दुग्धाब्धिमध्यस्थ इवामरेभः ॥४५॥
तस्मिन्प्रविष्टे नरनाथसिंहे कैलासशुभ्रं भवनाङ्गणं तत् ।
सा दुर्लभा चन्द्रमुखी नरेन्द्रैः सिंही कुरंगैरिव मन्यतेस्म ॥४६॥
वितानरत्नेषु च कुट्टिमे च बिम्बेन राज्ञां प्रतिबिम्बितेन ।
स्वयंवरोत्साहसभा बभासे संप्राप्तलोकत्रयकामुकेव ॥४७॥
मञ्चेषु रत्नांकुरदंतुरेषु भूषामणीनां च कदम्बकेषु ।
रूपप्रकर्षार्थिंथितया मुखानि प्रेक्षांबभूवुः शतशः क्षितीशाः ॥४८॥
मुक्तावितानेषु नरेश्वराणामतिष्ठदुच्चैः प्रतिबिम्बपङ्क्तिः ।
कस्यापि सज्जीकृतपुष्पवर्षा सौभाग्यसीम्नस्त्रिदशावलीव॥४९॥
मुक्ता फलस्रग्भिर वाप शोभां पतिंवरा विभ्रमवेदिका सा ।
चन्द्रो बहुस्त्रीक इति प्रवक्तुं भियेव ताराभिरुपास्यमाना॥५०॥
ये भूभुजः प्राज्यतरेण धाम्ना बभूवुरुद्द्योतितभाः सभायाम्
ते विक्रमक्ष्मापतिसंनिधाने प्रभातदीपप्रतिमामवापुः ॥५१॥
सुवर्णरेखारमणीयदेहा देवस्य रामा नयनायुधस्य ।
अनेकपृथ्वीपतिभाग्यहेमपरीक्षणार्थं कषपट्टिकेव ॥५२॥

मुखेन लज्जाभिनयप्रगल्भा लीलालवन्यञ्चितकंधरेण ।
प्रत्यादिशन्तीव दिवि स्फुरन्तमनेकदोषोपहतं मृगाङ्कम् ॥५३॥
एकां भ्रुवं विभ्रमराजधानीं सलीलमर्धोन्नमितां दधाना ।
प्रतारकस्याखिलपार्थिवानां संतर्जनायेव मनोभवस्य ॥५४॥
प्राणेशकण्ठप्रणयोद्यतायाः करस्थितायाः कुसुमस्रजोऽपि ।
ईर्ष्यावशेषादिव धारयन्ती साकूतवक्रेक्षणमाननेन्दुम् ॥५५॥
माणिक्यभित्तिप्रतिमानिभेन सौभाग्यहेतोर्विधृतेव दिग्भिः ।
मनोभवेनापि निजोत्पलाक्षीवैराग्यभाजेव निषेव्यमाणा ॥५६॥
निजत्विषा भूषणरत्नमालां समुल्लसन्त्या मलिनां विधाय ।
निवारयन्ती प्रतिबिम्बभङ्ग्याप्यङ्गेषु सामान्यनरेन्द्रसङ्गम् ॥५७॥
अंसस्थले हारलताञ्चलस्थविलोलनेत्रच्छटया सनाथा ।
त्रिलोककान्ताजनदर्पभङ्गप्रसूतया कीर्तिपताकयेव ॥ ५८ ॥
सहागतानीव जगन्मनांसि दाक्षिण्ययोगात्प्रतिपालयन्ती ।
कन्दर्पमत्तद्विरदेन्द्रभङ्ग्या विलम्ब्य किंचिद्ददती पदानि ॥५९॥
कर्पूरवल्लीदलवीटिकायां व्यापारितव्याकुलवामहस्ता ।
कपोलवल्गत्पुलकाङ्कुरश्रीर्विहस्य किञ्चित्परिभावयन्ती ॥६०॥
पदं प्रमोदालसराजहंसविलासिनीचङ्क्रमणक्रमेण ।
संक्रान्तरागेषु निवेशयन्ती नरेन्द्रचित्तेष्विव कुट्टिमेषु ॥६१॥
मनोभवज्यावलयानुकारिकर्णद्वयावासितनेत्रपत्त्रा ।
वेणीं स्फुरत्पुष्पशिलीमुखाढ्यां कन्दर्पभस्त्रामिव धारयन्ती ।६२।
विलोलचूर्णालकवल्लरीणां सङ्गैः स्पृशन्तीं कलिकानुकारम् ।
श्रीखण्डलेखामलिके वहन्ती भ्रूकार्मुके मन्मथकेतकास्त्रम् ॥६३॥
आविर्बभूवाथ पतिंवरा सा क्षौमाम्बरप्रस्फुरदुत्तरीया ।
मृगेक्षणा दुग्धपयोधिमुग्धतरंगलेखानुगतेव लक्ष्मीः ॥६४॥
हेमाद्रिमावर्ल्य कृतेव धात्रा विसारिभिर्या किरणैस्तदीयैः ।
सा सङ्कुला रङ्गतले नताङ्गी सर्वस्य लोभं शुभगा ततान ॥६५॥

विलोकयामास विलासपद्मं सगर्वमीषन्मुकुलायिताक्षी ।
दिक्पालहेतोरिव दूतकर्म दिगङ्गनानामवधारयन्ती ॥ ६६ ॥
स ताडितश्चेतसि मन्मथेन निःशङ्कमाक्रान्तशरासनेन ।
विलोक्य तां विभ्रमवैजयन्तीमचिन्तयत्कुन्तलचक्रवर्ती ॥६७॥
अनर्घ्यलावण्यनिधानभूमिर्न कस्य लोभं लटभा तनोति ।
अवैमि पुष्पायुधयामिकोऽस्यामविश्वसन्न क्षणमेति निद्राम्॥६८॥
इयं विलासद्रुमदोहदश्रीरियं सुधा यौवनदुग्धसिन्धोः ।
लावण्यमाणिक्यरुचिच्छटेयमियं मनःकार्मणचूर्णमुष्टिः ॥६९॥
सम्पूर्णचन्द्रोदयनित्यराका लीलारसानां परिपाकभूमिः ।
इयं मनोजन्मनराधिपस्य त्रैलोक्यसाम्राज्यफला तपःश्रीः॥७०॥
नीरन्ध्रविस्फूर्जदनङ्गगर्जिः पयोधरश्रीरियमेतदीया ।
विलासवैदूर्यनवांकुराणां प्रयाति नित्योद्गमकारणत्वम् ॥७१॥
कान्त्या दरिद्रत्वमुपैति चन्द्रः किमस्ति तत्त्वं विकचोत्पलेषु
न वेद्मि विश्वास्य कथं मृगाक्ष्या सौन्दर्यसृष्टिर्मुषिता विधातुः७२
इयं मयि न्यस्यति नेत्रमालां मुहुः सखीनां किमपि ब्रुवाणा ।
सत्यैव साभूदनुरागवार्ता चिरात्प्रसन्नो भगवाननङ्गः ॥ ७३ ॥
जघान पादेन सखीं सखेलमाकृष्य हारं मुहुरामुमोच ।
सा दर्शने कुन्तलपार्थिवस्य न कारिता किं मकरध्वजेन ॥७४॥
तदीयवक्त्रेन्दुविलोकनेन सान्द्रोल्लसद्रागपयोनिधीनाम् ।
तत्रागतानां पृथिवीपतीनामासन्विचित्राणि विचेष्टितानि ॥७५॥
उत्कृष्यमाणं निजहारदाम समस्तभूपालविभूषणेभ्यः ।
वक्षःस्थलेनोन्नमितेन दूरं कश्चिन्नरेन्द्रः प्रकटीचकार ॥७६॥
सावज्ञमुत्तार्य सुवर्णसूत्रं देहप्रभानिन्हुतशोभमेकः ।
मुक्ताकलापं हृदये बबन्ध पतिंवराप्राप्तिमनोरथं च ॥७७॥
चूडामणेः कोपि परिक्षयस्य स्थाने निवेशाय कृताभिलाषः ।
लीलासरोजं मुकुटे बबन्ध पुराङ्गनाभिः परिहास्यमानः ॥७८॥

मञ्चान्तरे संततमग्रपादं प्रसारयामास सगर्वमेकः ।
ह्रस्वासिधेनुश्रमसूचनार्थमान्दोलयामास च पाणियुग्मम् ॥७९॥
अनुद्गतस्वेदमपि क्षितीन्दुरुद्धूल्य कर्पूररजोभिरङ्गम् ।
कर्णद्वये कुण्डलयोश्चकार पृथैव कश्चित्परिवर्तनानि ॥ ८० ॥
जघान ताम्बूलकरङ्कवाहं करेण कूजद्वलयेन कश्चित् ।
लिलेख ताम्बूलदलं नखैश्च प्रतारितः पुष्पशरासनेन ॥८१॥
गोष्ठीमिषेण स्वयमेवमेव प्रकाशयन्वाचि पटुत्वमन्यः ।
आकृष्य ताम्बूलकरङ्कमध्यात्कर्पूरदानं विदधे बहुभ्यः ॥८२॥
हेमासनं वस्त्रनिवेशनेन तुङ्गत्वमानीय वृथा ववल्ग ।
नवीनतारुण्यनिवेदनार्थमजातकूर्चेन मुखेन कश्चित् ॥ ८३ ॥
निक्षिप्य ताम्बूलकरङ्कवाहपृष्ठे शरीरं सविलासमेकः ।
उदञ्चितभ्रूलतिकापताकमकारणादेव मुखं चकार ॥ ८४ ॥
जृम्भावशोत्तम्भितहस्तयुग्मसंघट्टलीलास्फुटदङ्गुलीकः ।
कश्चिन्निपत्योपरि विष्टरस्य दुर्वारकामग्रहमोहितोभूत् ॥८५॥
कण्ठस्फुरत्पञ्चमकाकलीकः कश्चिद्व्यलीकस्मितमाततान ।
संग्रथ्य कश्चित्कतिचित्पदानि गाथाकवित्वं कथयांबभूव॥८६॥
वैतालिकानां तुमुलं निवार्य ततः कुमार्याः सुकुमारकण्ठी ।
उदाजहार प्रतिहाररक्षी क्रमेण चक्रं पृथिवीपतीनाम् ॥८७॥
अर्धेषु यो मूर्धसु खण्डितेषु खड्गं कठोराहतिकुण्ठधारम् ।
श्रीकण्ठकेयूरभुजङ्गराजफणामणौ घर्षितुमाचकाङ्क्ष ॥ ८८ ॥
कृत्वा हठाद्वामकरे हराद्रिं कंडूलदोर्मण्डदुर्मदो यः ।
हिमालयोन्मूलनकौतुकेन भेजे भुजं दक्षिणमुत्तरंगम् ॥ ८९ ॥
लङ्कापतेस्तस्य मुखाम्बुजानि भोगास्पदं यस्य शिलीमुखानाम् ।
रामस्य तस्यैष कुले कुमारः कुमारि नेत्रप्रणयी तवास्तु॥९०॥
अनेन सार्धं सरयूवनान्ते कूजन्मयूरीमुखरे विहृत्य ।
विलासवातायनसेवनेन श्लाघ्यामयोध्यां नगरीं विधेहि ॥९१॥

तयोपदेशः स कृतः कुमार्यां वृथागमन्नीच इवोपकारः ।
प्रेमाणि जन्मान्तरसंचितानि प्रादुर्भवन्ति क्वचिदेवमेव ॥९२॥
प्रदर्शयामास ततः कुमार्यां क्षितीशमन्यं प्रतिहाररक्षी ।
चूतानुबन्धे मधुपाङ्गनाया मुग्धं मधुश्रीरिव कर्णिकारम् ॥९३॥
यस्याहवे साहसलाञ्छनस्य मौर्वीरवः प्राप्य बिलोदराणि ।
क्षणेन पातालतलस्थितानां शौण्डीर्यवार्तां कथयांबभूव ॥९४॥
सोयं रणे नर्तयिता कबन्धान्मदान्धभूपालसहस्रसैन्यः ।
विलोक्यतां सुन्दरि चेदिराजस्तवास्तु दृष्टिः स्मरवैजयन्ती॥९५॥
तयेत्थमुक्ता न परं कुमारी नालोकयामास विलासिनं तम् ।
ताम्बूलमुत्सृज्य मुखाम्बुजस्य निकारमार्गेण निराचकार ॥९६॥
अथान्यमुद्दिश्य नरेन्द्रपुत्रमुत्त्रस्तसारङ्गविलोलदृष्टिः ।
सांमुख्यमानीयत मानिनी सा वाक्यैरुदारैः प्रतिहाररक्ष्या॥९७
कन्ये समालोकय कान्यकुब्जमकुब्जकीर्तिं नरनाथमेनम् ।
ककुब्जये यस्य धरापरागैर्भवन्ति वारांनिधयः स्थलानि ।९८।
तस्मात्समाकृष्य नतानना सा दृष्टिं क्षिपन्ती कुचकुम्भपीठे ।
तस्याभ्यधत्त क्षितिवल्लभस्य स्थूलत्वमंगेष्विव भूषणस्य ॥९९॥
प्रलोभयन्ती गतिभिः समस्तान्सा राजहंसान्कलनूपुराभिः ।
किंचित्पुरश्च क्रमणप्रवृत्ता भूयस्तया सस्मितमभ्यधायि ॥१००॥
उत्कर्षरेखां दृढकीलितस्य यत्पत्त्रिणः पोत्रिणि शङ्कमानः ।
शीघ्रं हरः सूकरदेहरन्ध्राल्लीलाकिरातः शरमुच्चखान ॥ १०१ ॥
अशङ्कितः शङ्करमल्लयुद्धे यः स्वेदधाराम्बुनिवारणाय ।
भस्मोत्करं विस्मयघूर्णितस्य कक्षान्तरात्तस्य समाचकर्ष ॥१०२॥
पार्थस्य तस्यैष कुलेष प्रसूतः प्रभूतशौर्यो नृपतिः प्रतापी ।
एनं समालोकय रन्तुकामा चर्मण्वतीतीरवनस्थलेषु ॥१०३॥
क्षेमं तदीये शिरसीव पादं समुत्क्षिपन्तीं गमनार्थमग्रे ।
उद्दिश्य सा राजकुमारमन्यं कन्यां प्रगल्भा पुनराबभाषे ॥१०४॥

शृङ्गाणि नूनं मिलितानि यस्य स्वर्गप्रतोलीकपिशीर्षकाणाम् ।
अत्र स्थितानां कथमन्यथा द्यौः क्रीडागृहप्राङ्गणभङ्गिमेति ॥१०५॥
तस्यैव कालिञ्जरभूधरस्य श्रीनीलकण्ठस्य विलासधाम्नः ।
भर्ता भुजावर्तितराजचक्रः कटाक्षचक्रप्रणयी तवास्तु ॥ १०६ ॥
चेतस्यविद्धे कुसुमायुधेन मुक्ताफले तन्तुरिव प्रवेशम् ।
यतो न लेभे स नृपस्ततोऽस्याः साम्यं विदग्धा प्रकटीचकार ॥१०७
शौर्यप्रियेणाहवनिःस्पृहाणां येन प्रतिक्षोणिभृतां निवासाः । ॥
लीलाचपेटक्षतकुञ्जराणां पदे पदे केसरिणेव लब्धाः ॥१०८॥
गोपाचलक्ष्मापतिरेकवीरः स एष पृथ्व्यामवदातकीर्तिः
स्वयंवरस्रग्विनिवेशदूती तवात्र नेत्रोत्पलमालिकास्तु ॥१०९॥
सा प्रार्थितान्यार्थमनङ्गबाणैः कमप्यलब्ध्वा परिहारहेतुम् ।
पादेन वाचालितनूपुरेण जगाद मौखर्यमिवास्य दोषम् ॥११०॥
मध्येन येषां वसुधापतीनां जगाम सा कामवशीकृतानम् ।
स्वयंवरस्रग्रजसेव पूर्णास्तेषां दृशः साश्रुजला बभूवुः ॥१११॥
यद्वैरिभूपालविलासिनीनां कपोलपालीषु विपाण्डुरासु ।
भवन्ति लम्बालकवल्लरीभिः सशैवलानीव दृशोः पयांसि॥११२॥
यस्य प्रतापोऽग्निरपूर्व एव जागर्ति भूभृत्कटकस्थलीषु ।
यत्र प्रविष्टे रिपुपार्थिवानां तृणानि रोहन्ति गृहाङ्गणेषु ॥११३॥
स एष लीलावति मालवेन्द्रस्तवात्र मन्त्री कुसुमायुधोऽस्तु ।
लीलावनेस्ते विदधातु तोषममुष्य धारा कुलराजधानी ॥११४॥
निरादरां तत्र ततो वितर्क्य नासाग्रसंकोचितया दृशैव ।
गत्वा पुरः सा कतिचित्पदानि स्मृत्या हसन्तीमवदत्कुमारीम्॥११५
निशम्य तुक्खारखुरक्षतायाः क्षितेस्तनुत्वादिव यस्य कीर्तिम्
संभूय गायन्ति फणीन्द्रकन्याः संगीतशालासु भुजंगभर्तुः॥११६।
सोऽयं गुणग्राहिणि गुर्जरेन्दुः स्वबाहुवीर्यार्जितराजलोकः ।
अत्रास्तु दृष्टिस्तव नीरजाक्षि प्रसन्नपुष्पायुधपुष्पवृष्टिः ॥११७॥

लीलाम्बुजेन भ्रमरान्क्षिपन्ती तस्य प्रतिक्षेपमसौ चकार ।
उवाच चैनां पुरतः प्रविश्य किंचित्सगर्वा प्रतिहारगोप्त्री॥११८॥
श्रीखण्डचर्चापरिपाण्डुरोयं पाण्ड्यः प्रकामोन्नतचारुदेहः ।
क्षीरोदधिक्षीरपरिप्लुतस्य चातुर्यमाचामति मन्दराद्रेः ॥११९॥
अनेन मैत्रीं यदि मन्यते ते मनोभवस्तामरसायताक्षि ।
लीलावने चन्दनपादपानां श्रयन्तु नित्यं मलयानिलास्त्वाम्॥१२०
तत्रापि साभूद्गुणभाजनेपि पराङ्मुखी श्रीरिव भाग्यहीने ।
जगाद भूयः पटुवादिनी सा बालां प्रबालाधिकपाटलौष्ठीम् ॥१२१॥
लीलावगाहं जलधौ विधाय वेलावनान्तेषु विहारभाजाम् ।
दिग्वारणानामवतारतां ये करेणुकारोहणतः प्रयाताः ॥ १२२ ॥
ते जैत्रयात्रासु महाभटस्य यस्य स्फुटद्दानजलाः करीन्द्राः ।
दिग्दन्तिसंदर्शनवाञ्छयेव भ्रमन्ति सर्वाणि दिगन्तराणि॥१२३॥
रत्नोत्करैः संततमर्थिसार्थं यं पूरयन्तं प्रतिषेधतीव ।
जलद्विपानां मदडिण्डिमत्वं गतेन मन्द्रध्वनिना पयोधिः॥१२४॥
क्षितौ नमन्त्यां पृतनाभरेण यः प्रोच्छलद्वीचिपरंपरस्य ।
शैलानुकारैः करिभिस्तटस्थैर्बध्नाति पालीमिव दक्षिणाब्धेः।१२५।
वमन्ति पीतं सममब्धितोयैर्यस्योच्छलच्छीकरडम्बरेण ।
पदाहतित्रुट्यदरिक्तशुक्तिमुक्ताफलस्योदमिव द्विपेन्द्राः ॥१२६॥
यान्तीषु यद्द्वारि विलासिनीषु करेणुभिः पूरितदिक्तटीभिः ।
दिनेपि दिक्पालपुरीगवाक्षाः प्रक्षालनं चन्द्रिकया लभन्ते॥१२७॥
स एष चौलश्चपलाक्षि राजा जयोत्सवैर्यस्य दिशां मुखानि ।
स्फूर्जद्यशःपुञ्जतया स्थितानि मङ्गल्यशङ्खानिव पूरयन्ति।१२८।
विलासविद्याधरराजहंसं कुरुष्व दोःपञ्जरबद्धमेनम् ।
वातायनैः केलिविमानकल्पैस्तवास्तु काञ्ची नयनोत्सवाय॥१२९॥
तमित्थमन्यत्र कृताग्रहा सा विलङ्घ्य चालुक्यनृपोन्मुखाभूत् ।
उत्तालवेलापरिवर्तितापि तरंगिणी नोज्झति पूर्वमार्गम्॥१३०॥

चालुक्यपृथ्वीपतिकृष्यभाग्वं नितान्तदीर्घे नयनाञ्चलेस्याः ।
निर्वापिताशाः पृथुदीपवर्तिधूमैरिवान्ये मलिना बभूवुः ॥१३१॥
तत्र क्षणे कोपि जगाद राजा पराङ्मुखोस्यां प्रियजानिरस्मि ।
कश्चिद्विनोदाद्विटपार्थिवानां विलोकनायागमनं शशंस ॥१३२॥
त्वयाहमानीय विडम्बितोत्र मिथ्येति कश्चित्सचिवं निनिन्द
वज्राहतानामिव भूपतीनां ययुः परेषां नतिमाननानि ॥१३३॥
दृष्टिः समन्तात्क्षितिपालचक्राच्चालुक्यसिंहासनमण्डनं तम् ।
विविच्य जग्राह कुरङ्गकाक्ष्याः क्षीरं जलौघादिव राजहंसी॥१३४॥
अथ प्रतीहारधुरंधरा सा जगाद तां दन्तरुचिप्रवाहैः ।
अन्यक्षमापालविलोकनोत्थं प्रक्षालयन्तीव कलङ्कमस्याः॥१३५॥
जानाति राजीवमुखि ग्रहीतुं दृष्टिस्त्वदीया कमनीयमर्थम् ।
सा शैवलानीव विलङ्घ्य सर्वान्भृङ्गीव लग्ना मुखपङ्कजेस्य ॥१३६॥
अनन्यसामान्यममुष्य रूपं किमुच्यते दृष्टमिदं त्वयापि ।
वदामि सौभाग्यगुणं किमस्य यत्र स्थिते श्रीश्च सरस्वतीच ॥१३७॥
सङ्गादजस्रं मदवारणानां सावज्ञमालोकितदिग्द्विपेन्द्राः ।
अमुष्य वाहाः सततं जिगीषोः क्षणेन गर्भे ककुभां भ्रमन्ति॥१३८
एकत्र भारेण धरा नमन्ती न मस्तके तिष्ठति भोगिभर्तुः ।
इतीव सर्वास्वपि दिक्षु कीर्णमनेन सेनागजचक्रवालम् ॥१३९॥
भुजंगमाधीशशिरोधृतस्य दाढ्यं धरित्रीफलकस्य कर्तुम् ।
क्षिप्ता जयस्तम्भमिषादनेन समन्ततः कीलकमालिकेव ॥१४०॥
राज्ञां शिखारत्नपरंपराभिः प्रोताभिरस्योभयतः कृपाणः ।
शेषारिकंठास्थिविघट्टनेषु जातः क्षणं सम्प्रति कुण्ठधारः ॥१४१
सोमेश्वरश्चोलमहीपतिश्च जयोत्सवद्वारि बलाद्विशन्तौ ।
द्रावण्यनेनाद्भुतसाहसेन द्वाभ्यां भुजाभ्यां बलिना निरस्तौ॥१४२॥
अस्याद्भुतत्यागनिधेः पुरस्तात्कल्पद्रुमाद्याः परमाणुकल्पाः ।
समत्वमेतेन कथं लभन्ते जगत्त्रयीगौरवभाजनेन ॥ १४३ ॥

मुञ्जस्य गुञ्जासमतापि नास्ति का योग्यता भोजमहीभुजश्च
लब्धे कवीन्द्रैः कविबान्धवेस्मिन्दासीकृता पादतलेषु लक्ष्मीः॥१४४॥
विहाय वक्त्राणि मृगेक्षणानां सविभ्रमभ्रूयुगताण्डवानि ।
अस्यान्यतः साहसलाञ्छनस्य न भीतिमुद्रानुकुलं मनोभूत्॥१४५॥
निवेश्यतां किंनरकण्ठि कण्ठे मालास्य दोर्बन्धविकासदूती ।
कीर्तिर्विधेरस्तु समानयोगात्कामस्य कामं फलतु प्रयासः॥१४६॥
लज्जानिरासे निभमात्रकेण वाक्येन तेन प्रतिहाररक्ष्याः ।
पतिंवरा संवरणस्रजं तां श्रीविक्रमाङ्कस्य चकार कण्ठे ॥१४७॥
तया स्रजा कण्ठनिवेशभाजा मत्तालिमालाकलझांकृतेन ।
अवाद्यतेवाखिलभूमिपालसौभाग्यलीलाजयडिण्डिमोस्य ॥१४८॥
तद्बाहुलेखे कुसुमस्रजोपि सौभाग्यशोभान्वयमन्वभूताम् ।
कण्ठस्थितायामपि येन तस्यां देवस्तदालिङ्गनसत्वरोभूत ॥१४९॥

जयति कुसुमकेतोश्चापविद्यारहस्यं
विधिरुचितविधायी सांप्रतं वन्दनीयः ।
उदचरदिति वाणी तत्र पौरांगनाना-
मिह हि सदृशयोगः कस्य न प्रीतिहेतुः ॥१५०॥

अथ मृदुलमृदंगध्वानमारुह्य वध्वा
सह परिणययोग्यं मण्डपं पाण्डुकीर्तिः ।
निखिलनृपतिलक्ष्म्या रागसंक्रान्तयेव
॥ द्युतिमधिकमुदारां कुन्तलेन्दुर्बभार ॥ १५१ ॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते नवमः सर्गः ॥ ९ ॥

यातेऽथ देवस्य तथा विवाहमहोत्सवे साहसलाञ्छनस्य ।
कृतार्थया पार्थिवकन्ययेव कीर्त्याप्यकुप्यन्त नृपाः समस्ताः॥१॥
आशाप्रदीपेषु गतेषु शान्तिमशेषसौभाग्यगुणान्वयेन ।
तदीयधूमैरिव धूसरांगाः क्षोणीभुजः श्यामलिमानमापुः ॥२॥
क्रमक्रमं कर्तुमभूदपेक्षा त्रैलक्यभाजां न महीपतीनाम् ।
श्रीविक्रमांकस्य न कङ्कपत्रास्ते किन्तु सद्यः समरांगणेषु ॥३॥
यथागतेनैव पथा गतेषु भूपेष्वथ म्लानमनोरथेषु ।
रेमे तया भूमिपतिः श्रियेव दैत्यप्रमाथार्जितया मुरारिः ॥४॥
सा संनतांगी शनकैः प्रियस्य तथा गुणैर्मानसमारुरोह ।
तदेकवश्यं स्मरशासनेन यथा तदन्याभिरहार्यमासीत् ॥५॥
श्रीकुन्तलक्षोणिपतेस्तदीये वक्त्रेन्दुबिम्बे हृदयं प्रविष्टे ।
अन्यांगनानां मुखपंकजानि संकोचभीत्येव बहिर्बभूवुः ॥६॥
सा तत्र शीघ्रं विविधोपचारप्रौढे नवोढाव्रतमुत्ससर्ज ।
अकौशलं पत्युरिदं चिरेण विश्वासमायाति नवा वधूर्यत्॥७॥
शस्त्राधिकारी मकरध्वजस्य कण्ठेषु सौभाग्यगुरुः पिकानाम्
वैशद्यसंजीवनमिन्दुभासां साम्राज्यमन्त्री रसपार्थिवस्य ॥८॥
उच्चित्रणे चित्रकरस्तरूणां मानद्रुमोन्मूलनमत्तदन्ती ।
तस्य प्रभावादथ तत्र भर्तुश्चैत्रः पुनर्नूतनतां प्रपेदे ॥ ९ ॥
जगज्जयार्थं स्मरपार्थिवेन नीतश्च सूनायकतां वसन्तः ॥
वातोच्छलच्चम्पकचक्रभंग्या त्यागीव हेमप्रकरैर्ववर्ष ॥ १० ॥
किंजल्कपुञ्जैः परिपिञ्जरासु दिक्षु प्रसूनप्रसरप्रसूनैः ।
दिवापि जाम्बूनदभूषणानां लीलाभिसारः सुदृशां बभूव ॥११॥
मग्नं मधुस्रोतसि कर्दमाभे पदं समुद्धर्तुमपारयन्ती ।
अजस्रमाक्रन्दनिभैर्विरावैर्मधुव्रती षट्पदमाजुहाव ॥ १२ ॥
निरुध्य रन्ध्रं मधुपूरितस्य पुष्पस्य लोभाद्भ्रमरो वतस्थे ।
अन्येन मार्गेण पपुस्तदन्ये लब्धार्जनानामयमेव मार्गः॥१३॥

श्रीखण्डसंसंगिभुजंगराजविषोष्मणा क्लान्तिमिव प्रपद्य ।
दरीमुखैर्निःश्वसितुं प्रभूतैः दाक्षात्प्रवृत्तो मलयानलेन्द्रः ॥१४॥
सर्वं दिनं भृमिगृहेष्वलिष्ठद्द्वार्धिर्यथोगं मुहुरावकांक्ष ।
पिकांगनाऽस्त्रमपीड्यमानश्चकार किंकिं न वियोगिवर्गः॥१५॥
अहो मतिभ्रंशमनंगबन्धुश्चकार चैत्रः पथिकाङ्गनानाम् ।
चक्रुर्यदाक्रन्दपरंपराभिः सवर्धनं कोकिलकूजितानाम् ॥१६॥
कामस्य कश्चिच्चतुरः शरांश्चेद्विलङ्घयामास कथंचिदन्यान् ।
उन्मज्जता कोकिलकण्ठयन्त्रात्स पञ्चमास्त्रेण वशीबभूव॥१७॥
अथ श्रमं स्निग्धविलोकनेन चैत्रस्य कुर्वन्सफलं नरेन्द्रः ।
विवेश देव्याः परिगृह्य पाणिं चित्रासु लीलोपवनस्थलीषु॥१८॥
इतस्ततः सस्पृहमीक्षमाणो मृगेक्षणां तामथ कुन्तलेन्दुः ।
जगाद कन्दर्पधनुर्निनादप्रतिस्वनभ्रान्तिकृता स्वरेण ॥ १९ ॥
सुगात्रि कच्चित्तव नेत्रमैत्रीं चैत्रः प्रसूते रतिजन्मभूमिः ।
यस्य श्रिया त्वद्वपुषश्च लक्ष्म्या माद्यन्न किंचिद्गणयत्यनंगः॥२०॥
अधिष्ठिता मन्मथपार्थिवेन द्रष्टुं मुदा चैत्रचमूसमूहम् ।
आलोकनेन क्रियतां कृतार्था बाले विलासोपवनस्थलीयम्॥२१॥
कन्दर्पलीलाजयराजधानि मधुव्रतानां मधुरैर्विरावैः ।
आभाषते संमुखमागतायाः पूर्वाभिभाषीव तवैष चैत्रः ॥२२॥
लास्यं त्वयि प्रेक्षितुमागतायां लतापुरंध्र्यः कुसुमैः पतद्भिः ।
मृगाक्षि लीलावनरंगपीठे पुष्पाञ्जलिक्षेपमिवोद्वहन्ति ॥२३॥
अशोकशाखी निखिलद्रुमेषु धन्यस्त्वया पादतलाहतोयम् ।
तेषां प्रसन्नो हि विलासबाणः क्रीडन्ति दासैरिव यैर्मृगाक्ष्यः॥२४॥
अरोचकी पादपजातिमध्ये जाने जितान्तम् बकुलद्रुमोयम् ।
चैत्रेपि यः पुष्पविकासहेतोर्गण्डूषमाकाङ्क्षति ते मृगाक्षि॥२५॥
एकत्र तस्मिन्मदने सकोपं देवेन दग्धे पुरसूदनेन ।
इयं मधुश्रीस्त्वमिवोद्धिकासान्मुहुः सहस्रं मदनान्विधत्ते॥२६॥

तवाङ्कुरश्रीकुसुमैर्विलासैर्वैरिं कामो छिद्यमानैः ।
वैरार्पितं नूतनमस्त्रजातं संधातुकामोपि न संदधाति ॥२७॥
गुणं दधाने मधुनार्प्यमाणं मनस्विनां मानसभेददक्षे ।
शिलीमुखश्रेणिरुपैति सङ्गं पुष्पे च कन्दर्पशरासने च ॥ २८ ॥
पुंस्कोकिलस्ते मधुमासलक्ष्म्या गान्धर्वसर्वस्वविशारदायाः ।
प्रकाशितुं शिष्य इवैष पश्य रागं मुहुः पञ्चममातनोति ॥ २९ ॥
मधुश्रिया चन्द्रमुखि त्वदर्थं समाहृतामेति विलासचापः ।
आभूतजन्मस्तु समागमस्त्वाः पुष्पाङ्कुरेणं भवती करोति ॥ ३० ॥
कृत्वेति सूक्तैः सरसैः प्रियायाः कर्णावतंसं पुनरुक्तकल्पम् ।
आरोपयामास विलासदोलां लीलावतीं कुन्तलचक्रवर्ती ॥३१॥
दोलाविलोलालकमुद्विलासभ्रूवल्लिविभ्रान्तविलोचनाञ्जम् ।
उत्कीर्य कामः शरटङ्किकाभिस्तद्वक्त्रमेतस्य हृदि न्यधत्त ॥ ३२ ॥
गीतं स्फुरत्पञ्चममञ्जितभ्रु विलोकितं नूपुरनिस्वनश्च ।
नृपाङ्गनायास्त्रयमेतदासीत् त्रैलोक्यराज्ये मदनस्य शस्त्रम् ॥३३॥
नितम्बबिम्बातिभरेण दोला यथायथा तारतरं चुकूच ।
असक्तिज्यानिनदः क्षितीन्दुं तथातथा पुष्पधनुर्बिभेद ॥ ३४ ॥
आन्दोलयामास विलासदोलां स वल्लभायाः पृथिवीभुजंगः ।
भङ्गं समग्रस्य वधूजनस्य जग्राह सौभाग्यगुणप्रपञ्चः ॥ ३५ ॥
समुद्वहन्त्योस्तदपायलग्नीदोलाविलोलाननमार्गसख्यम् ।
दृशोः क्षितीन्द्रस्य गतागताभ्यां गव्यूतिमात्रं भ्रमणं बभूव ॥३६॥
अथावतीर्य क्षणमात्रमङ्के प्रियस्य विश्रम्य गतश्रमा सा ।
वसन्तलक्ष्म्या परिलोभ्यमाना चचाल पुष्पावचयाय देवी ॥३७॥
भ्रूसंज्ञया कुन्तलभूमिभर्तुरन्तःपुरं सर्वमपि क्रमेण ।
चक्राम पुष्पोच्चयबद्धहर्षमुत्साहसीमा हि पतिप्रसादः ॥ ३८ ॥
असंख्यपुष्पोपि मनोभवस्य पञ्चैव बाणार्थमयं ददाति ।
एवं कदर्यत्वमिवावधार्य सर्वस्वमग्राहि मधोर्वधूभिः ॥ ३९ ॥

आरोहति क्षोणिपतेः कलत्रे शिरस्थपुष्पोच्चयकौतुकेन ।
प्रभ्रंशमाशङ्क्य नितम्बभाराद्भियेव लीलावकुलश्चकम्पे ॥ ४० ॥
आनम्यमाना लतिका रजोभिः पौष्पैर्दृशौ पूरयति स्म देव्याः ।
अन्या नृपालिङ्गनमाससाद भाग्येषु नास्ति स्खलितेऽपमार्गः ॥४१॥
अताडयत्पल्लवपाणिनैकां पुष्पोच्चये राजवधूमशोकः ।
तच्छेदहेतोरलिपङ्क्तिभङ्ग्या व्याकृष्यतेवासिलतास्मरेण ॥४२॥
आरोप्यमाणा दयितेन काचिन्नितम्बभारात्स्वयमप्रगल्भा ।
स्कन्धात्तरोः प्रत्युत मूलमाप खिन्नेन पातात्कुसुमद्रुमेण ॥ ४३ ॥
आरुह्य कान्तासु विधुन्वतीषु संभाव्य भङ्गं जघनातिभारैः ।
लघुत्वहेतोरिव पुष्पभारं द्रुमास्त्यजन्ति स्म निजोन्नमाङ्गात् ॥४४॥
केलिद्रुमाः क्ष्मातलमागतासु संगृह्य पुष्पाणि नितम्बिनीषु ।
भारान्न भङ्गः समजायतेति गर्वादिवोच्चैःशिरसो बभूवुः ॥४५॥
स्वेदाम्भसा पुष्परजोभरैश्च सर्वत्र पङ्के विहिते वधूनाम् ।
चक्रे निवासं कठिनोन्नतेषु तासां मनोभूः स्तनमण्डलेषु ॥४६॥
नाभीह्रदेषु स्थलतां गतेषु लताच्युतैः पुष्पपरागपुञ्जैः ।
मध्यप्रदेशः सुदृशां स्मरस्य लीलागतिप्राङ्गणतां जगाम ॥ ४७ ॥
प्रवर्तमानासु नृपाङ्गनासु तत्र गृहीतुं कुसुमानि तासु ।
कृतो महांस्तन्मधुजीविनीभिः कोलाहलः षट्चरणावलीभिः ॥४८॥
विधाय काचिन्नयने सपत्न्याः क्रीडाच्छलात्पुष्पपरागपूर्णे ।
पात्रत्वमाप प्रियचुम्बनस्य किमस्ति वैदग्ध्यवतामसाध्यम् ॥४९॥
मानप्रिया कापि नृपस्य पत्नी स्पृष्टा न पुष्पोच्चयवाञ्छयापि ।
अनेकनारीजनबाहुमूलनखक्षतावेक्षणतत्पराभूत् ॥ ५० ॥
कस्याश्चिदूर्ध्वं नयनाय शाखामाक्रम्य यामर्पयतिस्म देवः ।
सा तन्नितम्बस्य भरेण भग्ना समं मनोभिः प्रतिकामिनीनाम् ॥५१॥
नृपेण काचिद्विहितावतंसा तृणाय नामन्यत काञ्चिदन्याम् ।
स्त्रीणां हि सौभाग्यमदप्रसूतिः प्रियप्रसादो मदिरासहस्रम् ॥५२॥

पौष्पे रजस्युच्छलिते समन्तात्समस्तनेत्रप्रतिबन्धहेतौ ।
आश्चर्यमङ्गेषु नृपाङ्गनानाममोघबाणः कुसुमायुधोभूत् ॥ ५३ ॥
कृष्टांशुका कापि नरेन्द्रवामा लतानिकुञ्जात्कपिना सकोपम् ।
धूर्तापलाप्य प्रियमालिलिङ्ग क्षोपं नचाप प्रतिसुन्दरीभ्यः ॥५४॥
श्रोणीभरस्यातितरां गरिम्णा भङ्क्त्वा लतां कापि कुरङ्गकाक्षी ।
नरेश्वरस्योपरि निःस्वपात पीडामवापुः प्रतियोषितस्तु ॥५५॥
बबन्ध धम्मिल्लमथोरुदृष्टेः क्ष्मामायकश्चम्पकमालिकाभिः ।
चित्तेषु मन्युः स्थिरतामवाप विपक्षसारङ्गविलोचनानाम् ॥५६॥
विरेजिरे कुन्तलराजदाराः प्रसूनरेणूत्करवर्णिकाभिः ।
निजेषु दोर्विभ्रमनाटकेषु कामेन नीता इव नर्तकीत्वम् ॥५७॥
प्रसूनभाराभरणा विरेजुश्चालुक्यभर्तुर्लटभाङ्गनास्ताः ।
प्राचुर्यतः पुष्पशिलीमुखानां कृतास्त्रवर्षा इव मन्मथेन ॥ ५८ ॥
पृष्ठानुलग्नाः क्षितिपाङ्गनानां न्यवेदयन्षट्चरणाः क्षणान्तः ।
पुष्पापहारोत्थमिवापराधं शृङ्गारिणीगोत्रगुरोः स्मरस्य ॥५९॥
विलासिनीनां कुसुमोत्थरेणुकरम्बितस्वेदजलप्लुतानाम् ।
स्मरोष्मणा हेममयं शरीरं किंचिद्द्रवीभूतमिवावभासे ॥६०॥
काचित्क्षिपन्ती मधुपं विशन्तमितस्ततः पाणिसरोरुहेण ।
बाल्ये कृतं कन्दुकताडनेषु श्रमं मृगाक्षी बहु मन्यते स्म ॥६१॥
क्षिप्तो मुखात्षट्चरणस्तरुण्या विवेश हस्ताम्बुजकोशमस्याः ।
तस्माद्विधूतो मुखमाजगाम लज्जा कुतः स्वार्थपरायणानाम् ॥६२॥
आहूयमाना इव हंसनादैर्विकृष्यमाणा इव कौतुकेन ।
जग्मुस्ततः क्लान्तिनिवारणाय लीलासरस्तीरमरालनेत्राः ॥६३॥
जानासि भारं कुचनिर्मितं चेत्किं लाघवं मध्यकृतं न वेत्सि ।
इतीव तासां चरणाम्बुजानि मञ्जीरनादैरवदन्धरित्रीम् ॥६४॥
न राजकान्ताभिरदृश्यतोर्वी स्तनद्वयेनाधिकमुन्नतेन ।
हंसास्तुलाकोटिनिनादकृष्टाः पुरयैः पदन्यासपदं न जातः ॥६५॥

प्रारेभिरे वीजनमंशुकान्तैर्वनस्थले तज्जघनस्थलानि ।
पादेषु पीडाकरमङ्गनानां पथः श्रथीकर्तुमिवार्कतापम् ॥६६॥
अश्वद्विलासव्यजनानुकारिकर्णावतंसार्पितपल्लवानाम् ।
न स्वेदवारि क्षितिपाङ्गनानां गण्डस्थलीषु स्थितिमाससाद॥६७॥
मुखाग्रचुम्बीनि नितम्बिनीनां तासां विरेजुः कुचमण्डलानि ।
श्रमाम्बुशान्त्यै हिमशीतलानां श्वासानिलानामिव सेवनाय ६८
हंसाः खमुड्डीय गताश्चुलुक्यभूपालकान्तागतिचौर्यभाजः ।
तदादिपुंसः श्रयितुं भयेन विमानहंसानिव पद्मयोनेः ॥६९॥
क्रीडासरस्तामरसावतंसमुद्वेलहेलाञ्चितपादचारः ।
विवेश ताभिः सह भूमिपालः करेणुभिः सार्धमिव द्विपेन्द्रः ॥७०॥
दत्तं सरोभ्यः फलमम्बुजानां सङ्गेन कान्तामुखतस्कराणाम् ।
एषामकृष्यन्त नृपाङ्गनाभिर्विलोचनानीव यदुत्पलानि ॥७१॥
विपर्ययस्तत्र बभूव कान्ताबिम्बौष्ठरागाञ्जनपुञ्जसङ्गात् ।
रक्ताम्बुजत्वं दधुरुत्पलानि पद्मानि नीलोत्पलतामवापुः ॥७२॥
विलासयुद्धेन नितम्बिनीनां सर्वाण्यभज्यन्त सरोरुहाणि ।
प्रागेव पृथ्वीतिलके निषण्णा लक्ष्मीश्चिराद्बुद्धिमती बभूव ॥७३॥
विधाय भूपालपुरन्ध्रिपादप्रक्षालनं वीचिकरैः सरस्या ।
समुच्छलच्छीकरविभ्रमेण तदङ्घ्रिपानीयमवन्द्यतेव ॥७४॥
किमप्यवज्ञातसरोरुहेभ्यः सरस्तदासां पदपल्लवेभ्यः ।
परीक्षणायेव निसर्गकान्तेरलक्तकं वीचिभिराचकर्ष ॥७५॥
सरःप्रवेशे नृपसुन्दरीणां पादेषु संरब्धशिलीमुखेषु ।
प्रागेव भिन्नः श्रमवारिलेशैरलक्तकः पादतलं मुमोच ॥७६॥
पद्मप्रभाहारिहिमैकधाम्नस्तुषारशैलादिदमाजगाम ।
चिक्षेप साक्षेपमितीव तासां पद्माकरः कुङ्कुममङ्गकेभ्यः ॥७७॥
मग्ना गभीरे पयसि प्रमादात्प्रविश्य दैवेन विकृष्यमाणा ।
ससंभ्रमाभिः प्रतिकामिनीभिर्विलोकिता काचिदसूयिता च ॥७८॥

आकृष्य लक्ष्मीं भ्रुवमुद्रसत्वं पद्मान्यनीयन्त मुखैस्तदीयैः ।
धूलीभृतानां वसतित्वमापुर्यदध्वगानामिव षट्पदानाम् ॥७९॥

स्फुरत्प्रभाणां नृपवल्लभानां तासां पुरस्तात्सरसीरुहेषु ।
भृङ्गप्रपामण्डपसंनिभेषु रेजे प्रपापालिकयेव लक्ष्म्या ॥८०॥

सरःप्रविष्टेषु नितम्बिनीनां नितम्बबिम्बेषु शिलाघनेषु ।
तदीयलावण्यरसप्रवाहसङ्गादिवोत्तुङ्गतरङ्गमासीत् ॥८१॥

चालुक्यविद्याधरसुन्दरीणां कुचाग्रेषु अङ्कोन्दुपरम्परासु ।
निद्रादरिद्रेष्वपि पङ्कजेषु सङ्कोचभीत्या विविशुर्न भृङ्गाः ॥८२॥

लक्ष्म्याः समाधातपुरन्ध्रिवर्गनिसर्गसौन्दर्यतिरस्कृतायाः ।
श्वासैरिव प्रेङ्खितमुल्ललास परागचक्रं कमलोदरेभ्यः ॥८३॥

स्तनद्वये निर्जितकुम्भिकुम्भे नृपावकीर्णा करयन्त्रधारा ।
चारुभ्रुवः पञ्चशरप्रमुक्तनिशातनाराचतुलामधत्त ॥८४॥

पानीयधारा नरनाथमुक्ता वामभ्रुवो वक्रितकंधरायाः ।
चूर्णं गताः कुण्डलरत्नकोटौ तत्रैव मुक्ताफलकान्तिमापुः ॥८५॥

नरेन्द्रलीला करयन्त्रवारि लुलोठ देव्याः कुचकुम्भपीठे ।
आश्चर्यमस्याः प्रतिवल्लभानामुत्पल्लवा मन्युलता बभूव ॥८६॥

इत्युत्सवं भूतिलकोऽनुभूय लीलावगाहग्रहमुत्ससर्ज ।
निसर्गरम्येऽपि विचेष्टिते यदतिप्रसङ्गो रसभङ्गहेतुः ॥८७॥

अनञ्जनश्यामललोचनानामकुङ्कुमालेपनपिञ्जराणाम् ।
स्नानावसाने नलिनोदरीणामकृत्रिमं मण्डनमाविरासीत् ॥८८॥

सरः सनाथानि दधत्पयांसि पयोधरालेपनचन्दनेन ।
तत्तत्क्षणाद्बालमृगेक्षणानां दधे वियोगादिव पाण्डिमानम् ॥८९॥

अथांशुकानां परिवर्तनेन तासां वपुर्मण्डनकर्मणा च ।
निक्षिप्य पञ्चेषुरकुण्ठभावं देवे पुनः कार्मुकमाचकर्ष ॥९०॥

शोभन्तेस्म विलासकुन्तललताः पुष्पैरिवाम्भःकणै-
र्जाता मज्जनशीतला कुचतटी कन्दर्पधारागृहम् ।
आसीत्किंच नराधिपप्रणयिनी वर्गस्य नैसर्गिक-
च्छायाखण्डनमण्डनव्यपगमाद्गात्रेषु चित्रा लिपिः ॥९१॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते दशमः सर्गः ॥ १० ॥

स्नानशेषघुसृणारुणभासां स्पर्शनादिव नरेन्द्रवधूनाम् ।
प्राप रश्मिपटली दिनभर्तुः पाटलत्वमथ संघटमाना ॥१॥
कण्टकैरिव विदारितपादः पद्मिनीपरिचितैरपराह्णैः ।
आरुरोह सरसीरुहबन्धुः स्कन्धमम्बुधितटागमनाय ॥२॥
मज्जतः पयसि पश्चिमसिन्धोः स्निग्धमम्बरतलं परिरभ्य ।
भास्वतस्तुषवियुक्तमसूरक्षोदपाटलमलक्ष्यत धाम ॥३॥
प्रार्थनार्थमिव रत्नरुचीनां भानुरब्धिमगमद्गतकान्तिः ।
सत्वमुन्नतपदात्पतितानां विद्यते न महतामपि नूनम् ॥४॥
चञ्चुसंपुटगृहीतमृणालीग्रन्थिसूत्रनिवहेन रथाङ्गः ।
विप्रयोगभयतो दयितायाः कण्ठपाशमिव कर्तुमियेष ॥५॥
क्रन्दतिस्म न विवेद मृणालीं चञ्चुसंपुटगतां लुठति स्म ।
वल्लभाविरहहालहलेन व्याकुलः किमकरोन्न रथाङ्गः ॥६॥
दीर्घपादपशिखासु गिरीणां मस्तकेषु शिखरेषु गृहाणाम् ।
दग्धकालवशतः शतखण्डं धाम चण्डकिरणस्य बभूव ॥७॥
वासवस्तुरगरत्नममुष्मात्प्राप दास्यति ममापि कदाचित् ।
आशयेति जलराशिमयासीद्भानुरश्वपरिवर्तधियेव ॥८॥
भानुमानपरदिग्वनितायाश्चुम्बतिस्म मुखमुद्गतरागः ।
पद्मिनी किमु करोतु वराकी मीलिताम्बुरुहनेत्रपुटाभूत् ॥९॥
वाजिनां गगनलङ्घनखेदच्छेदनाय मदिरामिव दातुम् ।
कामुकः कमलिनीवनितानां वारुणीप्रभवमब्धिमयासीत् ॥१०॥
सेवते स्म जलधौ प्रतिबिम्बं बिम्बपाटलमशीतमरीचेः ।
शेषकेलिशयनस्थितलक्ष्मीवल्लभाभरणकौस्तुभलीलाम् ॥११॥
वाजिनामविशतां जलराशौ वारिवारणभयाद्दिनभर्ता ।
दातुमीक्षणपुटेष्विव मुद्रां द्राङ्गिजातपपटं विचकर्ष ॥ १२ ॥
भास्वति त्रिभुवनाङ्गणदीपे वेधसा प्रशमिते मरुतेव ।
धूमराशिरिव तत्प्रशमोत्था ध्वान्तसन्ततिरलक्ष्यत नीला ॥१३॥

रत्नराजिनिकरप्रकरेण प्रार्थ्यमाण इव दीपकशङ्काम् ।
अम्बरादथ पपात पतङ्गस्तैलपात्रसदृशे जलराशौ ॥१४॥
भानुवाहनखुरप्रहतानां वारिराशितटशुक्तिपुटानाम् ।
मौक्तिकैरिव कियद्भिरपि द्यौस्तारकैस्तिलकिता विरराज॥१५
पद्मकोटरकुटीरकबन्धत्रासविद्रुतमधुव्रतनीलम् ।
ध्वान्तमङ्कुशविहीनममाङ्क्षीद्व्योमसीमनिगतिं नयनानाम्१६
नीलरत्नघटितेव समन्तात्पीडितेव निविडाञ्जनपुञ्जैः ।
प्लावितेव जलराशितरङ्गैर्ध्वान्तराजिभिरभूद्भुवनश्रीः ॥१७॥
चूर्णकुन्तलसटापरिपाट्या विप्रकीर्णमिव भालतलेषु ।
केशबन्धविभवैर्लटभानां पिण्डतामिव जगाम तमिस्रम् ॥१८॥
सर्वनिह्नवविधौ कृतबुद्धेर्लोचनानि विफलानि विधाय ।
स्पर्शनेन्द्रियममुद्रितशक्तिप्रातिकूल्यमकरोत्तिमिरस्य ॥१९॥
कस्य न प्रतिहत बत चक्षुर्ध्वान्तसन्ततिभिरुद्भ्रमराभिः ।
केवलं मनसिजप्रहितानां नावधूतमभिसारवधूनाम् ॥२०॥
पांसुतल्पसुरतप्रवणानां विश्वलोचनपुटप्रतिबन्धे ।
कुत्र कुत्र न तिरस्करिणीत्वं ध्वान्तमण्डलमगाच्चपलानाम्२१
पश्चिमाचलविटङ्कनिपाते विप्लुता इव रुचस्तपनस्य
दीप्रदीपकिरणाः क्षणिभङ्गीमारभन्त तिमिरद्विरदस्य ॥२२॥
सूत्रिताभिसरणाः प्रणयिन्यः कान्तसंगममविघ्नमवापुः ।
फूत्कृतैः पथि निवारितदीपाश्चापलं जयति पञ्चशरस्य ॥२३
रासभेन सहिता रजकस्त्रीरूपधारि विरचय्य शरीरम् ।
कापि वञ्चितवती जनबाधां कं विडम्बयति नो कुसुमेषुः ।२४॥
कापि मुख्यपदवीमधिरोप्य स्वां सखीं स्वकरधारितदीपा ।
प्राणनाथरतिगेहमयासीदद्भुतो रतिपतेरुपदेशः ॥२५॥
दिग्वधूरथ पुरंदरसेव्या पाकपाण्डुशरकाण्डविडम्बि ।
बिभ्रती मुखमबोधत गर्भे रोहिणीप्रणयिनः परिणामम् ॥२६॥

प्रौढकेतकपरागविपाण्डुर्ज्योतिरत्र समये भ्रमति स्म ।
नाकलायकनिकेतचकोरीपीतशेषमटवीमुदयाद्रेः ॥२७॥
पूर्वदिङ्मुखसरोरुहशोभस्य किंचिन्निर्गतेन शिखरादुदयाद्रेः ।
चारुचन्दनविलेपनपाण्डुम् पताकामिव शीतकरेण ॥२८॥
पाटलेन तमसां पटलेन प्राच्यशैलभुवि बालमृगाङ्कः ।
धातुशङ्कुपृथुलस्थलधूलीकेलिधूसरशरीर इवासीत् ॥२९॥
पाटलांशुरगमत्सलिलेति श्वेतभानुरपि तादृगुपागात् ।
वञ्चनार्थमिव पङ्करुहिण्यास्तां पुनश्छलयितुं न शशाक ॥३०॥
तर्जितं तिमिरमिन्दुमयूखैः शैलदुर्गगहनानि विवेश ।
मानिनीजनमनांसि बभूवुश्चिन्नमञ्जनमषीमलिनानि ॥३१॥
तत्क्षणाद्द्विपमशैलनिकुञ्जप्रान्तपुञ्जितमरच्यत सर्वम् ।
ध्वान्तचक्रमभितः प्रसरद्भिर्दर्गशेषमिव चन्द्रमयूखैः ॥३२॥
नीलताल फलपङ्क्तिसनाथा प्राच्यशैलवनभूमिरराजत्
निम्नया शशिकरैरुपगूढा ध्वान्तमालक परम्परयेव ॥३३॥
पारणोद्यतचकोरपुरन्ध्रिक्षिप्तलोचनरुचामिव पुञ्जैः ।
पाटलं पटलमिन्दुरुचीनां रक्तकम्बलविडम्बि बभूव ॥३४॥
क्षाल्यमान इव मानवतीनां दृग्भिरश्रुजलनिर्झरिणीभिः ।
त्यक्तवानुदयरागमशेषं पूर्वदिक्तिलकबिन्दुरिवेन्दुः ॥३५॥
वल्लभेन जगतां निजधाम्ना जातगर्व इव रात्रिभुजङ्गः ।
पादविन्यसननर्मविधायी निर्ममे कुमुदिनीं गतनिद्राम् ॥३६॥
रूप्यदर्पणतलप्रतिमल्ले लाञ्छनं तुहिनदीधितिबिम्बे ।
शोभते स्म गगनप्रतिबिम्बच्छायमद्रिशिखरस्थितिभाजि ॥३७॥
द्रावितस्फटिकशैलविटङ्कस्फारनिर्झरपरंपरयेव ।
पूरिता शशिरुचा भुवनश्रीर्मानपङ्कमनुदत्प्रमदानाम् ॥३८॥
मांसलत्वमतिमात्रमवाप्ते पिण्डदुग्धसदृशे निजधाम्नि ।
आचकर्ष हिमदीधितिरुच्चैर्मिश्रणार्थमिव वार्धिजलानि ॥३९॥

दत्तदिक्तटविपाटनशङ्कः शीतरश्मिकिरणामृतपूरः ।
मन्थशैलविशरारुशरीरः क्षीरनीरधिविलासमवाप ॥४०॥
केतकद्युतिनिभं भुवनान्तस्तन्महः प्रकृतिशीतलमिन्दोः ।
कस्य नो वपुषि चन्दनलेपः कान्तितश्च गुणतश्च बभूव ॥४१॥
क्षिप्यतां क्वचन चन्दनपाण्डुश्चन्द्रिकारसभरः कलशीभिः ।
ऊचुरित्थमबलाः प्रियहीनाः पादयोरपि निपत्य सखीनाम् ॥४२॥
कापि शीघ्रमवधीरितमाना मानिनी प्रचलिता प्रियधाम्नि ।
आगतेन मरुतापि पुरस्ताल्लाघवस्य परिहारममंस्त ॥४३॥
इत्थमाप्तवति मन्मथबन्धौ तारकापरिवृढे जरठत्वम् ।
आदिदेश नृपतिः कृतभूषाः पानकेलिनिधये हरिणाक्षीः ॥४४॥
अद्भुतास्त्रखुरली कुसुमेषोर्विभ्रमद्विरदबन्धनभूमिः ।
कुन्तलक्षितिपतिप्रमदानां पानकेलिरभसोऽथ जजृम्भे ॥४५॥
आलवालवलयस्थितिभाजां बान्धवः स्मरपरागलतानाम् ।
हेमपात्रनिवहप्रणयिन्यः पाटलाः शुशुभिरे मधुधाराः ॥४६॥
रत्नकेलिचषकेषु निविष्टं सीधुनव्यमसमायुधबन्धुः ।
राजदारपरिचुम्बनकेलित्रासजातमिव कम्पमुवाह ॥४७॥
विश्वसंवननचूर्णसमानैः कामिनीकुलगुरोर्मदनस्य ।
सख्यमाप घनसारपरागैः सीधु कुन्तलपतिप्रमदानाम् ॥४८॥
यामिनीप्रियतमप्रतिबिम्बं पूरितेषु मधुना विशदेन ।
लक्षतेस्म चषकेषु निविष्टं स्फाटिकोपलपिधानमिवान्तः ॥४९॥
पुष्पसौरभवशेन विलोलाः पङ्क्तयः शुशुभिरे भ्रमराणाम् ।
सीधुहेमकलशेषु विनिर्यद्धूपधूमलतिकाकमनीयाः ॥५०॥
सप्रणाममिव पार्थिवतेभ्यः संमुखं विलुठिता चषकेभ्यः ।
आससाद मदिरा मदिराक्षीपाटलाधरदलप्रणयित्वम् ॥५१॥
आननेषु मदिरा प्रविशन्ती दन्तकान्तिनिकरैः कृतसंगा ।
कामकीर्तिमिव कन्दलयन्ती दृश्यते स्म नृपतिप्रमदानाम् ॥५२॥

प्रान्तपाटलकपोलतलानि प्रस्खलद्भणितिविभ्रमभाञ्जि ।
प्रार्थितस्य मदनास्त्रमभूवन्मीलनीरजदृशां वदनानि ॥५३॥
मन्मथः प्रविशतिस्म सुरायां सा कुरङ्गकदृशां वदनेषु ।
तानि चेतसि नहीतिलकस्य क्ष्मापतेस्तदपि रागपयोधौ ॥५४॥
चन्द्र किं पतसि मे मधुभाण्डे वीक्षसे न किमु कुन्तलनाथम् ।
एष ते विरचयिष्यति कान्तां रोहिणीमलकपल्लवहीनाम् ॥५५॥
नास्मि रे कुमुदिनो मधुपात्रे संमुखं किमिति तिष्ठसि चन्द्र ।
रोहिणीनयनकज्जलजातः किं त्रपां दिशति ते न कलङ्कः ॥५६॥
त्वां निपीय मधुपात्रनिषण्णं वारुणीरसभरेण सहैव ।
यामिनीरमण मानवतीनां संहरामि कुलकण्टकमद्य ॥५७॥
अस्ति दोषयुगलं द्विजराज त्वं यदि स्पृशसि मे मधुपारीम् ।
अत्र नैष सहते तव राजा रोहिणी रुषमुपैति च तत्र ॥५८॥
यामिनीदयित काममपि कान्तां दुर्लभामभिलषन्ध्रुवमेषि ।
तानवं किमपि तन्तुसमानं मानहीन विदितः परमार्थः ॥५९॥
क्षिप्यसे यदयमम्बरसीम्नः क्षारवारिधिजले हरिणाङ्क ।
चापलस्य फलमेतदवश्यं कोन्यथा त्वयि हिमत्विषि खेदः ॥६०॥
लम्पटं युवतिषु ध्रुवमिन्दो त्वां वदन्ति तरलं निजदाराः ।
रे यदत्र चषकेपि निविष्टं तारकाः प्रतिमयानुसरन्ति ॥६१॥
कौमुदीरमण कापि दुराशां नूनमर्पितवती भवतोत्र ।
यद्विलङ्घ्य गगनं प्रतिरात्रि त्वं प्रयासि ककुभं वरुणस्य ॥६२॥
निर्मलं प्रियतमं हृदये मे किं करोषि कलुषं रजनीश ।
मुञ्च रत्नचषके मदिरां मे किं नवेत्सि निजमङ्ककलंकम् ॥६३॥
वायुनापि गमितस्तरलत्वं यत्प्रदीपनमनोन्नमनानि ।
दर्शनोत्सुकतयेव विधत्से तद्वितीर्णसमयोसि कयापि ॥६४॥
किं गतेन बहुवल्लभभावं वञ्चिता प्रियतमेन वराकी ।
द्यौरियं वसति नित्यममीलत्तारकैव रजनी यदशेषाम् ॥६५॥

गण्डयोररुणिमा दृशि भावः कोऽपि च भ्रुकुटिविभ्रमहेतुः ।
सुभ्रुवां दयितसान्त्वनवर्जं मानकार्यकरणाय मदोऽभूत ॥६६॥
इत्युदञ्चितविलासरसानामर्धकुड्मलितनेत्रयुगानाम् ।
जल्पितानि सरसानि स शृण्वन्सुभ्रुवांकमपि संमदमाप ॥६७॥
पानकेलिमनुभाव्य विभूतिं प्रेक्ष्य पक्ष्मलदृशां च मदोत्थाम् ।
तल्पसद्मनि जगाम स सार्धं कुन्तलेन्दुरथ चन्द्रलदेव्या ॥६८॥
आयुषे भवति यत्कुसुमेषोर्येन यौवनतरुः फलदायी ।
किं च रागलधेरमृतं यत्तत्र तन्नृपतिराचरतिस्म ॥६९॥
केलिधाम्नि न तयोः परिमातुं शक्यतेस्ममुखविभ्रमलक्ष्मीः ।
प्रीतिराविरभवत्तु समाना कामकार्मुकतुलातुलितेव ॥७०॥
तौ परस्परविलोकनलीलासान्द्रकौतुकरसौ परिचिन्त्य ।
मुद्रितेक्षणपुटौ न मुहूर्तं निद्रयापि सकुतूहलयेव ॥७१॥
ज्ञातुमद्भुतविलासनिधाने प्रेम्णि साम्यमिव जातगरिम्णि ।
केलिधामनि तयोः शतवारं क्षिप्तवान्मनसि मानमनङ्गः ॥७२॥

अत्रान्तरे सरसजृम्भितभिन्नपङ्कज
भाषाविशेषपरिपोषितचित्रभङ्गि ।
पीयूषपेशलसुभाषितभाषिणीभिः
प्रत्यूषमङ्गलमगीयत मागधीभिः ॥७३॥

'इय व्रजति यामिनी' त्यज नरेन्द्र निद्रारसं
दरिद्रति वियद्द्रुमे कुसुमकान्तयस्तारकाः ।
अयं च कुसुमा-युधप्रियसुहृत्तरणैः पञ्चषै
र्भविष्यति पयोनिधेः पुलिनराजहंसः शशी ॥ ७४ ॥

वागुन्मीलति भिन्नपङ्जललिता लीलाशुकानामपि
क्रोडे दन्तकरण्डपाण्डुरतवोर्भग्ना विधोश्चन्द्रिका ।
पूर्वाशामुखमण्डनत्वमचिराच्चण्डांशुरायास्यति
द्रागुन्मुद्रय देवि पङ्कजदलच्छायाञ्चले लोचने ॥७५॥

ये बाल्लभ्यमनङ्गलेखलिखने याताः कुरङ्गीदृशां
ये वह्निप्रतिमल्लभल्लपदवीं पञ्चेषुणा लङ्घिताः ।
जाताः कान्तिविपर्ययादनवधेर्दीपाङ्कुरास्तेधुना
धूलीधूसरताम्रचूडतरुणीचूडावदापाण्डुराः ॥७६॥

यः सैन्ये स्मरपार्थिवस्य विरहीप्रत्यर्थिनामग्रणी
र्ज्योत्स्नानिर्झरमुज्झति स्म जगतां यस्तापनिर्वापणम् ।
सोयं तारकनायकः किमपरं शृङ्गारसंजीवनं
जातः पुष्पपरागपाण्डुरजरत्कूष्माण्डपिण्डाकृतिः ॥७७॥

खण्डः क्षपासु कियतीष्वपि यः कृशाङ्गि
भङ्गीमनङ्गपरशोः सदृशीं विभर्ति ।
सोयं निमज्जति जगन्नयनाभिरामः
श्यामावधूवदनचन्दनबिन्दुरिन्दुः ॥७८॥

सपदि परिजनस्त्रीविस्तृतोद्गाढलज्जा-
क्रमनमितमुखीभिः खिद्यते खण्डिताभिः ।
घनमसृणविभूषाखण्डनोच्चण्डगण्ड-
स्थलविलुलितबाष्पोत्पीडमेणेक्षणाभिः ॥७९॥

ये मानद्विरदङ्कुशाः कुशलिनः कपटेषु ये रागिणां
सोत्प्रासेन विलासपाशपदवीं पञ्चेषुणा लम्भिताः
पादास्ते घटमानकोकमिथुनक्रीडारहःसाक्षिणः
क्षोणीकान्तमृणालतन्तुतुलितास्ताम्यन्ति तारापतेः॥८०॥

स्फुरतिनिरुपमोर्थस्तन्वते पाकमुद्रा-
परिचयमकवीनामप्यकाण्डे वचांसि ।
सुकवितिलक वेला कापि सारस्वतीयं
क्षणमवहितचित्त काव्यचिन्तां विधेहि ॥८१॥

केलिप्राङ्गणकुट्टिमेषु न पुनः क्रीडन्ति पृथ्वीभृतां
यद्गण्डस्खलदानदुर्दिनपयःपङ्केषु मग्नाःश्रियः ।

उन्मीलत्कमलस्कुटुम्बलाकलकलप्रेङ्खोलवेलैः पदै-
रुत्तिष्ठन्ति परागपुञ्जशयनात्स्वत्कुञ्जराग्रे सराः ॥८२॥
ये कुण्ठीकृतवल्लभप्रणतयः शस्त्रैरनङ्गस्य ये
न प्राप्ताश्च निशीथिनीपतिकरैः शैथिल्यवीथीमपि ।
ते निःशङ्कविटङ्कतालुतुमुलप्रोल्लुतप्लाविते-
श्छिन्नाः कुक्कुटकूजितैर्मृगदृशां मानग्रहग्रन्थयः ॥८३॥
क्षिपति तिमिरभारं भैरवः कैरवाणा-
मुदयशिखरिलीलाशेखरोयं खरांशुः ।
अपि चकितचकोरीपीतशेषेण धाम्ना
भवति विधुरकाण्डे तण्डुलक्षोदपाण्डुः ॥८४॥
सम्यङ्मन्मथशासने स्थितवतामुत्साहदानोद्यताः
सान्द्रं मानवतीजनस्य मनसि व्यापारयन्तो भयम् ।
कन्दर्पेण कृताकृतेक्षणविधौ यूनां नियुक्ता इव
भ्राम्यन्ति स्फुटिताब्जसौरभमुषः प्रत्यूषवेलानिलाः ॥८५॥
रेजे व्योमनि लङ्घितोभयतटा व्योमस्रवन्तीव या
या शैलेन्द्रशिलातलेष्वलभत श्रीखण्डपङ्कोपमाम् ।
देवस्यान्ध्रपुरं त्रिनेत्रवसतेर्लोकत्रयीकामुक-
क्रीडाकार्मणयोगचूर्णसदृशी निद्राति सा चन्द्रिका ॥८६॥
निक्षिप्य गण्डफलकेष्विव खण्डिताना-
मात्मद्युतिं दधति पाण्डुरतां प्रदीपः ।
शुष्यन्ति चन्द्रमणयश्च मनस्विनीना-
मार्द्रत्वमीक्षणपुटेष्विव संनिवेश्य ॥८७॥
त्यक्ताः शङ्कमतङ्गजेन कथमप्याधोरणाद्बिभ्यता
संक्षोभादृढवीत बन्धकरिणां व्योमाङ्गणे पुञ्जिताः ।
किंचिद्गर्जदरण्यमत्तमहिषव्याकीर्यमाणत्विषः
पूर्वक्ष्माधरमुत्सृजन्ति तुरगाः कृष्णेक्ष्य तिग्मद्युतेः ॥८८॥

क्षिप्त्वा गुहासु तिमिरं विहितव्यलीकाः
पादाननुवहन्ति गिरयस्तरणेः शिरोभिः ।
तन्मस्तकेषु च किमप्यभयप्रदान–
हेतोरिवार्पितकरः प्रतिभाति भानुः ॥८९॥

बाणाः श्वेतमयूखशाणकषणक्षीणाः क्षणात्कुण्ठतां
यातास्त्यक्तनयासु यासु निहिताः पञ्चापि पञ्चेषुणा ।
उत्तंसोत्पलपल्लवेपि पतिते दैवात्पुरः पादयोः
कण्ठाश्लेषकठोरकौतुकरसास्तिष्ठन्तिताःकामिनाम्॥९०

नित्यं व्योम्नि गतागतैर्दिनपतेर्लोकस्य येषु ध्रुवं
भानुस्यन्दनविप्रकीर्णतुरगभ्रान्तिः परिम्लायती ।
निद्राच्छेदमुदाहरन्ति हरयस्ते मन्दुरामन्दिरा
लक्ष्मीमङ्गलदुन्दुभिप्रतिभटैः प्रत्यूषहेषारवैः ॥९१॥

रक्षः संक्षयहेतुगोत्रजननाद्द् बन्धं विधाता च यः
पाथोधेः श्वशुरत्वमेति यमुनाताप्योः प्रसूत्या च यः ।
जातः सोयमशेष विश्वबलभीरत्नप्रदीपाकृतिः
सद्यः संभवडिम्भलोचनसुखग्राह्येण धाम्ना रविः ॥९२॥

उत्थाय मन्युवशतश्चलितुं प्रवृत्ताः
कर्णं गते झटिति कुक्कुटकण्टनादे ।
किंचित्क्षुतादिनिभमात्रमुदीर्य नार्यः
प्राणेशकेलिशयनेषु पुनः पतन्ति ॥९३॥

यः श्रीकण्ठललाटलोचनशिखिप्लुष्टस्य चेतोभुवः
श्रीखण्डद्रवपाण्डुरेण महसा धारागृहत्वं गतः ।
अस्तः क्ष्माधरमस्तके स भगवानालम्बयते चन्द्रमाः
क्षौद्रासक्तपिशङ्गमाहिषदधिच्छत्रावदातच्छविः ॥९४॥

नरपतिभिरलङ्घ्यशासनोऽसौ शिरसि मनोभवशासनं दधानः।
वचनमिति निशम्य मागधीनां भुजमुपधानपदाच्चकर्ष देव्याः ॥९५

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्ट श्रीविल्हणविरचित एकादशः सर्गः ॥ ११ ॥

दिनानि तत्र भगवद् बहूनि नीत्वा विलासैः कुसुमास्त्रमिश्रैः ।
ग्रीष्मप्रवेशे सह पद्मलादया देवोऽथ कल्याणसमीपगोऽभूत् ॥१॥
अस्मिन्क्षणे कुन्तलपार्थिवस्य प्रवेशमाकर्ण्य पुराङ्गनानाम् ।
आसन्विलासव्रतदीक्षितानां स्मरोपदिष्टानि विचेष्टितानि ॥२॥
विस्रस्तरत्नाङ्कुरकोटिभिन्नमुदञ्चितं वामपदं दधाना ।
बभार कापि व्रतमेकपादमाराधनायेव नरेश्वरस्य ॥३॥
कीर्णाश्रु कर्णोत्पलरेणुनैकमन्यत्सहासं नयनं वहन्ती ।
संकीर्णभावाभिनयप्रगल्भा रराज कापि स्मरनर्तकीव ॥४॥
गवाक्षरन्ध्रैरवलोकयन्ती लक्षीकृता कापि मनोभवेन ।
क्षिप्यनङ्गस्य नितान्तचण्डकोदण्डपाण्डित्यमुदाजहार ॥५॥
वराङ्गना कुङ्कुमपाटलाङ्गी सलीलमुत्तम्भितबाहुवल्लिः ।
रागप्रवाहे गहने निमग्ना काचित्करालम्बमयाचतेव ॥६॥
वीराग्रणीरेष नृपः स्थितोऽग्रे शूरोऽसि चेदत्र विधेहि शौर्यम् ।
भयास्पदं स्त्रीषु किमुच्यनेति काचिद्गिरा मन्मथमुन्ममाथ ॥७॥
नरेन्द्रलीलातपवारणस्य नेत्राञ्चलोत्थेन समीरणेन ।
निवार्यमाणश्रमवारिलेशा कृतार्थमात्मानममन्यतान्या ॥८॥
स्तम्बेरमारूढमगूढभावा निरीक्ष्य कापि क्षितिपं मृगाक्षी ।
मन्ये समानप्रतिपत्तिहेतोः कन्दर्पमत्तद्विपमारुरोह ॥९॥
निरादरं वीक्ष्य नृपं मृगाक्ष्या लीलानमत्कन्धरया कयापि ।
हृदि स्थितः कार्मुककर्षणार्थमयाच्यतेव प्रसभं मनोभूः ॥१०॥
वाचालकाञ्चीमणिकिङ्किणीकमुच्चैःक्वणत्कङ्कणमुच्चलन्ती ।
आलोकिता कापि नरेश्वरेण वैदग्ध्यगर्वोद्धुरकन्धराभूत् ॥११॥
ताडीदलेन श्रवणाश्रितस्य श्वासानिलैस्त्रस्तसतालिदूरम् ।
अदत्त वैदग्ध्यविवादहेतोर्वराङ्गनानामिव पत्रमेका ॥१२॥
गतेषु मन्दत्वमयं वृथा मे बद्धो नितम्बः स्तुतरां विधाता ।
इतीव काञ्चीवलयं विमुच्य त्वरावती कापि पुरः प्रतस्थे ॥१३॥

काचिन्नितम्बार्पितवामहस्ता दोर्लेखया कुञ्चितया नताङ्गी ।
समापतौ मार्गणमोक्षदक्षमकल्पयच्चापमिव स्मरस्य ॥१४॥
औत्सुक्यतः कापि जवाद् व्रजन्ती लीलामरालैरनुगम्यमाना ।
अन्यायभीत्येव नृपं विलोक्य विलासिनी हंसगतिं मुमोच ॥१५॥
पार्श्वस्थितामालपति क्षितीन्द्रौ देवीमनङ्गोत्सववैजयन्तीम् ।
व्यावर्तितः कोपनया कयापि सस्पर्धमर्धप्रहितः कटाक्षः ॥१६॥
नृपान्तिकप्राप्तिकृतोपकारे मार्गेवकीर्णैः पदयावकाङ्कैः ।
प्रतिक्षणं कापि मृगायताक्षी पूजामिवाम्भोजदलैश्चकार ॥१७॥
लीलावलत्कण्ठमकुण्ठभावा निरीक्षिता कापि नरेश्वरेण ।
मुमोह पुष्पायुधभिल्लभल्लभिन्ना कुरङ्गीव कुरङ्गकाक्षी ॥१८॥
सविभ्रमभ्रूलतिकानुवेलमुद्वेललावण्यरसोत्तरंगा ।
अनङ्गमारूढमपाङ्गरङ्गे वराङ्गना नर्तयतिस्म काचित् ॥१९॥
जृम्भासमास्फोटकराङ्गुलीकमखर्वदोर्वेणिकया कयाचित् ।
निरीक्ष्य राजानमजातरागमतर्ज्यतेवातिरुषा मनोभूः ॥२०॥
शोणाश्मवातायनसीम्नि कापि स्थिता शरच्चन्द्रमरीचिगौरी ।
आत्मानमिद्धार्चिषि कामवन्हौ क्षीराहुतीभूतमिवाचचक्षे ॥२१॥
अभ्यागते कुन्तलभूमिपाले विधातुमातिथ्यमिवोत्थितेन ।
काचिन्नियुक्ता मकरध्वजेन दीर्घां कटाक्षस्त्रजमाततान ॥२२॥
प्रयासि हारत्रुटिमप्युपेक्ष्य भ्रष्टोत्तरीयापि न तिष्ठसि त्वम् ।
ध्रुवं प्रधावस्यवधीरणेन परिच्युतस्याधरवाससोपि ॥२३॥
न दूषणं भूषणवर्जिता यज्जवेन राजाभिमुखी गतासि ।
चित्रं तु तुङ्गस्तनभारगर्वाद्गृहीतमप्युज्झसि कञ्चुकं तत् ॥२४॥
मार्गे समेपि स्खलनच्छलेन किमुच्छलत्कष्टरवं मुखं ते ।
मुग्धे कुमार्योपि कलाभिरत्र जयन्ति कान्तामपि मन्मथस्य ॥२५॥
असंशयं नीलसरोरुहाक्षि समारुरोह त्वयि पञ्चबाणः ।
द्रुतैर्विनिर्यासि पदैर्यदेषा कशाहतेवोत्तरला तुरंगी ॥२६॥

अस्माकमालोकनविघ्नहेतोस्तरङ्गिताङ्गी पुरतःस्थितासि ।
किं तुङ्गवातायनसङ्गतानां करोषि मात्सर्यपरा परासाम् ॥२७॥
प्रकाशयन्ती कतिचिन्नखाङ्कान् किं चण्डि चण्डत्वमदं बिभर्षि ।
कासामिहानंगजयास्त्रमित्रैर्न गात्रमुच्चित्रितमर्धचन्द्रैः ॥२८॥
वैदग्ध्यगर्वस्तव सर्वदास्ति कथंचिदाराधय राजचन्द्रम् ।
नामाङ्कितामर्पय वर्णमालां सुवर्णपत्त्रे मकरध्वजस्य ॥२९॥
ससंभ्रमभ्रूयुगताण्डवानां विलासकोदण्डपुरस्कृतानि ।
सानन्दमित्थं पुरसुन्दरीणां नृपेन्दुना शुश्रुविरे वचांसि ॥३०॥
श्वश्रूं मुहुः श्रोत्रकठोरवाचं निरीक्ष्य पृष्ठे विनिवारयन्तीम् ।
अनङ्कुशत्वात्कृतपुण्यमेका पण्याङ्गनात्वं गणयांबभूव ॥३१॥
काचित्पदैरस्खलितैः सखेलं यातीषु शुद्धान्तकरेणुकासु ।
राजाङ्गनानामकरोदवज्ञां श्रोणीभरे वस्थितगौरवेव ॥३२॥
दृशां भृशं कामवशीकृतानां कस्याश्चिदालोकनकौतुकिन्याः ।
कर्णावतंसे च निजाञ्चले च गतागतं योजनमात्रमासीत् ॥३३॥
उल्लङ्घ्य वीथीमथ राजहंसः पुराङ्गनालोकनवागुराणाम् ।
विवेश हर्म्याङ्गणकेलिवापीहंसावतंसां निजराजधानीम् ॥३४॥
प्रसाददानेन दृशार्द्रया च स तत्र संतोष्य समस्तलोकान् ।
अन्वग्रहीदद्भुतयौवनोष्मा ग्रीष्मानुरूपामुपभोगलक्ष्मीम् ॥३५॥
लावण्यलीलातरुकुड्मलाभमुक्ताविभूषः शुशुभे नरेन्द्रः ।
त्रैलोक्यनेत्रामृतनिर्झरस्य सशीकरासार इव प्रवाहः ॥३६॥
मुक्तावदातश्रमवारिलेशविशोभिलावण्यरसप्रवाहः ।
सावर्ण्यमर्णोनिधिना बभार स ताम्रपर्णीप्रणयीकृतेन ॥३७॥
श्रीखण्डपाण्डुस्तनमण्डलाभिरालिङ्गितोऽसौ मुहुरङ्गनाभिः
न केवलं ग्रीष्ममहोष्मसङ्क्रमनङ्गतीव्रातपमप्यजैषीत् ॥३८॥
स चन्दनालेपनशीतलेन गात्रेण चित्रं नरनाथचन्द्रः ।
प्रविश्य चित्तेषु मृगेक्षणानामनङ्गतापज्वरमाततान ॥३९॥

अङ्गान्यलङ्घयन्त विलेपनेन नृपप्रकाण्डस्य विपाण्डुराणि ।
समुच्छलन्त्या प्रणयीकृतानि लावण्यरत्नाकरवेलयेव ॥४०॥
अङ्गद्वये भूवलयावतंसः श्रीखण्डलीलातिलके बभार ।
जयामृतास्वादनतत्परायाः साम्राज्यलक्ष्म्या इव रूप्यपात्रे ४१
विभज्य दोर्भ्यां दधतो धरित्रीं तस्यांसयोश्चन्दनचित्रकाभ्याम् ।
ईषत्तुषारस्फटिकाचलेन्द्रशृङ्गद्वयीव प्रकटीबभूव ॥४२॥
अंसद्वयेन श्रियमाससाद स चन्दनस्थासकसुन्दरेण ।
दोर्मन्दरालोडितसंगराब्धिपीयूषपिण्डद्वयपाण्डुनेव ॥४३॥
नृपेन्दुना चन्दनचारुलेखा ललाटपट्टे लिखिता दधार ।
वक्त्रारविन्दस्थितसूक्तिदेवीदेवार्चनस्फाटिकलिङ्गभङ्गीम् ॥४४॥
वपुस्तुषाराचलतुङ्गमस्य व्यराजदालेपनचन्दनेन ।
विश्वप्रविष्टार्कमयूखतापशान्त्यै धेयायिमिलकरितलेन्दुकाना ॥४५॥
शृङ्गारपाथोधितरङ्गभङ्गिरनङ्गविद्यामकरन्दबिन्दुः ।
विलासिना संस्क्रियते स्म तेन स्नानाम्बरान्ते चामरी श्रियायाः४६
वक्षःस्थले कुन्तलपार्थिवस्य श्रीखण्डभूपालिलकप्रकाम् ।
लक्ष्मीतुलाकोटिरवैर्मुखेन्दोः सरस्वतीसंश्रवावलीगं: ॥४७॥
शैत्यार्थमस्योद्वहतः कराब्जे चक्राभमम्भोरुहिणीपलाशम् ।
करान्तरे विभ्रमपुण्डरीकं रराज शौरेरिव पाञ्चजन्यः ॥४८॥
रराज राजीवविलोचनस्य हृदि स्थिता चन्दनपङ्कलेखा ।
मृणालिका वक्त्रगतोक्तिदेवीविमानहंसाननविच्युतेव ॥४९॥
प्रदर्शयन्तीव तुषारवर्षं विसारिणा शीकरडम्बरेण ।
समन्ततः स्फाटिककुट्टिमेन हिमं शिलीभूतमिवोद्वहन्ति ॥५०॥
परिस्फुरत्केतकपत्रभङ्ग्या घण्टासहस्रैरिव दन्तुराणि ।
अदृश्यसूर्याणि घनोपमानां नीरन्ध्रबन्धात्कदलीदलानाम् ॥५१॥
गवाक्षजालान्तरनिर्यदच्छनीरन्ध्रधारानिकरच्छलेन ।
निदाघसंरोधविसूत्रणाय व्यापारयन्तीव पृषत्कपङ्क्तिम् ॥५२॥

अत्यन्तशैत्यादिव संकुचद्भिरस्पृष्ट पूर्वाणि करैः खरांशोः ।
दुर्गाणि घर्मेऽपि हिमर्तुजीवरक्षाक्षमाणीव कृतानि धात्रा ॥५३॥
धारागृहाणि क्लममार्जनेन स्मरस्य चापश्रममादिशन्ति ।
मृगेक्षणाभिः सममध्युवास मध्यंदिने मध्यमलोकपालः ॥५४॥
चोलान्तकश्चन्दनपाण्डुरेषु नितंबिनीनां स्तनमण्डलेषु ।
सम्राज्यमानम्रजगत्त्रयस्य मेने मनोजन्मनराधिपस्य ॥५५॥
हिमाद्रिशृङ्गाधिकशीतलेषु वराङ्गनातुङ्गकुचस्थलेषु ।
घोरं निराकर्तुमसौ निदाघं विलेपनापाण्डुषु पण्डितोभूत् ॥५६॥
स्त्रीणामनालेपनशीतमङ्गं विपाटलः पाटलया समीरः ।
स्मरस्य वीरव्रतरक्षणाय तस्मिन्बभूव स्मितमल्लिका च ॥५७॥
प्रतारिताः कान्तिजलैर्वधूनां निपत्य यत्पाथसि दुग्धमुग्धे ।
न क्षीरनीरप्रविभागहेतोरन्यत्र हंसाः पुनरुत्सहन्ते ॥५८॥
रणद्विरेफेषु सरोरुहेषु समोपविष्टाः प्रतिभान्ति हंसाः ।
समर्प्य लीलागमनं गृहीतमञ्जीरनादा इव सुन्दरीभ्यः ॥५९॥
यत्पङ्क्तिभिः स्वामिविलोकभाजां जाने नरेन्द्रप्रमदाजनानाम् ।
मुखेन्दुबिम्बैरविरोधहेतोः समर्पिता पादतलेषु लक्ष्मीः ॥६०॥
श्रोणीतटोल्लासितरङ्गलीलाविलासवाचालितसारसासु ।
स तासु रेमे सह कामिनीभिर्दीर्घासु लीलावनदीर्घिकासु ॥६१
विश्रान्तकान्ताकरयन्त्रधारं सरोजिनीपत्रममुष्य हस्ते ।
शोभां बभार स्मरकङ्कपत्रमैत्रीजुषः श्यामलखेटकस्य ॥६२॥
मीनाङ्कमीनस्य ,नरेन्द्रचन्द्रशरीरलावण्यजले स्थितस्य ।
असूत्रयद्वाडिशसूत्रशङ्कां दीर्घा मृगाक्षीकरयन्त्रधारा ॥६३॥
स राजहंसः करयन्त्रमुक्तधारालतापञ्जरमध्यवर्ती ।
उपायनीभूत इवाङ्गनाभिः क्षिप्तः करे मन्मथपार्थिवस्य ॥६४॥
तमेकवीरं करयन्त्रवारां धाराशतैर्व्याकुलितं वधूभिः ।
निःशङ्कमारोपितचापदण्डः शिक्षाशरव्यं मकरध्वजश्चकार ॥६५॥

स्तनाङ्गरागे लटभाङ्गनानां नरेन्द्रधाराम्बुहुते मनोभूः ।
रागं हृदि प्रच्युतिशङ्कयेव माञ्जिष्ठरागप्रतिमं ततान ॥६६॥
देवः कराम्भोरुहयन्त्रधारां क्षिपन्कपोले विपुलेक्षणायाः ।
कुमुद्वतीकामिनि रश्मिदण्डं प्रवेशयन्नर्क इव व्यराजत् ॥६७॥
आनम्य लीलापरिवर्तनेन विलङ्घयामास नरेन्द्रमुक्ताम् ।
कण्ठोन्मुखीं काञ्चनकम्बुकण्ठी स्मराग्निधरामिव वारिधाराम् ॥
चकार कान्ताकुचपत्त्रभङ्ग कस्तूरिकापङ्ककलङ्कितानि ।
वर्षाजलभ्रान्तिविलोलहंसहासानि लीलासरसीपयांसि ॥६९॥
नृपावरोधस्तनकुङ्कुमेन वापीपयः पाटलतामवाप्तम् ।
क्रीडानिमग्नस्मरकुम्भिकुम्भसिन्दूरसम्भिन्नमिवाबभासे ॥७०॥
रराज कर्पूररजस्तरङ्गसङ्गलीलाङ्गणदीर्घिकाणाम् ।
गौरीपतिक्रोधहुताशशान्त्यै मग्नस्य भस्मेव मनोभवस्य ॥७१॥
अवाप कृष्णागुरुधूपधूमत्यक्तार्द्रभावेषु कचोच्चयेषु ।
आश्चर्यमिन्दीवरलोचनानां नितान्तमार्द्रत्वमयुग्मबाणः ॥७२॥
असंनिधानात्कुसुमाकरस्य पुष्पायुधः क्षीणनिषङ्गभारः ।
वामभ्रुवां सस्मितमल्लिकेषु धम्मिल्लबन्धेषु धृतिं बबन्ध ॥७३॥
नेत्राणि धात्रीतिलकाङ्गनानां तरङ्गलेखाहृतकज्जलानि ।
शाणोपलान्दोलननिष्कलङ्ककामास्त्रमैत्रीं कलयांबभूवुः ॥७४॥
लीलावगाहच्युतकुङ्कुमेषु लक्ष्यस्तदङ्गेषु नखाङ्कमार्गः ।
शृङ्गाररत्नाकरतीरभाजां मुद्रां दधे विद्रुमपल्लवानाम् ॥७५॥

व्यधित तदनु देव्याः पत्त्रवल्लीं कपोले
विपुलपुलकलेखादन्तुरः कुन्तलेन्दुः ।
प्रतियुवतिभिरर्धं ताडितः पाण्डुगण्ड-
स्थलविलुठितबाष्पव्यक्तिलक्ष्यैः कटाक्षैः ॥७६॥
रचयति कचलीलाबन्धमुत्कन्धरायाः
स्वयमवनिमृगाङ्के कौतुकेन प्रियायाः ।

स्थलमुपचितचिन्तातापताम्यत्कपोल-
ग्लपितकरसरो जस्रस्तराभिः पराभिः ॥७७॥
मधुसमयविरामक्षामवीर्यस्य शौर्यं
बहुभिरिति चरित्रैः सूत्रयन्पुष्पकेतोः ।
शिशिरमिव वमद्भिः प्रेयसीगात्रसङ्गै-
रपि जरठमजैषीद्ग्रीष्मगर्वं नरेन्द्रः ॥७८॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति
काश्मीरकभट्टश्रीबिल्हणविरचिते द्वादशः सर्गः ॥१२॥

प्रतापमारोप्य परां समुन्नतिं यशः प्रदर्श्यैव च दावभस्मभिः ।
भजन्निदाघः कृतकृत्यतामिव स्वपौरुषाविष्करणान्न्यवर्तत ॥१॥
विधाय तैक्ष्ण्यं गणितान्यहानि स प्रतापहानेः प्रणयित्वमाययौ ।
परोपतापैकपरायणश्चिरं क्व वा भवत्यभ्युदयस्य भूमयः ॥२॥
दवानलप्लुष्टवनान्तभस्मभिः क्षमाधराः पाण्डुरतां प्रचक्रमिरे ।
गता इवाङ्के स्थितबालवृत्तकक्षयोत्थवैराग्यवशात्तपस्विताम् ॥३॥
निदाघसंपादितकार्श्यसंपदां तरङ्गिणीनां गलिता नितम्बतः ।
कलप्रलापाः कलहंसपङ्क्तयश्चकाशिरे विभ्रममेखला इव ॥४॥
रवेः समस्तक्षितिमध्यगं रसं निपीय पीनत्वमतीव बिभ्रतः ।
भरेण वाजिष्विव मन्दगामिषु क्रमेण दैर्घ्यं दिवसाः प्रपेदिरे ॥५॥
न गन्तुमन्याः पदमप्यपारयन्निदाघतीव्रं तनिमानमागताः ।
हिमाद्रिजाताभिरलम्भि केवलं नदीभिरम्भोभिः परिरम्भणोत्सवः ॥६॥
तुषारशैलद्रवनिर्झरोदकं समाहरन्त्युन्नतभूमिनिम्नगाः ।
हिमोपचारार्थमनेकवाहिनीवियोगतप्तस्य सरित्पतेरिव ॥७॥
प्रवृद्धकार्श्याः परितापसंकुचत्सपङ्कपङ्केरुहिणीदलाङ्किताः ।
दशामलब्धाब्धिसमागमाश्चिरं वियोगयोग्यामभजन्त निम्नगाः ॥८॥
दृशं प्रपापालिकया प्रकाशिते स्तनद्वये ... कुम्भधिया कुचद्वये ।
विवेद पान्थः कलशात्परिच्युतां न वारिधारां मुखसङ्गिनीमपि ॥९॥
पपुः प्रपापालिकया समर्पितं चिरेण पान्थाः कथमप्यनादरात् ।
तदीयबिम्बाधरपानलम्पटाः सपाटलामोदमपि प्रपाजलम् ॥१०॥
निरन्तराघट्टितपाटलाधराः क्रमान्निदाघस्य घनोष्मसङ्गिनः ।
व्यंरसिषुः श्वाससमीरणा इव प्रवृद्धदावानलबन्धवोऽनिलाः ॥११॥
गतायुषि ग्रीष्ममहोष्मडम्बरे दिनेऽपि चञ्चत्पुटकैर्विलासिभिः ।
कुचस्थलीचन्दनलेपपङ्किलप्रियाङ्कपालीसुखमन्वभूयत ॥१२॥
परस्परश्वाससमीरघट्टनत्रुटत्कपोलस्थलघर्मबिन्दुभिः ।
अपि प्रदोषावसरे विलासिभिः करम्बिताऽन्योन्यभुजैरमुच्यत ॥१३

अपङ्कजस्त्रस्तरमस्तचन्दनं विलाससंमर्दममन्दमाश्रिताः ।
शनैर्निदाघस्य घनामदर्शयन्प्रतापहानिं हरिणायतेक्षणाः ॥१४॥
अपश्यदस्मिन्समये महीपतिः पयोदखण्डं मिलितार्कमण्डलम् ।
सकुण्डलं वारिमुचामनेहसः कुतोपि मूर्धानमिवार्धनिर्गतम् ॥१५॥
निदाघनिःशेषिततोयसम्पदः समुद्धतं वारिदिदृक्षया सुरैः ।
नभः स्रवन्त्या इव पङ्कमङ्कतः क्षमापतिर्बालपयोदमैक्षत ॥१६॥
शनैरवाप्तोपचयं पयोमुचं विलोक्य कौतूहललोललोचनाम् ।
अथाङ्कपर्यङ्ककृतास्पदां प्रिया मवोचत क्ष्मातलमीनलाञ्छनः
नभस्तलारण्यतमालमालिका महीभृतां मूर्धसु मूर्धजावलिः ।
तडित्प्रदीपाञ्जनपुञ्जसन्निभा विभाव्यतां सुभ्रु नवाभ्रमण्डली
घनोपरोधात्तरलाक्षि लक्ष्यते मलीमसं मण्डलमुष्णदीधितेः ।
क्षणप्रभादीपसमुत्थकज्जलग्रहोत्कवर्षार्पितकर्परोपमम् ॥१९॥
मृगाक्षि पश्य प्रसभं नभश्चरीविलासकृष्णागुरुधूपमण्डलैः ।
करम्बितः षट्पदमेचकैरिव प्रयाति सद्यः प्रचुरत्वमम्बुदः ॥२०॥
अनेन नूनं जलधेः समुद्धृतं विचित्ररत्नाङ्कुरदन्तुरं पयः ।
अनेकवर्णाञ्चितमन्यथा कथं पयोमुचा निर्मितमिन्द्रकार्मुकम् २१
ध्रुवं दिवि ग्रासगृहीतपन्नगस्फुरत्फणारत्नमयूखकन्दकैः ।
घनोन्मुखानां शिखिनां मुखोद्गतैरकारि शातक्रतवं शरासनम् ॥२२॥
नितम्बबिम्बेषु वसुन्धराभृतां घनाः स्फुरन्नीलदुकूलविभ्रमाः ।
निपत्य वीथीषु किरातवेश्मनां हताच्छभल्लप्रतिमल्लतां गताः॥२३॥
अकृत्रिमाः काण्डपटाः पयोमुचस्तडिद्वधूलास्यरहस्यभङ्गिषु ।
निदाघतप्ते नभसि स्फुरन्त्यमी ॰लज्जलार्द्राः सदृशाः कृशोदरि२४
अदभ्रमभ्रोपलपट्टकेषु ये शितीक्रियन्ते मदनेन पत्रिणः ।
तडिल्लता तन्निकषोत्थपावकस्फुलिङ्गभङ्गीं ललितांगि सेवते॥
अमी गृहीत्वेव पयोधिमध्यगक्षमाधरक्षेमकथामुपागताः ।
घनाः समारूढशिखण्डिताण्डवं विमुद्रयन्ति ध्वनिमद्रिसानुषु२६

द्विषन्ति राजीवमुखि स्वजीवितं ध्रुवं मयूरास्तव निर्जिताः कचैः
भवन्ति यद्वासवचापसंमुखाः शिलीमुखप्राप्तिसमुत्सुका इव ॥२७॥
जिगीषवः प्रावृषि मुक्तकार्मुकाः प्रगल्भते शक्रधनुः क्व कर्मणि ।
अवैमि संप्रत्यविलङ्घ्यशासनं शरासनं मान्मथमेव मानिनि ॥२८॥
अयं निदाघस्य तनोति पाटवं समस्तपृथ्वीरसकर्षणैः करैः ।
उदग्रदुर्वण्डतडित्करस्त्विषामधीशमित्याक्षिपतीव वारिदः ॥२९॥
निदाघबन्धोस्त्विषमुष्णदीधितेरपि प्रविष्टामिह मण्डलोदरे ।
अवैमि निर्वापयितुं मृगेक्षणे कृणद्धि तारारमणं बलाहकः ॥३०॥
निदाघमाघ्रातजगत्त्रयं क्षुधा विधाय लीलाकवलं बलाहकः
इतो बलाकाभिरवस्थितां मुखे तदस्थिमालामिव दर्शयत्ययम् ॥३१॥
अवाप्य शिक्षां गतिषु त्वदन्तिकाज्जगत्त्रयीदुर्लभभूरिभङ्गिषु ।
प्रयान्ति हंसाः सुरहंसमण्डलीगुरुत्वलोभादिव सुभ्रु मानसम् ॥३२॥
द्रवन्ति हंसाः सुरचापचुम्बिनः पयोदवृन्दान्निपतत्सु बिन्दुषु
प्रवर्तमानाङ्गुलिकाद्धनुर्मुखाद्विशङ्कमाना इव गोलकावलिम् ॥३३॥
अपन्हुताश्चञ्चुपुटैः शिखण्डिनां प्रकाशिताः कोमलकूजिताङ्कुरैः ।
पतन्तिकृच्छ्राद्भुवि पान्थयोषितांकवोष्णनिःश्वासकदर्थिताःकणाः॥
ग्रहीतुमेते निजचञ्चुकोटिभिर्झटित्यनभ्यासवशान्न पारिताः
क्षितौ लुठन्तः शितिकण्ठशावकैरसूयिताः सुभ्रु नवाभ्रबिन्दवः ॥३५॥
तृणानि भूभृत्कटकेषु निक्षिपन्न कैः स्फुरद्धीरमृदङ्गनिस्वनः ।
तडित्प्रदीपैश्चलदङ्गलीलया निदाघमन्विष्यति वारिदागमः ॥३६॥
नमत्ययं श्यामलशष्पमण्डलस्थितेन्द्रगोपप्रचयासु वारिदः
गिरिस्थलीषु च्युतशक्रकार्मुकभ्रमादिवोद्भ्रान्ततडिद्विलोचनः ॥३७॥
अमी वियन्नीलसरोजमण्डलप्रलम्बनालप्रतिमल्लडम्बराः ।
अनङ्गनाराचपरंपरानिभाः पतन्ति धारानिचयाः पयोमुचः ॥३८॥
अनङ्गशस्त्राणि नतांगि तीक्ष्णतां नयत्ययस्कार इवाम्बुदागमः
मलीमसाङ्गाररुचां पयोमुचां तथाहि मध्ये ज्वलितस्तडिच्छिखी॥३९

निदाघ मित्रेण विसूत्रितं जलं तवप्रियेणाखिलमुष्णरश्मिना
क्षुधेति धारालगुडैर्बलाहकस्तडित्ययं ताडयतीव पद्मिनीम्॥४०॥
कृतक्षणं नद्रनदीसमागमे तरंगिणीनाथमवेक्ष्य संप्रति ।
विलङ्घ्य मार्गं सहसा महापगाः पतन्ति नीचेषु नदान्तरेष्वपि
इयं नमन्ती नभसः पयोभराद्वैमि नीलोत्पलभङ्गिनिर्मला ।
करोति सर्वत्र विलोक्य कर्दमं पयोदमाला पदमद्रिसानुषु ॥४२॥
ध्रुवं कयाचित्कथया पयोनिधेः स्तनद्भिरभ्रैः सरितः प्रकोपिताः
प्रयान्ति सद्यः कलुषाः सरित्पतिं तथा हि कोलाहलमांसलोर्मयः ४३
तरंगिणीनाथसमागमत्वराप्रधाविताः शैलनदीभिरन्तरे ।
निरुध्यमानाः कलहं महारवैर्विमुद्रयन्तीव समुद्रवल्लभाः ॥४४॥
जलेन भिन्ना कियती वसुन्धरा मदर्पितेनेति परीक्षितुं घनाः
सहाम्बुधाराभिरधीरलोचने क्षितौ शलाका इव निक्षिपन्त्यमी४५
इतस्ततः शीकरमौक्तिकोत्करं नदाः किरन्तः समदाभिरूर्मिभिः
प्रतारणायेव समुद्रयोषितां समुद्रवेषेण चरन्ति वर्त्मसु ॥४६॥
क्षपासु संप्रत्यभिसारिकाजनः स्खलत्पदं कर्दमपिच्छिले पथि
करोति कार्तस्वरदण्डशङ्कया तडिल्लताया मवलम्बनादरम् ॥४७॥
नताङ्गि लीलाकमलाकरेण ते तरङ्गदण्डैः प्रतिबिम्बतो घनः ।
अशेषपानीयसमृद्धिमंशयाद्व्रजन्निवार्थित्वमनेन ताड्यते ॥४८॥
गृहीतमासीत्सलिलं बलाहकैः कलान्तरेण ध्रुवमम्भसां निधेः
यदेतदीयानि जलानि गृह्णते विधाय कोलाहलमब्धिवल्लभा॥४९
समर्पयामास पयांसि निश्चितं कयापि वृद्ध्या जलधिः पयोमुचाम्
महागिरिप्रस्थसहस्रशोधितं यदम्बु गृह्णन्ति समुद्रयोषितः ॥५०॥
करोति नीरन्ध्ररसोपबृंहणात्तरंगिणीरेष मदङ्गसङ्गिनीः ।
इति ध्रुवं पुष्यति रिक्तमागतं बलाहकं बालमृगाक्षि वारिधिः ॥५१॥
विलीय नीलस्तडिदूष्मणा घनः कपालरङ्कः किमजायत क्षितेः
जराविमुक्तेव मृगाक्षि लक्ष्यते यदुद्गतश्यामलशष्पकुन्तला॥५२॥

न वेद्मि कस्मिन्समये तथाविधाः तरंगिणीभर्तुरकीर्तिरुत्थिता
नमोनमः कुम्भभुवे भवेदसौ तदङ्गनानामपि संमुखोद्य चेत ॥५३॥
पयोदवृन्दं गगनस्थलोल्लसत्तडिल्लतादोहदकर्दमद्युति ।
चकास्ति संक्रान्तकलङ्कमम्भसां नमश्च्युतानामिवगालनांशुकम् ५४
स्वभावनीलाःकथमत्र लक्ष्यतां प्रयांति नोलासु पयोदपङ्क्तिषु ।
इति ध्रुवं सम्प्रति वाजिनो भयाद्विभर्तिगाढग्रहमर्कसारथिः ॥५५॥
क्षणप्रभां नूनमपश्यतः प्रियां तवायमाक्रन्दरवः पदे पदे ।
पयोद यन्नोदयते दयापि ते वियोगिवर्गे तदहो महाद्भुतम् ॥५६॥
ध्रुवंत्वया संततमङ्कलालिता तडिन्न जानाति परव्यथामियम् ।
अमन्थरं पान्थवधूकदर्थनान्निषेधति त्वां न किमर्थमन्यथा ॥५७॥
कथंचिदायाति प्रियस्तदावयं न निश्चितं विश्वसिमः पुनस्त्वयि
मुहुः स्पृशन्विष्णुपदं नवाम्बुद स्वकार्य्यतात्पर्यमलं न मुञ्चसि ।५८।
न केवलं ते बहिरेव नीलिमा नितान्तमभ्यन्तरमप्यनिर्मलम् ।
यदध्वगस्त्रीवधपातके घन प्रयासि मन्त्रित्वमयुग्मपत्रिणः॥५९॥
अदक्षिणापि प्रियकाङ्क्षिणीष्वहो त्वमेतदेकं विदधासि कौतुकम्
वियोगिनिर्मूलनमूलकण्टकं मृगाङ्कबिम्बं कवलीकरोषि यत्।६०।
अखण्डितस्त्वं मकराकरादपि प्रभूतमाकृष्य जलं यदागतः ।
किमुच्यते भाग्यविपर्ययस्य तद्विजृम्भितं पान्थचकोरचक्षुषाम् ॥६१॥
इदं तव क्ष्माधरशृङ्गसङ्गिनो विषापहारौषधिसंगतेः फलम्
रुणत्सि मार्गं यदनूरुसारथेस्तुरंगवल्माभुजगैरभक्षितः ॥६२॥
सुरद्विपस्य ध्रुवमब्धिवार्तया कयापि पाथोद गतोसि बन्धुताम्
भवन्तमुन्मूलयितुं प्रगल्भते दिवि भ्रमन्तं न यदभ्रमूपतिः ॥६३॥
अलं प्रलापैस्तुषधूमधूसरो विधूय यन्मृत्युशतानि गर्जसि ।
प्रवासिकान्ताजनपापमूर्जितं तदेति जीमूत तवोपकारिताम् ॥६४॥
स्मरज्वरव्याकुलितः कलावति ब्रवीति पाथोधरमुद्धुरध्वनिम्
प्रकुण्ठकण्ठागतबाष्पगद्गदैः पदैरिति प्रोषितवल्लभाजनः ॥६५॥

क्षणद्युतिस्ते क्षणमस्तु मान्यथा सदाङ्कपर्यङ्कतले निषीदतु ।
घन त्वदीयध्वनिडिण्डिमं विना पतिं लभन्ते कथमध्वगाङ्गनाः६६
न षोडशीमप्युपयाति ते कलां प्रसिद्धिमात्रं स्मरबान्धवो मधुः
शिरस्यकुर्वन्मदनस्य शासनं मुखं त्वदीयं मलिनं सहेत वा॥६७॥
समागतप्राणसमा करोति का न ते सपर्याविधिमध्वगाङ्गना ।
पुनः प्रियोस्याः किमतः परेण वा घन त्वमेवाशुकविर्भवोपरि६८
वियोगिनां संघटने भवत्समः परोस्ति जीमूत न दूतकर्मणि
वदन्ति नान्यैः सहयाः कुलस्त्रियो ध्रुवं तदर्थं वहसि क्षणप्रभाम्६९
विमुक्तवेणीवलयाः पुरंध्रयः प्रियाङ्कपालीपरिवासशीतलाः ।
अनङ्गसाम्राज्य विलासमंत्रिणः प्रभावमम्भोद निवेदयन्ति ते॥७०
स्मरातुराणां विदधासि दुर्दिनं प्रियाभिसाराय कुरंगचक्षुषाम्
रतोत्सवे काण्डपटत्वमेषि च त्वमग्रणीर्मेघ परोपकारिणाम् ७१
विभातवर्गे जलद त्वमग्रणीर्न चन्द्रिकापि द्युतिमेति तावकीम्
करोषि किं शुभ्रतया तदीयया न सुन्दरं चन्दनमेणनाभितः॥७२॥
करोति चैत्रः सह चन्दनानिलैः किमिन्दुना कोकिलपञ्चमेन च
न विद्यते जेतुरनङ्गभूपतेः किमन्यदेकोङ्ग भटस्त्वया समः ॥७३॥
पयोद यासां भवतोपि दर्शनान्न वल्लभः सङ्घटते मृगीदृशाम्
न ताः क्रियन्ते गणनासु दुर्भगाः करोति कश्चित्र मजातभित्तिषु ७४
समागते प्रेयसि चाटुकारितामितःस्मितक्षालितपाटलाधराः
भजन्ति काश्चिद्विमलेन चेतसा विलासभीत त्वयनाः पयोमुचः ७५
अलब्धरत्नाकरसङ्गमामृता तथा गता ग्रीष्मदिनेषु तानवम् ।
अदृष्टदुःखेव सखि प्रयासि मे कुतः प्रियालिंगनभंगहेतुताम्॥७६॥
मुहूर्तं मामीलत मूर्तिरम्बरे विगाहसे कालविलङ्घनीयताम्
सलीलमुत्तीर्य भवन्ति पांसुलाः समुल्लसन्मांसलकान्तकेलयः७७
घटं समारुह्य विघट्टितोर्मयः प्रयान्ति ते पारमवारिताः पराः
अपुण्यवत्याः पुनरेष मे गतिं भिनत्ति नावापि नितम्बडम्बरः७८

विधाय कोलाहल मूर्मि भिर्मुधाकिमित्यनाकर्णितकेन वर्द्धयसि
उपार्जितस्त्रीवधपापसम्पदः कथंपयोधिस्तव सङ्गमेष्यति ।७९
नयस्व पारंपुलिनद्वयानुगां तरंग दोलामधिरोप्य मामितः
प्रसीद यावन्न निशा विशीर्यते यशांसि ते गायतु पांसुलाजनः ८०
सहस्रशः कृष्ण निशास्वहंगता पदं तव न्यस्य शिरस्यवारिता
समृद्धगर्वेण किमन्धतां मुधां दधासि नन्वस्ति घनात्ययः पुनः ८१
परिस्खलद्वीचिदुकूलपल्लवा । बलात्समुद्राभिमुखी प्रधावसि
करोषि चान्यासु निषेधमित्यहो स्वयं विमूढासि परासु पण्डिता
नितम्बपर्यन्तगलज्जलांशुका समुत्सुका किं कुटिले प्रधावसि
कुलापगान्तःपुरवक्त्रचुम्बिनो न लप्स्यसे दास्यमपि त्वमम्बुधे
मया कुमार्यापि न सुप्तमेकया न जारमुत्सृज्य पुमान्विलोकित
अनेन गोत्रस्थितिपालनेन मे प्रसन्नतामेत्य भवोपकारिणी ॥८३॥
इति स्मरार्तः प्रमदाजनोधुना निशासु कान्तानभिसर्तुमुद्यतः ।
न वक्ति कोपात्कतरां तरंगिणीमनंगशृंगारसमुद्रवाहिनि ॥८५॥

अविरलजलधाराधोरणीधौतवस्त्राः
सपदि मदनहस्तन्यस्तहस्तास्तरुण्यः ।
किमपि न गणयन्ति प्राणनाथाङ्कपाली
रभसपुलकितांग्यः पङ्किलासु स्थलीषु ॥८६॥
यः स्पर्धामदधान्मृदङ्गनिनदैः सौदामिनीताण्डवे
यः कोदण्डममर्त्यभर्तुरकरोट्टंकारशङ्कास्पदम् ।
यश्चैरावणकण्ठगर्भविलुठद्गम्भीरः गर्जाघनः
सोयं व्योमनि घूर्णते विरहिणीघातय मेघध्वनिः ॥८७॥
विद्युत्पङ्कजषट्पदपङ्क्तिपटली व्योमस्थलीशाद्वलं
केदारः कलमाङ्कुरप्रतिभुवां धारालतानामयम् ॥
शैवालावलिरद्रिमूर्धसरितां सूरेन्दुकारागृहम् ॥
कन्दर्पोत्सववैजयन्ति भवतु प्रीत्यै तवाम्भोधरः ॥८८॥

उत्कर्षाधानहेतुर्निखिलशिखिगलक्रोडकूजांकुराणाम् ।
धारावल्लीवनानां मधुकरपटलश्यामलः पल्लवौघः ॥
दीर्घैर्वैडूर्यरत्नामलगगनतलादर्शलीलानिचोल-
श्रीलस्त्रीकेशपाशैः सह चरति रतिव्याकुलैः कालमेघः ॥८९॥
निखिलभुवनलक्ष्मीवल्लभो वल्लभायाः
प्रकृतिसुभगपाकोद्रेकपूर्वैर्वचोभिः ।
इति शिरसि दधानः शासनं मीनकेतो-
र्जलदसमयशोभां वर्णयामास देवः ॥९०॥

इति श्रीविक्रमांकदेव चरिते महाकाव्ये त्रिभुवन मल्लदेवविद्यापति काश्मीरक भट्ट बिलहण विरचित त्रयोदशः सर्गः ।१३

वार्द्धकं दधति वारिदागमे मूर्धजैरिव घनैर्विपाण्डुरैः ।
विक्रमाङ्कमुपसृत्य निर्जने कश्चिदाप्तपुरुषो व्यजिज्ञपत् ॥१॥
निष्ठुरं किमपि कथ्यते मया तत्र कुन्तलपते कुरु क्षमाम् ।
यत्स्वकार्यमवधीर्य गृह्णते स्वेच्छयैव परितोषमीश्वराः ॥२॥
वत्सलत्वमवलम्ब्य केवलं किं विलङ्घयसि नीतिवर्तिनीम् ।
यत्र मन्त्रगतिरेति वामतां तत्र हालहलतो विशिष्यते ॥३॥
वेङ्गिनाथमवजित्य संयति भ्रातुरभ्युदयशंसिना त्वया ।
प्रेषितस्य वनवासमण्डले वर्तते नयविपर्ययो महान् ॥४॥
न्यायमार्गमपहाय कुर्वता तेन क्रोशमविशङ्कचेतसा ।
सर्वतः सकललोकपीडनादुद्धिहारहरिणाः कृता भुवः ॥५॥
भूरिसंगरपरिश्रमार्जितां स्वामिनः प्रियतमां वहन्ति ये ।
दन्तपृष्ठवलयीकृतैः करैर्विप्रणयिनीमिव श्रियम् ॥६॥
चुम्बितानि मदनिद्रया मुहुर्ये नयन्ति नयनान्यमुद्रताम् ।
लोलकर्णपुटवातशीतलैरुच्छलद्बहलदानशीकरैः ॥७॥
कान्तदन्तविसकाण्डनिर्गमे दानपंकपटले वहन्ति ये ।
बिम्बितं दिवसनाथमण्डलं पुण्डरीकमिव मन्दिरं श्रियः ॥८॥
उल्लिखन्ति दशनैः शिलातलान्युन्मदाः क्षितिधरस्थलीषु ये ।
तेषु तैक्ष्ण्यमिव कर्तुमुद्यताः प्रत्यनीकभटभेदनोद्भटम् ॥९॥
वत्सलेन भवता समर्पितास्तस्य ते कति न गन्धसिन्धुराः ।
तद्बलात्किमपिचिन्तयत्यसौ यत्कथापि वितनोतिपातकम्॥१०॥
सर्वमाटविकचक्रमक्रमव्यापृतस्तलगतं चकार सः ।
शार्वरेष्विव तमस्सु राक्षसाः पापकारिषु मिलन्ति पापिनः॥११॥
द्राविडं स नृपतिं सहायतां प्रापयत्यविरतैरुपायनैः ।
कर्तुमिच्छति न कैरुपक्रमैर्भेदजर्जरमिदं भवद्बलम् ॥१२॥
भूरिभिः किमथवा कथाङ्कुरैस्तत्त्वमेतदवधार्यतां नृप ।
कैश्चिदेव दिवसैः स सन्मुखः कृष्णवेणिनिकटे भविष्यति ॥१३॥

इत्युदीर्य विरते विशारदे तत्र शारदमृगाङ्कनिर्मलः ।
नाभ्यधत्त सहसा किमप्यसौ न त्वरां दधति धीरचेतसः ॥१४॥
किं श्रिया चपलया प्रतार्यसे वत्स मा मति विपर्ययोस्तु ते ।
प्रत्यपादयदिति प्रतिक्षणं स स्वभाव विमलाशयो नृपः ॥१५॥
भ्रष्टमग्रजमधर्मतः स्वयं शल्यवन्मनसि धारयाम्यहम् ।
वैशसं महदुपस्थितं परं धिङ्मया कथमिदं सहिष्यते ॥१६॥
पर्यतप्यत किमप्यनन्तया चिन्तयेति सुचिरं धरापतिः ।
दैवदुर्विलसितैः कटाक्षितास्तादृशा अनुशयाय न क्रुधे ॥१७॥
मन्त्रवित्तदनु चारचक्षुषा तत्तथेति बहुधा वधार्य सः ।
किं विधेयमितिचिन्तयान्वितः क्ष्मापतिः स्वगतमित्यचिन्तयत्१८
कार्यसे कथमकार्यमीदृशं वत्स दुर्नयपताकया श्रिया ।
किं न वेत्सि यदतीत्य वर्तते नारदं कलहकौतुकेन सा ॥१९॥
नार्पितानि कति मण्डलानि ते दन्तिनो मदमुखास्तवाधिकाः ।
राजशब्दमपहाय का तव न्यूनता भजसि दुर्नयं यतः ॥२०॥
घोरमापतितमेतदाः कुतः किं करोमि कतरा प्रतिक्रिया ।
हे चुलुक्य कुलदेवता स्वय वार्यतामनुचितान्ममानुजः २१
एवमादि विनिवेद्य पार्थिवस्तत्र सान्त्वनशतानि सूत्रयन् ।
तं शशाक न निषेद्धुमक्रमाद्भंगमेति भवितव्यता कुतः २२
प्रापदत्र समये सुधाकरश्रीप्रसादनविशारदा शरत् ।
नीलनीरदकलङ्कितं क्रमाद् दुग्धधौतमिव कुर्वती जगत् ॥२३॥
वैद्युते शिखिनि पान्थसुन्दरी तापकारिणि गते परिक्षयम् ।
मानिनीनिवहबाष्पहेतुभिः शान्तमम्बुधरधूमसंचयैः ॥२४॥
शान्तवैद्युतकृशानुजन्मनां भस्मनामिव रजोभराञ्चिताः ।
पाण्डुराः कतिपये नभस्तले क्वापि सख्यमभजन्त वारिदाः २५
इन्द्रनीलरसकूर्चिकाचयैः संप्रमृष्टमिव नीलिमास्पदम् ।
सिक्तमम्बुदजलैर्नभस्तलं जातशाद्वलमिव व्यराजत ॥२६॥

खेदकारणमवान्तरापगासंगमं गतमवेत्य वारिधेः ।
सम्मदादिव महातरंगिणी चक्रवालमगमत् प्रसन्नताम् ॥२७॥
उत्कटेन तडितामिवोष्मणा संनिरुध्य जलदेन तापितः ।
अंशुभिः खरतरैरदर्शयत्तापमभ्यधिकमुष्णदीधितिः ॥२८॥
पक्वशालिवनमध्यतः करैः पाटलैः कलमगोपिकाजनः ।
नूतनोद्गतसरोजसंगतानाशु वारयितुमक्षमः शुकान् ॥२९॥
निर्गतैरिव तडित्प्रदीपतः सान्द्रकज्जलरजोभिराचितम् ।
वृत्तकर्परनिभं नभस्तलं नीलिमानमतिमात्रमाययौ ॥३०॥
सार्धमम्बुभिरिवेत्य वारिधेर्मौक्तिकानि गलितानि तोयदात् ।
व्योममण्डलमुडूनि भेजिरे कैरवाधिकरुचीनि रात्रिषु ॥३१॥
नीलनीरदनिचोलकोज्झिते व्योमदर्पणतले शरद्वधूः ।
चन्द्रमाननमिवावलोकयत्तत्क्षणोन्मिषितकैरवेक्षणा ॥३२॥
आतपः क्लममदत्त वासरे चन्द्रिका जनमनन्दयन्निशि ।
चक्रतुर्निजगुणप्रकाशनं स्पर्धयेव तपनक्षपाकरौ ॥३३॥
सान्द्रचन्दनविलेपनादपि क्लान्तिहारिषु गृहाङ्गणस्थितः ।
तं प्रदोषसमये मरीचिषु प्राप तृप्तिममृतद्युतेर्जनः ॥३४॥
पुण्ड्रकेसुलतिकाश्चकाशिरे क्षेत्रभूमिषु कृतेक्षणोत्सवाः ।
लम्बिता इव विधोः सुधाभरादंशवः स्फटिकदण्डपाण्डुराः ३५
शक्रकार्मुकविलोकनाद्ध्रुवं क्रन्दितं नयवशात् कलापिभिः ।
यत्र यद्गतवति क्षणेन ते मौन मानतमुखाः सिषेविरे ॥३६॥
चूर्णमौक्तिकपरागपाण्डुरः शोभतेस्म दिवि चन्द्रिकाभरः ।
मेघबन्धनविमुक्तमीलितुं क्षीरनीरधिरिवेन्दुमागतः ॥३७॥
आख्यमम्भसि निमज्जनाच्चिरं यत्पदं कमलिनीषु निर्ममे ।
तन्निराकरणकारणादिव व्यातनोदधिकमातपं रविः ॥३८॥
हंसपंक्तिरवधीर्य मानसं क्रौञ्चशैलविवरेण निर्गता ।
भार्गवस्य दृढलक्ष्यभेदलः प्रेक्ष्यतेस्म पत्रवामिवावलिः ॥३९॥

व्याकुलेषु पतिषु प्रतिक्षणं लब्धवल्लभसमागमोत्सवाः ।
तत्र कुङ्कुमविकासवासरागपांसुलाः सुखमयानमन्वत ॥४०॥
न त्वमिन्द्रधनुषः शरव्यतां धारयन्नपि कुरंगमागतः ।
न द्रुतोसि तडिदूष्मणा च यत्तुषारकरकौतुकं महत् ॥४१॥
मेघकर्दमनिपातपङ्किला क्षालिता कथय केन चन्द्रिका ।
कः कठोरहृदयो वियोगितां नो बिभेति वधपातकादपि ॥४२॥
किं प्रमाद्यसि न सर्वदा सुखं कस्यचित् प्रकृतिभङ्गुराः श्रियः ।
राहुरामलकवन्मुखं दरे त्वां दिनैः कतिपयैः करिष्यति ॥४३॥
सर्वदैव हृदयं मलीमसं न क्षणं स्पृशति ते प्रसन्नताम् ।
तत्खलत्वमखिलोपतापिनः पुष्पकार्मुकनृपस्य वल्लभः ॥४४॥
इत्यनंगशरसंगदीपितप्राणनाथविरहाः क्षपामुखे ।
चन्द्रिकास्नपितविश्वमालपन् यामिनीदयितमेणलोचनाः ४५
इन्दुदीधितिषु शारदीष्वसौ मन्मथस्य करदीपिकास्विव ।
दुश्चरित्रमनुजस्य चिन्तयन्न प्रसादमभजन्नराधिपः ॥४६॥
तस्य संततमकीर्तिवार्त्तया मानसे कलुषतां समुद्वहन् ।
न प्रसादितमृगाङ्कयाप्यसौ नीयतेस्म शरदा प्रसन्नताम् ॥४७॥
कुन्तलेन्दुरभवत् कृपावशात्तत्र राज्यमपि दातुमुत्सुकः ।
कः प्रसन्नमनसां यशोर्थिनां श्रीसमर्पणविधौ परिश्रमः ॥४८॥
प्रहिणोत्कति न सान्त्वनक्रमांस्तत्समीपमनिशं विशांपतिः ।
एकमप्यनयवायुलङ्घितो नाग्रहीष्ट कुलकण्टकस्तु सः ॥४९॥
वैशसस्य कथमस्य शान्तिरित्येष यावदनुकम्पया स्थितः ।
तावदद्भुतभुजावलेपतः कृष्णवेणितटमाजगाम सः ॥५०॥
भूपमेनमपहाय तच्चमूमाश्रिताः कति न मण्डलेश्वराः ।
जायते मतिविपर्ययो नृणां प्रायशः परिभवे भविष्यति ॥५१॥
वीक्ष्य स द्विपघटाः कटस्थलीनिर्लुठद्बहलदाननिर्झराः ।
वाजिनश्च चटुलानमन्यत ज्येष्ठयोधनविधावकुण्ठताम् ॥५२॥

तच्चमूपरिकरेण पीडिता कृष्णवेणिरधिगम्य तानयम् ।
सिन्धुगर्भमिव गन्तुमक्षमा शोषतः कलुषतामदर्शयत् ॥५३॥
क्वापि दाहनपरत्र लुण्ठनं बंधनं क्वचिदुदारुजनस्य सः ।
पातचिह्नमिव तस्य भूयसी दुष्टचेष्टितपरम्पराभवत् ॥५४॥
तस्य दुर्नयपरम्परामसौ चक्षमे चिरतरं क्षमापतिः ।
तादृशैरमनसत्त्वराशिभिः स्पर्धितुं जलधयोपि नेश्वराः ॥५५॥
दुर्वचांसि सविधे धरापतेः स व्यसर्जयदनंकुशो निशम् ।
अश्रिया जडधियः कटाक्षिताः किं तदस्ति न समाचरन्ति यत ५६
ब्रूमहे किमधिकं तथा मुहुस्तत्र संततमवाप चापलम् ।
तं प्रति प्रचलितश्च विद्विषः सत्वरं वकुलीपतिर्यथा ॥५७॥
पूरितः प्रतिरवेण दिग्गजश्रोत्रशंखकुहरप्रसर्पिणा ।
दुन्दुभिध्वनिरभूद्यं ततस्तस्य मङ्गलनिनादनिर्भरः ॥५८॥
न क्षितीन्द्रपटहस्वनोभवद्दिक्करिश्रवणपाटने पटुः ।
यत् सुदीर्घकररन्ध्रपूरणाद्दृश्यतां प्रथममाससाद सः ॥५९॥
भूपतेः समभरेण दन्तिनां दूरमानमति भूमिमण्डले ।
नूनमम्बुदनिनादमेदुरः प्राप दुन्दुभिरवश्चिरान्नभः ॥६०॥
पन्नगेश्वरफणासु तद्बलक्षुण्णरेणुतलिनापि सर्वतः ।
आर्द्रतां गजमदाम्बुभिर्गता भूमिरित्यधिकमाप गौरवम् ॥६१॥
अब्धिषु स्थलपथीकृतेषु नः पूर्यते जलविधौ कुतूहलम् ।
इत्यकुर्वत दिगन्तगोचरं नूनमस्य तुरगाः क्षमारजः ॥६२॥
पृष्ठनिर्लुठितभूमिरेणवस्तस्य वारणवरा विरेजिरे ।
क्वापि भूमिमवतार्य तत्क्षणादागता इव समेत्य दिग्गजाः ॥६३॥
पस्पृशुर्न पृथिवीं तुरंगमाः स्पर्धयेव दिननाथवाजिनाम् ।
भोगिभर्तुरभवन् मतंगजस्थान एव नितरां परिश्रमः ॥६४॥
उन्मदद्विरदहस्तशीकरश्रेणिभिर्नभसि तस्य दर्शिताः ।
रेणुहारितपथस्य भास्वतश्चूर्णिता इव रथेन तारकाः ॥६५॥

उन्नतद्विपघटासमीपगः शोभतेऽस्म भगवान्दिवाकरः ।
उन्मदद्विरदसङ्गजां श्रियं त्याजयन्निजतुरंगमानिव ॥६६॥
रेजिरे करटिपृष्ठसंगताः स्वर्णरत्नमयभासिपङ्क्तः ।
भूमिरेणुभरतो नभस्तलात्पतिता इव विमान पंक्तयः ॥६७॥
भास्वतः करिभयावगाहनग्राहनैरिव निपातितोष्मणः ।
कुम्भिकुम्भतटपीनपिष्टतः प्राप रेणुविसरः समातजम् ॥६८॥
कोपतः प्रज्वलितोऽपि भूपतिः सांत्वनाय हृदि सत्वरोऽभवत् ।
येऽश्रयन्त्यपकरणं श्रियः कृते तेऽन्य एव कुनयांसनाः नृपाः ॥६९॥
अन्तिकीभवति निम्नगातटे तत्रतत्र परिपंथिनो भटाः ।
एत्य युद्धकरणेन कुन्तलक्ष्मापतेः क्रुधमदीपयन् पथि ॥७०॥
श्रीचालुक्यधुरंधरोऽथ रुधिरस्रोतस्त्रिणीगाहन-
क्रीडाकांक्षिणि कुञ्जरे कृतपदस्तं देशमाक्रान्तवान् ।
यत्रानेन करिष्यते प्रतिपथव्यावर्तिताम्भोभर-
भ्राम्यद्वीरकरंकसंकटतटा सा कृष्णवेणीसरित् ॥७१॥
अवनितिलकस्तत्रावासं विधाय सरित्तटे
घटयितुमिमं साम्नैवाभूदुपायपरायणः ।
कुटिलहृदयः सर्वस्तस्मान्न सांत्वनमग्रही-
द्भवति हि मतिर्भाग्यभ्रंशे नितांतमनंकुशा ॥७२॥

इति श्री विक्रमांकचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति
काश्मीरकभट्टबिल्हणविरचिते चतुर्दशः सर्गः ॥१४॥

भुजविक्रमदन्तितडिण्डिमः समरोत्साहशिखण्डिवारिदः ।
अथ कुन्तलभर्तुरध्वनद्विजयोद्योगविजासदुन्दुभिः ॥१॥
विजयोत्सुकवीरसुन्दरीकृतनिष्कम्पकतुष्कमण्डलाः ।
नरनाथपथावलोकनप्रगुणत्वं सुभटाः सिषेविरे ॥२॥
रणदुन्दुभिमेघनिस्वनैः सुभटश्रेणिविदूरभूमयः ।
अभवन्निसतासिवल्लरीनवरत्नाङ्कुरकोटिदन्तुराः ॥३॥
रणसंभ्रमलोलभङ्गिषु न्यपतन्नङ्कुनरागनिर्भराः ।
कबरीषु कुरङ्गचक्षुषामलिखासु च वीरदृष्टयः ॥४॥
अधिरोपितसारिपञ्जरस्थितिदर्पोद्धुरयोधमण्डलाः ।
अभजन्त गजाः स्थितिं बहिर्मणिसंनाहनिवेशपेशलाः ॥५॥
सुभटः प्रमदाकरार्पितं दलयन्नागरखण्डवीटिकाम् ।
रिपुदन्तिघटासु खण्डनं तृणमुत्साहवशादमन्यत ॥६॥
रिपुराजशिरःसु शेखरस्थितरत्नाङ्कुर कण्टकाग्रिषु ।
भ्रमणक्षमतां दधुः खुरास्तुरगाणां कृतलोहबन्धनाः ॥७॥
रणलम्पटमत्तकुञ्जरं स्फुरदश्वीयसहस्रसंकुलम् ।
तदनेकभटोद्भटं बलं क्षुभितस्याप लिपिं पयोनिधेः ॥८॥
करिणः करशीकरोत्करैः प्रहितैः क्ष्मापतिमन्दिरोदरे ।
विषिचुः क्षितिपस्य हृद्गतां विजयाशां कुसुमावलीमिव ॥९॥
द्वयमम्बुरुहामिव स्रजं विजयश्रीपरिरम्भशंसिने ।
स्फुरणप्रवणाय बाहवे बहुमानेन समर्पयन्नृपः ॥१०॥
पुलकाङ्कुरकण्टकोत्करानतिरागादविजानतीमिव ।
वपुषा सुभटश्रियं दधन्नविडालिङ्गनगाढकौतुकम् ॥११॥
हसितेन विनिःसरन्मुखस्थितकर्पूरपरागपाण्डुना ।
घटयन्प्रतिराजपङ्कजग्लपनार्थं तुहिनच्छटामिव ॥१२॥
वलयोदररत्नदर्पणप्रतिबिम्बच्छलतो निजाकृतेः ।
हरिणेव विपक्षसंक्षयव्रतभाजानुजयोरधिष्ठितः ॥१३॥

घनचन्दनलेपपाण्डुना वपुषा पोषितलोचनोत्सवः ।
परितः स्फटिकक्षमाभृता दधता कञ्चुकतामिवाश्रितः ॥१४॥
धृतमङ्गलमौक्तिकाततः क्षणदानाथ इवामलद्युतिः ।
मदवारणमन्थरैः पदैरथ निष्क्रम्य चतुष्कवेश्मनः ॥१५॥
त्वरयाधिरुरोह दन्तिनः कृतपूजस्य स पृष्ठमादरात् ।
सह मङ्गलतूर्यनिःस्वनैरुदयाद्रेरिव शृङ्गमर्यमा ॥ १६॥
क्षितिपेन करी विभूषितस्तरुणीनेत्रसहस्रसङ्गिना ।
हसतिस्म सुरेन्द्रदन्तिनः श्रियमारूढपुरंदरस्य सः ॥१७॥
महति क्षितिभर्तुराहवे निकटस्थे कुविकल्पदोलिताम् ।
अकरोज्जयकुञ्जरः स्थितिं स करास्फालनतः स्थिरामिव॥१८॥
नलिनीदलचारुकान्तिभिः पदचिन्हैर्मदवारिपूरितैः ।
सरसीमिव तापशान्तये रचयामास स पार्थिवश्रियः ॥१९॥
मदपानबहुप्रलापिनां भ्रमणानां करविभ्रमैरभूत् ।
रिपुवारणडिण्डिमध्वनिश्रवणायेव निवारणोन्मुखः ॥२०॥
अथ वीररसावतारतस्तरसा पल्लवितेन चेतसा ।
जगदद्भुतभूरिसाहसः प्रहसन्नुच्चलतिस्म पार्थिवः ॥२१॥
समराङ्गणसंगतिं भजन्विजयश्रीपरिरम्भणोत्सुकः ।
स बभार विलाससद्मनि प्रणयिन्याः प्रविशन्निवोत्सवम् ॥२२॥
कियतीमपि तीव्रविक्रमः समतिक्रम्य वसुन्धरां ततः ।
अवलोकयतिस्म भूपतिः प्रसरत्सूर्यरवं द्विषद्बलम् ॥२३॥
मदवारिसमुत्थशैवलद्युतिरोलम्बकलापजन्मनाम् ।
अदधुर्दशनांशुचन्द्रिकां तिमिराणामिव वारणाय ये ॥ २४ ॥
निजदानजलोत्थकर्दमस्खलनत्रस्ततयेव ये पथि ।
पदविन्यसनं दधुः क्रमान्मदनिद्रार्धनिमीलितेक्षणाः ॥२५॥
सरसीसलिलावगाहनग्रहिलाः स्वैरविहारकेलिषु ।
दलितादरविन्दमण्डलादधिरूढामिव ये दधुः श्रियम्॥२६॥

दधुरद्रिविघट्टनेषु ये पतितैर्मूर्धनि निर्झरैरिव ।
कलयन्तमतिप्रभूततां दानधाराजलदुर्दिनं मदम् ॥२७॥
श्रुतिभूषणशङ्खशुक्तिभिः शशिशुभ्राभिरथाश्रयन्त ये ।
मदनिर्झरिणीतटस्थलीं कलहंसीभिरुपासितामिव ॥२८॥
ननु कस्य निवेश्यतामिदं शिरसि प्राज्यभुजस्य भूभुजः ।
पदमेकमधारयन्निति ध्रुवमुच्चैस्त्रिपदीनिभेन ये ॥२९॥
कृतसन्नहनास्तथाविधाः करिणो यत्र सहस्रशः स्थिताः ।
मदलुब्धमधुव्रतस्वनैरगमन् यामिकतामिव श्रियः ॥३०॥
जलराशिनिवेशसंकटा जवरोधाय बभूव भूरियम् ।
कथिकां दशनैरखण्डयन्निति कोपादिव ये मुहुर्मुहुः ॥३१॥
अवलम्बविडम्बिनामिमां तरणेर्हन्त हया हसन्ति नः ।
वसुधामिति मत्सरादिव क्षपयन्तिस्म परिक्रमेषु ये ॥३२॥
अवलोक्य रवेस्तुरंगमान्नववैदूर्यनिभे नभस्तले ।
हरितासु तृणस्थलीषु ये विहरन्तिस्म वियद्भ्रमादिव ॥३३॥
वदनस्थितकेन मण्डलच्छलतो दुग्धपयोधिनेव ये ।
निजसूनुतुरङ्गशङ्कया परितोषादुपसृत्य चुम्बिताः ॥३४॥
खुरघट्टितवैरिकुट्टिमस्फुटितैर्वह्निकणैः कदर्थिताः ।
न निघर्षमकार्षु रङ्घ्रिभिश्चटुलैर्यत् क्वचिदेव वर्त्मनि ॥३५॥
निकटस्थितमेघडम्बरैः सुरचापैरिव तैस्तुरंगमैः ।
यदुदञ्चयतिस्म साध्वसं जगतां वज्रनिपातनिष्ठुरैः ॥३६॥
हृदयस्थितरत्नभूषणप्रतिबिम्बच्छलतः शिरांसि यैः ।
विधृतानि निजानि लीलया रणे निर्गहनैरिवोरसि ॥३७॥
सहजोष्मविशोषजर्जरं हृदि येषां विरराज चन्दनम् ।
समनीकशतप्रहारजं च्युतमस्थ्नामिव पाण्डुरं रजः ॥३८॥
प्रबलेन भुजद्वयेन ये वसुधस्त्रीणां महाहवार्णवाः ।
यशसः प्रणयित्वमागताः पृथुडिण्डीरकलापपाण्डुनः ॥३९॥

दिनानि तत्र क्षणवद् बहूनि नीत्वा विलासैः कुसुमास्त्रमित्रैः ।
ग्रीष्मप्रवेशे सह पक्ष्मलाक्ष्या देवोऽथ कल्याणसमीपगोऽभूत् ॥१॥

अस्मिन्क्षणे कुन्तलपार्थिवस्य प्रवेशमाकर्ण्य पुराङ्गनानाम् ।
आसन्विलासव्रतदीक्षितानां स्मरोपदिष्टानि विचेष्टितानि ॥२॥

विस्रस्तरत्नाङ्कुरकोटिभिन्नमुदञ्चितं वामपदं दधाना ।
बभार कापि व्रतमेकपादमाराधनायेव नरेश्वरस्य ॥३॥

कीर्णाश्रु कर्णोत्पलरेणुनैकमन्यत्सहासं नयनं वहन्ती ।
संकीर्णभावाभिनयप्रगल्भा रराज कापि स्मरनर्तकीव ॥४॥

गवाक्षरन्ध्रैरवलोकयन्ती लक्षीकृता कापि मनोभवेन ।
किप्यनङ्गस्य नितान्तचण्डकोदण्डपाण्डित्यमुदाजहार ॥५॥

वराङ्गना कुङ्कुमपाटलाङ्गी सलीलमुत्तम्भितबाहुवल्लिः ।
रागप्रवाहे गहने निमग्नः कश्चित्करालम्बमयाचतेव ॥६॥

वीराग्रणीरेष नृपः स्थितोग्रे शूरोसि चेदत्र विधेहि शौर्यम् ।
भयास्पदं स्त्रीषु विकत्थनेति काचिद्गिरा मन्मथमुन्ममाथ ॥७॥

नरेन्द्रलीलातपवारणस्य नेत्राञ्चलोत्थेन समीरणेन ।
निवार्यमाणश्रमवारिलेशा कृतार्थमात्मानममन्यताऽन्या ॥८॥

स्तम्बेरमारूढमगूढभावा निरीक्ष्य कापि क्षितिपं मृगाक्षी ।
मन्ये समानप्रतिपत्तिहेतोः कन्दर्पमत्तद्विपमारुरोह ॥९॥

निरादरं वीक्ष्य नृपं मृगाक्ष्या लीलानमत्कन्धरया कयापि ।
हृदि स्थितः कार्मुककर्षणार्थमयाच्यतेव प्रसभं मनोभूः ॥१०॥

वाचालकाञ्चीमणिकिङ्किणीकमुच्चैः क्वणत्कङ्कणमुच्चलन्ती ।
आलोकिता कापि नरेश्वरेण वैदग्ध्यगर्वोद्धुरकन्धराभूत् ॥११॥

ताडीदलेन श्रवणान्निपत्य श्वासानिलैरुल्लसतातिदूरम् ।
अदत्त वैदग्ध्य विवादहेतोर्वराङ्गनानामिव पत्रमेका ॥१२॥

गतेषु मन्दत्वमयं रुषा मे बद्धो नितम्बः सुतरां विधाता ।
इतीव काञ्चीवलयं विमुच्य त्वरावती कापि पुरः प्रतस्थे ॥१३॥

काचिन्नितम्बार्पितवामहस्ता दोर्लेखया कुञ्चितया नताङ्गी ।
क्षमापतौ मार्गणमोक्षदक्षमकल्पयच्चापमिव स्मरस्य ॥१४॥
औत्सुक्यतः कापि जवाद् व्रजन्ती लीलामरालैरनुगम्यमाना ।
अन्यायभीत्येव नृपं विलोक्य विलासिनी हंसगतिं मुमोच ॥१५॥
पार्श्वस्थितामालपति क्षितीन्दौ देवीमनङ्गोत्सववैजयन्तीम् ।
व्यावर्तितः कोपनया कयापि सस्पर्धमर्धप्रहितः कटाक्षः ॥१६॥
नृपान्तिकप्राप्तिकृतोपकारे मार्गवकीर्णैःपदयावकाङ्कैः ।
प्रतिक्षणं कापि मृगायताक्षी पूजामिवाम्भोजदलैश्चकार ॥१७॥
लीलावलत्कण्ठमकुण्ठभावा निरीक्षिता कापि नरेश्वरेण ।
मुमोह पुष्पायुधभिल्लभल्लभिन्ना कुरङ्गीव कुरङ्गकाक्षी ॥१८॥
सविभ्रमभ्रूलतिकानुवेलमुद्वेललावण्यरसोत्तरंगा ।
अनङ्गमारूढमपाङ्गरङ्गे वराङ्गना नर्तयतिस्म काचित् ॥१९॥
जृम्भासमास्फोटकराङ्गुलीकमखर्वदोर्वेणिकया कयाचित् ।
निरीक्ष्य राजानमजातरागमलज्यतेवातिरुषा मनोभूः ॥२०॥
शोणाश्मवातायनसीम्नि कापि स्थिता शरच्चन्द्रमरीचिगौरी ।
आत्मानमिद्धार्चिषि कामवह्नौ क्षीराहुतीभूतमिवाचचक्षे ॥२१॥
अभ्यागते कुन्तलभूमिपाले विधातुमातिथ्यमिवोत्थितेन ।
काचिन्नियुक्ता मकरध्वजेन दीर्घं कटाक्षस्रजमाततान ॥२२॥
प्रयासि हारत्रुटिमप्युपेक्ष्य भ्रष्टोत्तरीयापि न तिष्ठसि त्वम् ।
ध्रुवं प्रधावस्यवधीरणेन परिच्युतस्याधरवाससोपि ॥२३॥
न दूषणं भूषणवर्जिता यज्जवेन राजाभिमुखी गतासि ।
चित्रं तु तुङ्गस्तनभारगर्वाद्गृहीतमप्युज्झसि कञ्चुकं तत् ॥२४॥
मार्गे समेपि स्खलनच्छलेन किमुच्छलत्कम्पर्वं मुखं ते ।
मुग्धे कुमार्योपि कलाभिरत्र जयन्ति कान्तामपि मन्मथस्य ॥२५॥
असंशयं नीलसरोरुहाक्षि संमारुरोह त्वयि पञ्चबाणः ।
द्रुतैर्विनिर्यासि पदैर्यदेषा कशाहतेवोत्तरला तुरंगी ॥२६॥

अस्माकमालोकनविघ्नहेतोस्तरङ्गिताङ्गी पुरतःस्थितासि ।
किं तुङ्गवातायनसङ्गतानां करोषि मात्सर्यपरा परासाम् ॥२७॥
प्रकाशयन्ती कतिचिन्नखाङ्कान् किं चण्डि चण्डत्वमदं बिभर्षि ।
कासामिहानंगजयास्त्रमित्रैर्न गात्रमुच्चित्रितमर्धचन्द्रैः ॥२८॥
वैदग्ध्यगर्वस्तव सर्वदास्ति कथंचिदाराधय राजचन्द्रम् ।
नामाङ्किताम‍र्पय वर्णमालां सुवर्णपत्त्रे मकरध्वजस्य ॥२९॥
ससंभ्रमभ्रूयुगताण्डवानां विलासकोदण्डपुरस्कृतानि ।
सानन्दमित्थं पुरसुन्दरीणां नृपेन्दुना शुश्रुविरे वचांसि ॥३०॥
श्वश्रूं मुहुः श्रोत्रकठोरवाचं निरीक्ष्य पृष्ठे विनिवारयन्तीम् ।
अनङ्कुशत्वात्कृतपुण्यमेका पण्याङ्गनात्वं गणयांबभूव ॥३१॥
काचित्पदैरस्खलितैः सखेलं यातीषु शुद्धान्तकरेणुकासु ।
राजाङ्गनानामकरोदवज्ञां श्रोणीभरे वस्थितगौरवेव ॥३२॥
दृशां भृशं कामवशीकृतानां कस्याश्चिदालोकनकौतुकिन्याः ।
कर्णावतंसे च निजाञ्चलेच गतागतं योजनमात्रमासीत् ॥३३॥
उल्लङ्घ्य वीथीमथ राजहंसः पुराङ्गनालोकनवागुराणाम् ।
विवेश हर्म्याङ्गणकेलिवापीहंसावतंसां निजराजधानीम् ॥३४॥
प्रसाददानेन दृशार्द्रया च स तत्र संतोष्य समस्तलोकान् ।
अन्वग्रहीदद्भुतयौवनोष्मा ग्रीष्मानुरूपामुपभोगलक्ष्मीम् ॥३५॥
लावण्यलीलातरुकुड्मलाभमुक्ताविभूषः शुशुभे नरेन्द्रः ।
त्रैलोक्यनेत्रामृतनिर्झरस्य सशीकरासार इव प्रवाहः ॥३६॥
मुक्तावदातश्रमवारिलेशविशोभिलावण्यरसप्रवाहः ।
सावर्ण्यमर्णोनिधिना बभार स ताम्रपर्णीप्रणयीकृतेन ॥३७॥
श्रीखण्डपाण्डुस्तनमण्डलाभिरालिङ्गितोसौ मुहुरङ्गनाभिः ।
न केवलं ग्रीष्ममहोष्मसङ्गमनङ्गतीव्रातपमप्यजैषीत् ॥३८॥
स चन्दनालेपनशीतलेन गात्रेण चित्रं नरनाथचन्द्रः ।
प्रविश्य चित्तेषु मृगेक्षणानामनङ्गतापज्वरमाततान ॥३९॥

अङ्गान्यलङ्घयन्त विलेपनेन नृपप्रकाण्डस्य विपाण्डुराणि ।
समुच्छलन्त्या प्रणयीकृतानि लावण्यरत्नाकरवेलयेव ॥४०॥
अङ्गद्वये भूवलयावतंसः श्रीखण्डलीलातिलके बभार ।
जयामृतास्वादनतत्परापाः साम्राज्यलक्ष्म्या इव रूप्यपात्रे ४१
विभज्य दोर्भ्यां दधतो धरित्रीं तस्यांसयोश्चन्दनचित्रकाभ्याम् ।
ईषत्तुषारस्फटिकाचलेन्द्रशृङ्गद्वयीव प्रकटीबभूव ॥४२॥
अंसद्वयेन श्रियमाससाद स चन्दनस्थासकसुन्दरेण ।
दोर्मन्दरालोडितसंगराब्धिपीयूषपिण्डद्वयपाण्डुनेव ॥४३॥
नृपेन्दुना चन्दनचारुलेखा ललाटपट्टे लिखिता दधार ।
वक्त्रारविन्दस्थितसूक्तिदेवीदेवार्चनस्फाटिकलिङ्गभङ्गीम् ॥४४॥
वपुस्तुषाराचलतुङ्गमस्य व्यराजदालेपनचन्दनेन ।
विश्वप्रविष्टार्कमयूखतापशान्त्यर्थमाश्लिष्टमिवेन्दुभासा॥४५॥
शृङ्गारपाथोधितरङ्गभङ्गिरनङ्गविद्याधरखड्गलेखा ।
विलासिना संक्रियते स्म तेन स्नानावसाने कबरी प्रियायाः४६
वक्षःस्थले कुन्तलपार्थिवस्य श्रीखण्डभूपातिलकप्रकाशे ।
लक्ष्मीतुलाकोटिरवैर्मुखेन्दोः सरस्वतीहंस इवावतीर्णः ॥४७॥
शैत्यार्थमस्योद्वहतः कराब्जे चक्राभमम्भोरुहिणीपलाशम् ।
करान्तरे विभ्रमपुण्डरीकं रराज शौरेरिव पाञ्चजन्यः ॥४८॥
रराज राजीवविलोचनस्य हृदि स्थिता चन्दनपङ्कलेखा ।
मृणालिका वक्त्रगतोक्तिदेवीविमानहंसाननविच्युतेव ॥४९॥
प्रदर्शयन्तीव तुषारवर्षं विसारिणा शीकरडम्बरेण ।
समन्ततः स्फाटिककुट्टिमेन हिमं शिलीभूतमिवोद्वहन्ति ॥५०॥
परिस्फुरत्केतकपत्रभङ्ग्या घण्टासहस्रैरिव दन्तुराणि ।
अदृश्यसूर्याणि घनोपमानां नीरन्ध्रबन्धात्कदलीदलानाम् ॥५१॥
गवाक्षजालान्तरनिर्यदच्छनीरन्ध्रधारानिकरच्छलेन ।
निदाघसंरोधविमुक्तये व्यापारयन्तीव पृषत्कपङ्क्तिम् ॥५२॥

अत्यन्तशैत्यादिव संकुचद्भिरस्पृष्ट पूर्वाणि करैः खरांशोः ।
दुर्गाणि घर्मेऽपि हिमर्तुजीवरक्षाक्षमाणीव कृतानि धात्रा ॥५३॥
धारागृहाणि क्लममार्जनेन स्मरस्य चापश्रममादिशन्ति ।
मृगेक्षणाभिः सममध्युवास मध्यंदिने मध्यमलोकपालः ॥५४॥
चोलान्तकश्चन्दनपाण्डुरेषु नितंबिनीनां स्तनमण्डलेषु ।
सम्राज्यमानम्रजगत्त्रयस्य मेने मनोजन्मनराधिपस्य ॥५५॥
हिमाद्रिशृङ्गाधिकशीतलेषु वराङ्गनातुङ्गकुचस्थलेषु ।
घोरं निराकर्तुमसौ निदाघं विलेपनापाण्डुषु पण्डितोभूत् ॥५६॥
स्त्रीणामनालेपनशीलमङ्गं विपाटलः पाटलया समीरः ।
स्मरस्य वीरव्रतरक्षणाय तस्मिन्बभूव स्मितमल्लिका च ॥५७॥
प्रतारिताः कान्तिजलैर्वधूनां निपत्य यत्पाथसि दुग्धमुग्धे ।
न क्षीरनीरप्रविभागहेतोरन्यत्र हंसाः पुनरुत्सहन्ते ॥५८॥
रणद्द्विरेफेषु सरोरुहेषु यत्रोपविष्टाः प्रतिभान्ति हंसाः ।
समर्प्य लीलागमनं गृहीतमञ्जीरनादा इव सुन्दरीभ्यः ॥५९॥
यत्पङ्कजैः स्नानविनोदभाजां जाने नरेन्द्रप्रमदाजनानाम् ।
मुखेन्दुबिम्बैरविरोधहेतोः समर्पिता पादतलेषु लक्ष्मीः ॥६०॥
श्रोणीतटोल्लासितरङ्गदोलाविलासवाचालितसारसासु ।
स तासु रेमे सह कामिनीभिर्दीर्घासु लीलावनदीर्घिकासु ॥६१॥
विश्रान्तकान्ताकरयन्त्रधारं सरोजिनीपत्रममुष्य हस्ते ।
शोभां बभार स्मरकङ्कपत्रमैत्रीजुषः श्यामलखेटकस्य ॥६२॥
मीनाङ्कमीनस्य नरेन्द्रचन्द्रशरीरलावण्यजले स्थितस्य ।
असूत्रयद्बाडिशसूत्रशङ्कां दीर्घा मृगाक्षीकरयन्त्रधारा ॥६३॥
स राजहंसः करयन्त्रमुक्तधारालतापञ्जरमध्यवर्ती ।
उपायनीभूत इवाङ्गनाभिः क्षिप्तः करे मन्मथपार्थिवस्य ॥६४॥
तमेकवीरं करयन्त्रधाराधाराशतैर्व्याकुलितं वधूभिः ।
निःशङ्कमारोपितचापदण्डः शिलाशरव्यं मदनश्चकार ॥६५॥

स्तनाङ्गरागे लटभाङ्गनानां नरेन्द्रधाराम्बुद्रुते मनोभूः ।
रागं हृदि प्रच्युतिशङ्कयेव माञ्जिष्ठरागप्रतिमं ततान ॥६६॥
देवः कराम्भोरुहयन्त्रधारां क्षिपन्कपोले विपुलेक्षणायाः ।
कुमुद्वतीकामिनि रश्मिदण्डं प्रवेशयन्नर्क इव व्यराजत् ॥६७॥
आनम्य लीलापरिवर्तनेन विलङ्घयामास नरेन्द्रमुक्ताम् ।
कण्ठोन्मुखीं काञ्चनकम्बुकण्ठी स्मरासिधारामिव वारिधाराम् ॥६८॥
चकार कान्ताकुचपत्त्रभङ्गकस्तूरिकापङ्ककलङ्कितानि ।
वर्षाजलभ्रान्तिविलोलहंसहासानि लीलासरसीपयांसि ॥६९॥
नृपावरोधस्तनकुङ्कुमेन वापीपयः पाटलतामवाप्तम् ।
क्रीडानिमग्नस्मरकुम्भिकुम्भसिन्दूरसम्भिन्नमिवावभासे ॥७०॥
रराज कर्पूररजस्तरङ्गसङ्गलीलाङ्गणदीर्घिकाणाम् ।
गौरीपतिक्रोधहुताशशान्त्यै मग्नस्य भस्मेव मनोभवस्य ॥७१॥
अवाप कृष्णागुरुधूपधूमत्यक्तार्द्रभावेषु कचोच्चयेषु ।
आश्चर्यमिन्दीवरलोचनानां नितान्तमार्द्रत्वमयुग्मबाणः ॥७२॥
असंनिधानात्कुसुमाकरस्य पुष्पायुधः क्षीणनिषङ्गभारः ।
वामभ्रुवां सस्मितमल्लिकेषु धम्मिल्लबन्धेषु धृतिं बबन्ध ॥७३॥
नेत्राणि धात्रीतिलकाङ्गनानां तरङ्गलेखाहृतकज्जलानि ।
शाणोपलान्दोलननिष्कलङ्ककामास्त्रमैत्रीं कलयांबभूवुः ॥७४॥
लीलावगाहच्युतकुङ्कुमेषु लक्ष्यस्तदङ्गेषु नखाङ्कमार्गः ।
अङ्गाररत्नाकरतीरभाजां मुद्रां दधे विद्रुमपल्लवानाम् ॥७५॥

व्यधित तदनु देव्याः पत्रवल्लीं कपोले
विपुलपुलकलेखादन्तुरः कुन्तलेन्दुः ।
प्रतियुवतिभिरर्धैं ताडितः पाण्डुगण्ड-
स्थलविलुठितबाष्पव्यक्तिलक्ष्यैः कटाक्षैः ॥७६॥
रचयति कचलीलाबन्धमुत्कन्धरायाः
स्वयमवनिमृगाङ्के कौतुकेन प्रियायाः ।

स्थितमुपचितचिन्तातापताम्यत्कपोल-
ग्लपितकरसरो जल्लस्तराभिः पराभिः ॥७७॥
मधुसमयविरामश्यामवीर्यस्य शौर्यं
बहुभिरिति चरित्रैः सूत्रयन्पुष्पकेतोः ।
शिशिरमिव वमद्भिः प्रेयसीगात्रसङ्गै-
रपि जरठमजैषीद्ग्रीष्मगर्वं नरेन्द्रः ॥७८॥

इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति
काश्मीरकभट्टश्रीबिल्हणविरचिते द्वादशः सर्गः ॥१२॥

प्रतापमारोप्य परां समुन्नतिं गणः प्रदर्श्यैव च दावभस्मभिः ।
भजन्निदाघः कृतकृत्यतामिव स्वपौरुषाविष्करणान्न्यवर्तत ॥१॥
विधाय तैक्ष्ण्यं गमितान्यमूनि स प्रतापवह्नेः प्रथयित्वमाययौ ।
परोपतापैकपरायणाश्चिरं क्व वा भवन्त्यभ्युदयस्य भूमयः ॥२॥
दवानलप्लुष्टवनान्तभस्मभिः क्षमाधराः पांसुलमस्तकाः सिरे ।
गता इवाङ्के स्थितबालचन्द्रकप्रणोरथनैराश्यवशात्तपस्विताम् ॥३॥
निदाघसंपादितकार्श्यसंपदां तरङ्गिणीनां गलिता नितम्बतः ।
कलप्रलापाः कलहंसपङ्क्तयश्चकासिरे विभ्रममेखला इव ॥४॥
रवेः समस्तक्षितिमध्यगं रसं निपीय पीनत्वमतीव बिभ्रतः ।
भरेण वाजिष्विव मन्दगामिषु क्रमेण दैर्घ्यं दिवसाः प्रपेदिरे ॥५॥
न गन्तुमन्याः पदमप्यपारयन्नितान्तदीर्घं तनिमानमागताः ।
हिमाद्रिजाताभिरलम्भि केवलं नदीभिरव्धेः परिरम्भणोत्सवः ॥६॥
तुषारशैलद्रवनिर्झरोदकं समाहरन्नुत्तरभूमिनिम्नगाः ।
हिमोपचारार्थमनेकवाहिनीवियोगतप्तस्य सरित्पतेरिव ॥७॥
प्रबुद्धकार्श्याः परितापसंकुचत्सपङ्कपङ्केरुहिणीदलाङ्किताः ।
दशामलब्धावधिसमागमाश्चिरं वियोगयोग्यामभजन्त निम्नगाः ॥८॥
दृशं प्रपापालिकया प्रकाशिते न्यवेशयत्कुम्भधिया कुचद्वये ।
विवेद पान्थः कलशात्परिच्युतां न वारिधारां मुखसङ्गिनीमपि ॥९॥
पपुः प्रपापालिकया समर्पितं चिरेण पान्थाः कथमप्यनादरात् ।
तदीयबिम्बाधरपानलम्पटाः सपाटलामोदमपि प्रपाजलम् ॥१०॥
निरन्तराघट्टितपाटलाधराः क्रमान्निदाघस्य घनोष्मसङ्गिनः ।
व्यंरसिषुः श्वासमीरणा इव प्रबुद्धदावानलबन्धवानिलाः ॥११॥
गतायुषि ग्रीष्ममहोष्मडम्बरे दिनेऽपि चञ्चत्पुटकैर्विलासिभिः ।
कुचस्थलीचन्दनलेपपङ्किलप्रियाङ्कपालीसुखमन्वभूयत ॥१२॥
परस्परश्वाससमीरघट्टनत्रुटत्कपोलस्थलघर्मबिन्दुभिः ।
अपि प्रदोषावसरे विलासिभिः करम्बितान्योन्यभुजैरसुप्यत ॥१३

अस्माद्दृशाननजयी रघुराजपुत्रः
पञ्चाननं तु निजघान चुलुक्यवीरः ॥४४॥
अपि शरधिविकृष्टैश्छिदे कङ्कपत्रै-
र्निकटमपि न रोहिद्दर्भिणीचक्रवालम् ।
स्मरणसरणिमार्गाद्गर्भभारालसानां
विलसितमबलानां यद्बलाद्भूमिभर्तुः ॥४५॥
किंवा बहुप्रलपितैरवराहयूथ-
मुत्सन्नकेसरिकदर्थितरङ्कुसार्थम् ।
कुर्वन्नरण्यमुपसृत्य निषेव्यतेस्म
तत्रैव कुन्तलपतिः शिशिरश्रियापि ॥४६॥
यत्सुभ्रुवां घुसृणलेपकवोष्णमङ्गं
यद्यौवनोष्ममधुराणि कुचस्थलानि ।
कामस्य तत्सकलकार्मुकयामिकस्य
श्यामासु जीवितमजायत शैशिरीषु ॥४७॥
शुभ्रेषु राङ्कवपटेषु हसन्तिकासु
लीलाहसन्मलयजेन्धनपावकासु ।
कृष्णागरुज्वलनधूमशिखासु चासी-
त्त्रैलोक्यकार्मुकजयी मदनप्रतापः ॥४८॥
अङ्गारहासिषु विलासगृहोदरेषु
विस्तीर्णतूलपटकल्पितवेष्टनेषु ।
उष्णेषु च प्रणयिनीकुचमण्डलेषु
शान्तिं जगाम शिशिरस्य तुषारगर्वः ॥४९॥
गात्रेषु सौष्ठवकृता मृगयाश्रमेण
श्यामाभिरुल्लिखितमन्मथविस्तराभिः ।
आलिङ्गनैश्च सुदृशामनुरञ्जितोसौ
सर्वर्तुगोत्रतिलकं शिशिरं विवेद ॥५०॥

गौरीविभ्रमधूपधूमपटलश्यामायमानोदराः
कण्ठश्लोद्भयान्न ये कवलिताः श्रीकण्ठहारोरगैः ।
स्फारोन्मीलितशारदागृहबृहद्द्वारान्मुदा निर्गता-
स्ते श्लाघामलभन्त कुन्तलपतेः कैलासरौद्रानिलाः ॥५१॥
स्पृष्टाः स्तोकं वितस्तातटतुहिनकणैः पीडयन्तः पयोष्णीं
चञ्चन्तश्चन्द्रभागालहरिषु यमुनावीचिमैत्रीपवित्राः ।
धुन्वानाः सिद्धसिन्धोरुभयतटगतां देवदारुद्रुमालीं
तस्य प्रीत्यै बभूवुस्तुहिनगिरितटीकेलिकाराः समीराः ॥५२॥
इति नरपतिः सार्धं दारैरुदारविचेष्टितः
शिशिरसमयश्लाघ्यक्रीडासुखान्यनुभूय सः ।
नगरमगमल्लीलागारप्रमोदमुपासितुं
क्षणमपि कुतस्तादृक्षाणां विलासदरिद्रता ॥५३॥

*इति श्रीविक्रमाङ्कदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति-
काश्मीरकभट्टबिल्हणविरचिते षोडशः सर्गः ॥१६॥*

विधाय भूमेस्तलमस्तकण्टकं ववर्ष हेम्ना स सहर्षमर्थिनाम् ।
अकुर्वतां सर्वजनार्त्तिखण्डनं वृथा तडित्पल्लवचञ्चलाः श्रियः ॥१॥
चुलुक्यवंशे महतां महीभुजां महाभुजः शेखरतामसौ गतः ।
न मानुषीमेव निराचकार यः प्रजासु दैवीमपि चिच्छिदे रुजम् २
पयोभिरस्मान्परिपूरयन्ति ये पयोधयस्ते दधतेल्पवश्यताम् ।
इतीव तत्सेवनवाञ्छया जलं यथोपयोगं मुमुचुः पयोमुचः ३
अकालमृत्युर्न चचार कुत्रचित्क्वचिन्न दुर्भिक्षमलक्ष्यत क्षितौ ।
किमन्यदन्यायनिबर्हणो नृपः स राज्यमिक्ष्वाकुपतेरदर्शयत् ४
न भानुरत्यर्थमतापयज्जनं ववुः समीराः श्रममात्रहारिणः ।
फलानि भङ्क्त्वातिभरेण पादपान्भियेव पक्वान्यभजन्त पाण्डुताम्
जनैरवज्ञातकपाटमुद्रणैः क्षपासु रक्षाविमुखैरसुप्यत ।
करा विशन्तिस्म गवाक्षवर्त्मसु क्षमापतेश्छिद्रपथैर्न तस्कराः ६
दिशः कृताः संततपूर्यनिस्वनैरलक्ष्यदिक्कुञ्जरकण्ठगर्जिताः
पुरे पुरे संततमुत्सवादभूद्ध्वजांशुकप्रावृतभास्करं नभः ॥७॥
उदारशौर्यैकरसः क्षमापतिः स निर्विनोदः समरोत्सवं विना ।
समापिताशेषमदान्धभूपयोरसेवकत्वं भुजयोरमन्यत ॥८॥
क्रमादजायन्त निजाकृतेः समाः कुलप्रतिष्ठानिधयोऽस्य सूनवः
अनन्यसाधारणपुण्यशालिनां फलन्त्ययत्नेन मनोरथद्रुमाः ९
सुवर्णवातायनतुङ्गभूमिषु स्थिताः प्रसादं दधुरस्य नन्दनाः ।
कृतास्पदाः स्वीयविमानशङ्कया प्रविश्य विद्याधरबालका इव १०
अहं सदा प्राणसमं महीभुजामयं तु मां वेत्ति नृपस्तृणोपमम् ।
इतीव कर्णेषु सुवर्णमर्थिनां स्वखेदमाख्यातुमभूत्कृतास्पदम् ११
नरेन्द्रचामीकरचारुभूषणप्रभावलीसंगमपिङ्गलत्विषाम् ।
खलस्ततः प्लोषभियेव दुर्मतिर्मुमोच सङ्गं ज्वलतामिवार्थिनाम् १२
शिरःस्थदेवालयपालभीतितः प्रगल्भते खण्डयितुं न मामयम् ।
इति ध्रुवं काञ्चनभूधरोऽभवन्महीभुजि त्यागिनि तत्र निर्भयः १३

इहागतः खण्डनमेव लप्स्यते पलायनार्थं कनकाद्रिरुच्यतताम् ।
इतीव देशान्तरगामिनामभून्नरेन्द्रहेम श्रुतिलग्नमर्थिनाम् ॥१४॥
कृतो निवासः कमलाविलासिनः क्षमाभुजा तेन नितान्तमुन्नतः ।
विभाति धर्मस्य समुद्गतो भुजः कलिच्छिदे क्षमावलयोदरादिव१५
नभोङ्गणव्यापिनमुष्णदीधितेर्गुणद्वयं यं परिहृत्य गच्छतः ।
न लङ्घनं शार्ङ्गभृतः कृतं भवेत्तुरङ्गमाला च न भङ्गमश्नुते १६
अयं स कण्ठीरवतामुपागमद्विपाटनार्थं दनुजेन्द्रवक्षसः ।
इतीव भीतः कमलापतेः स्थितिं न यत्र धत्ते कलिकालकुञ्जरः १७
अवैमि नारायणनाभिपङ्कजं न लभ्यते यत्र मधुव्रतोत्करैः ।
दिवानिशं येन विनिःसरन्ति ते निभेन कालागुरुधूमसम्पदाम् १८
यदीयशृङ्गेषु विभाति मौक्तिकप्रभाकरैः काञ्चनकुम्भमण्डली ।
तृषा विनिक्षिप्य मुखं तुरंगमैः कृता खरांशोरिव फेनसङ्गिनी१९
पुरन्ध्रिनृत्येषु विनिर्यदंशुभिः प्रसर्पदानन्दजलैरिवेक्षणैः ।
श्रियं सजीवा इव यत्र संततं वहन्ति रत्नोत्करशालभञ्जिकाः॥२०॥
वितानरत्नप्रतिबिम्बडम्बरैर्वहन्ति यत्प्राङ्गणसीम्नि लासिकाः ।
अवाप्तविद्याधरराजसुन्दरीपदा इव व्योम्नि विहर्तुमुद्यताः॥२१॥
अकारयत्कारणमानुषः पुरस्तडागमेतस्य स रुद्धदिङ्मुखम् ।
उपैति येनानुपमश्रिया तुलामसौ गतश्रीः कथमम्भसां निधिः॥२२॥
नभः स्रवन्त्या इव शेषवारिभिः परिच्युतैरच्युतपादपद्मतः ।
प्रविश्य देवालयगर्भमागतैर्विपाण्डुभिर्यः सलिलैर्विशोभते ॥२३॥
प्रदानलोभादिह भर्तुरस्य चेत्कदाचिदागच्छति कुम्भसंभवः ।
छिनद्मि तद्दर्पमितीव यस्तटत्रुटद्धिटङ्कोर्मिरवेण गर्जति ॥२४॥
किमाद्रृतक्षारपयोधिसङ्गमा बिभर्षि भागीरथि दुर्भगाव्रतम्
इतीव यः कर्षति हर्षगद्गदस्तरंगहस्तैर्नभसः सुरापगाम् ॥२५॥
अवाप्य बन्धेन लघुत्वमब्धिना वितर्क्य पित्रा सुरराजकुञ्जरः
प्रभुतमात्मानमनिन्दितात्मनो ब्रवीति यस्माद्भुवमभ्रमोः पुरः॥२६

निपीय यत्पाथसि नूनमम्बुदैरवापिते शुक्तिषु मौक्तिकश्रियम् ।
पुराणमुक्तामणिभिर्न लप्स्यते कुचस्थलारोहणमेणचक्षुषाम् २७
अपास्य पाथोधिमसंख्य निम्नगामुखार्पणोच्छिष्टमरोचकादिव
तपात्यये जह्नुरूपान्तशैलजाः कुमारतां यस्य सगर्वमापगाः २८
निरन्तरं ब्रम्हपुरीभिरावृतं चकार तत्रैव पुरं स पार्थिवः ।
विरञ्चिलोकात्सुरलोकतश्च यद्विभूष्य भागाविव कौतुकात्कृतम् ।
क्षपासु यत्रैकमपास्य चुम्बति द्वितीयवातायनमङ्गनामुखे ।
विशङ्कितः सौधविटङ्कलङ्घनात्प्रविश्य मध्यं व्रजतीव चन्द्रमाः३०
यदीयसोपानपथाधिरोहणे नितम्बिनीनां विनिपातभीतितः ।
मयूखदण्डैस्तपनीयनिर्मिताः करावलम्बं ददतीव भित्तयः॥ ३१॥
यदग्रवातायनशृङ्गसद्मनामतीव तुङ्गत्वमवाप दूषणम् ।
यदत्र चित्रस्थितकुञ्जरक्रुधा प्रधावनं शक्रगजस्य शङ्क्यते ॥३२॥
स्थितासु यत्रोपरि भूमिकुट्टिमस्थलीषु तुङ्गासु निरन्तरासु च ।
त्यजन्ति मार्गं तुरगाः कियत्यपि ध्रुवं निरालम्बगतिश्रमं रवेः॥३३॥
निशासु यत्र प्रतिबिंबवर्त्मना समागतश्चारुदृशां निशाकरः ।
विलासदोलायितकुण्डलाहतः कपोललावण्यजले निमज्जति ।३४
पिता हरिः श्रीर्जननी तयोरिदं पुरं ममैवेति विचिन्तनादिव ।
अजस्रमन्यायसहस्रकारिणः स्मरस्य यत्रास्ति न कश्चिदङ्कुशः ॥३५॥
ददौ स दानानि महान्ति षोडश प्रतापशाली प्रतिपर्व पार्थिवः ।
तदन्तिकाद्दानजलैः सकर्दमान्निपातभीत्येव कलिः पलायितः ।३६॥
अधत्त तुङ्गेषु सुवर्णराशिषु प्रदानशीलस्तृणबुद्धिमेव सः ॥
बभूव लोभास्पदमस्य भूपतेर्यशः परं चन्दनपिण्डपाण्डुरम् ॥३७॥
सुवर्णदानप्रवणोऽत्र शङ्कितः सुवर्णशैलः शिखरैः समुन्नतैः ।
समस्पृशत्पारदपिण्डशङ्कया विपाण्डुरत्वार्थमिवेन्दुमण्डलम् ॥३८
रिपुं विजित्य द्विजकल्पशाखिना कृतेमुना हेमतुलाधिरोहणे ।
गिरेरगस्त्यागमशङ्कया चिराद्बभूव तस्योन्नमने मनोरथः ॥३९॥

अयच्छत स्वच्छमतीव काञ्चनं विशङ्क्य यस्मात्कनकक्षमाधरः।
अदर्शयत्कालिकयेव संगतिं स्वहेम्नि संक्रान्तनिभान्नभश्रियः॥४०॥
प्रदानलीलारसिकः प्रतापवान्विधाय रिक्तानि कुलानि भूभुजाम्
अपूरयत्सोर्थिगृहाणि हेमभिर्यशोभिराशावदनानि चोज्वलैः॥४१॥
कृतस्थितिर्मूर्धनि चक्रवर्तिनां स विश्वचक्रर्द्धिविधानतत्परः।
उदारशीलः प्रतिकूलतामगाद्दरिद्रनिर्माणपरस्य वेधसः॥४२॥
विपक्षदुर्भिक्षकदर्थितश्चिरं स शौर्यकण्डूलभुजः क्षितेः पतिः।
निशम्य चोलं बलगर्वितं पुनर्जगाम काञ्चीं समनीकतृष्णया॥४३॥
श्रियः समुत्थापनवार्धिमन्थनं कलिप्रियस्येक्षणपारणं मुनेः।
क्षयापणं निर्जरपण्ययोषितां क्रमेण तौ तत्र रणं वितेनतुः॥४४॥
महाभटानां करवालयष्टयः समुच्छलद्वीररसोर्मिनिर्मलाः।
विनिर्गताः कोशबिलोदरात्ततः कृतान्तपाशोरगसंनिभा बभुः॥४५॥
परस्परं मत्सरतः प्रधाविताः प्रभूतसौभाग्यवशाज्जयश्रियः।
किमप्यविद्यन्त बलद्वये भटाः पुरोगतैः शीघ्रतया शरैरपि॥४६॥
हृदि प्रविष्टं दशनं निजासिना निकृत्य कश्चित्करिणां न्यवारयत्
चकार रन्ध्रे कृतकीलकार्पणः प्रतिक्रियां जीवविनिर्गमस्य च॥४७॥
अतिष्ठदंसे सुभटस्य चञ्चलं शिरः क्षुरप्रेण यदर्धखण्डितम्।
तदेष वामेन विधृत्य पाणिना प्रधावितः कं न चकार बन्दिनम्॥४८॥
सकङ्कटःकश्चिदुरस्तटत्रुटत्पृषत्कनिष्ठ्यूतहुताशनो भटः।
विवेद नो धूमलताभिशङ्कया मुखे कृपाणं रिपुणा निवेशितम्॥४९॥
रदाङ्कुरप्रोतमरालिदन्तिना मुखं दधानः पुलकोत्कराञ्चितम्।
पिबन्निवालक्ष्यत कोपि लीलयामृणालदण्डेन यशःसुधारसम्॥५०॥
विपक्षशस्त्रक्षपणैःपुनःपुनः क्षताखिलग्रन्थि निजास्थिपञ्जरम्।
चकार चण्डद्युतिमण्डलोदरे सुखप्रवेशार्थमिवापरो भटः॥५१॥
पदेपदे शोणितपङ्कपातिनी दिनेश्वरस्य प्रतिबिम्बमालिका।
अकापदाप्मानकुतूहलागतसपापक्षीव चक्रोपमेयताम्॥५२॥

लघु प्रहर्तुं प्रतिपन्नमक्षमः प्रविष्टनाराचचयातिभारतः।
भटेन केनापि सरोषमीक्षितः प्रभूतवैलक्ष्यवता निजो भुजः॥५३॥

भटेन नीतः श्रुतिहस्तखण्डनान्महाकरी निग्रहणोचितं विधिम्।
ममज्ज लज्जामिव धारयन्भृशं कृशानुवर्णे रुधिरापगाभरे॥५४॥

रदद्वयेन स्फुटितेन पाटनात्परिस्फुटद्दन्तचतुष्टयद्युतिः।
अमर्त्यभावं भटपेटके भजत्यमर्त्यदन्तित्वमवाप कुञ्जरः॥५५॥

विषाणिनां तीक्ष्णखुरप्रखण्डिता सुदूरमुड्डीय रणाङ्कुशच्युताः।
सुरप्रसूनावलिशङ्किभिर्भटैर्न वञ्चितास्तान्मुकुटेष्वताडयन्॥५६॥

निवेशनीयौ न शिरीषकोमलौ भुजौ त्वया संवरणस्रजः पदे।
महार्घपुष्पे समयेत्र मेनके द्यु मालिकास्ते कलयन्ति लुब्धताम्।५७

न भर्तृदुर्भिक्षमिहास्ति किंचन किमन्यया स्वीकृतमेव वाञ्छसि
विलोपयिष्यन्ति तव प्र लम्भतां स्वयं परीक्षाविषये सुराङ्गनाः॥५८

अमी विमानेष्वधिरोपितास्त्वया मुधैव मूर्छामुकुलीकृतेक्षणाः
अवाप्य संज्ञां कृतफालमुत्सुकाः पतन्ति पश्य प्रधनाङ्गणे पुनः॥५९

विभिन्नमर्यादममुष्य चेष्टितं भटस्य पश्य प्रथम तिथेरपि।
विमानवातायनतो यदन्यया विलोकितस्तां प्रतिसत्वरोभवत्।६०

कयात्र माला प्रथमं समर्पिता न वेद्मि वादे युवयोस्तदन्तरम्।
तदेष सौभाग्यनिधिर्भटाग्रणीः करोतु वाचा स्वयमेव निश्चयम्।६१

विलोभ्य सौभाग्यमदाद्भटोनया सलीलमन्तर्हितया प्रतारितः।
अयं स्मरान्धस्तरसा पराङ्मुखीं भ्रमात्पिशाचीमुपसृत्य मुञ्चति ६२

न नारदादस्ति परो विशारदः परोपकारप्रवणासु वृत्तिषु।
क्षणात्समुत्पाद्य महारणानि यः करोति नः कार्मुकदुर्गतिच्छिदम्६३

सहर्षमित्यप्सरसामजायत प्रजागरं पञ्चशरस्य तन्वती।
प्रवीरकण्ठग्रहशान्तकौतुकप्रधावितानां श्रवणामृतं कथा॥६४॥

अत्रान्तरे नरपतिर्जयकुञ्जरस्य
    ज्यानादनिष्ठुरमधिष्ठितपृष्ठपीठः ।
शिलाशरव्यवदरातिचमूभटानां
    नाराचपङ्क्तिभिरपूरयदाननानि ॥६५॥
आरोहकान्करिषु वाजिषु चाश्ववारा-
    न्पोतान्पदातिनिवहाँश्च विधाय भूमौ ।
नामाङ्कितैरिषुभिरेष चुलुक्यवीर
    श्चोलस्य कीलितमशेषबलं व्यधत्त ॥६६॥
ब्रूमः किमन्यदयमुत्सवतेस्म यत्र
    द्वय्येव तत्र गतिराविरभून्नृपाणाम् ।
कारागृहे पतनमाशुपलायनं वा
    चोलोपि शीघ्रमपसारमलश्चकार ॥६७॥
अथ शिथिलितचापश्चोललक्ष्मीं गृहीत्वा
    कृतविविधविनोदस्तत्र काञ्चीनगर्याम् ।
निजनगरमगच्छत्सान्द्रमातङ्गसेना
    भरभरितदिगन्तः कुन्तलक्ष्माभुजङ्गः ॥६८॥

इति श्रीविक्रमांकदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति
काश्मीरकभट्टबिल्हणविरचिते सप्तदशः सर्गः ॥१७॥

काश्मीरेषु प्रवरपुरमित्यस्ति मुख्यं पुराणां
यातं गौरीपरिचयविधौ स्वामितामिन्दुमौलिः ।
यस्यायान्ति प्रकृतिकुटिलास्ते वितस्तातरंगाः
स्वेच्छाधावत्कलियुगगजाघोरणत्वेऽङ्कुशत्वम् ॥१॥
उद्यानेभ्यः सकलभुवनाश्चर्यमाधुर्यधुर्यं
पीत्वा द्राक्षारसमिव करैर्जातसंतापशान्तिः ।
ज्येष्ठाषाढेष्वपि कमलिनीकामुको यत्र धत्ते
रत्नश्रेणीकिरणकलिकाकोमलामंशुमालाम् ॥२॥
कृत्वा शैलं करतलतुलाकूटमर्धेन्दुमौले-
र्हास्यज्योत्स्नां दशसु विसृजन्दिक्षु दर्पोद्धुरास्यः ।
यस्मादुच्चैः स्फुरितमहसां ब्राह्मणानां निवासा-
च्छापत्रस्तस्त्वरितमगमद्दूरतः पुष्पकेण ॥३॥
उत्तुङ्गानां मणिगृहभुवां यत्र वातायनेषु
व्याख्याभिख्याप्रणयिनि जगद्दुर्लभे सूरिचक्रे ।
देवाः प्रोद्यद्विपुलपुलकाः किं न वर्षन्ति पुष्पै-
र्नाशङ्कन्ते यदि सुरगुरोस्तत्र वैलक्ष्यदीक्षाम् ॥४॥
धत्ते यस्याः स्फटिकशुचिभिः क्षालयन्त्या यशोभिः
स्थित्या गौरीगुरुरपि गिरिर्नूनमुच्चैः शिरांसि ।
गङ्गास्पर्धोद्धुरमधुमतीसैकतोत्तंसहंसी
विद्यारत्नाधिकृतमकरोत्सा स्वयं शारदा यत् ॥५॥
ब्रूमः सारस्वतकुलभुवः किं निधेः कौतुकानां
तस्यानेकाद्भुतगुणकथाकीर्णकर्णामृतस्य ।
यत्र स्त्रीणामपि किमपरं जन्मभाषावदेव
प्रत्यावासं विलसति वचः संस्कृतं प्राकृतं च ॥६॥
मन्ये मन्थाचलविदलितान्निर्गता दुग्धसिन्धो-
र्भूत्वा यस्मिन्नमृतलहरी सत्कवीनां वचांसि ।

प्रेमाकूतं कुवलयदृशां शीकरैः पूरयन्ती
द्राक्षाखण्डेष्वमृतकिरणापाण्डुषु स्थैर्यमाप ॥७॥
दुर्लभ्यत्वं कलियुगदृशां प्रापिते ब्रह्मधाम्ना
क्षिप्त्वा विद्याविभवमखिलं यत्र विश्वासधाम्नि ।
स्थाने तत्र त्रिनयनगुरोर्निर्जने नूनमद्रेः
सा वाग्देवी भजति शमिताशेषतापा तपांसि ॥८॥
तीरद्रुद्रुमप्रणयिभवनव्रातवातायनस्थ-
स्वैरक्रीडोच्छलितमिथुनच्छिन्नहारावकीर्णा ।
यस्योत्संगे कुलसरिदसौ नीलकण्ठप्रसूता
धत्ते तारातिलकितनभःसङ्गिगङ्गानुकारम् ॥९॥
स्नानक्रीडाव्यसनसमये कुङ्कुमं कामिनीनां
यत्रोत्तार्य स्तनपरिसराद्गृह्णती कान्तमङ्के ।
ईर्ष्यामर्षादिव निरवधिर्वीचिहस्तैर्वितस्ता
कर्षत्यासां प्रतिकलमलिश्यामलान्केशपाशान् ॥१०॥
यस्मिन्क्वापि स्फुरति ललिता श्रीकटाक्षच्छटासु
श्रीमद्भट्टारकमठपुरोपान्तसीमन्तिनीनाम् ।
या निःशङ्कं श्रुतिकुवलयस्थापलापप्रवृत्ता
भग्ना किं चित्परिमलमिलद्भृङ्गकोलाहलेन ॥११॥
यस्मिन्सख्याः कथमशिथिलप्रेङ्खितभ्रूलतानां
किंचिल्लीलामसृणमुकुलाः कामिनीदृष्टयस्ताः ।
यासां भासाकुलितहरिणप्रेयसीभंगुराणा-
मुत्संगस्थः किमपि भजते चापलं पुष्पचापः ॥१२॥
यस्य श्राम्यद्भ्रमरपटलश्यामकेलिद्रुमाणा-
मारामाणामविरलतया कोऽप्यसौ संनिवेशः ।
यस्मिन्रामाः कुसुमधनुषं दुर्भिहन्मार्गभर्ग-
क्रोधज्वालाकिसलयचये ज्ञमुत्थापयन्ति ॥१३॥

अङ्कात्लङ्कापतितरलिताद्याः शिला विप्रकीर्णाः
प्राप्त्यै तासां स्फटिकशिखरी वेद्मि पर्युत्सुकोऽपि ।
आस्ते गौरीपतिवृषखुरक्षोदचिह्नान्यपश्य-
न्यद्गेहानां कलहविमुखः स्फाटिकेष्वङ्गणेषु ॥१४॥
यक्षग्रस्ता धनपतिपुरी निष्कलङ्का न लङ्का
सातङ्केव त्रिदशनगरी मेरुपृष्ठेऽधिरूढा ।
इत्यप्राप्य प्रतिभटतया नूनमुच्चैः सगर्वं
यत्प्रद्युम्नक्षितिधरनिभादुत्तमाङ्गं बिभर्ति ॥१५॥
काठ्यं येभ्यः प्रकृतिसुभगं निर्गतं कुङ्कुमं च
च्छायोत्कर्षाद्वति जगतां वल्लभं दुर्लभं च ।
यस्मिन्नन्तः स्थितवति जगत्सारभूते प्रयाताः
काश्मीरास्ते नियतमुरगाधीश्वरक्षास्पदत्वम् ॥१६॥
लीलावल्गत्सरसमसृणभ्रूविलासानि यासां
कन्दर्पश्री यदि युगशतैः शिक्षते वीक्षितानि ।
रामाः श्यामा रमणरुचयस्ताः कियत्यो न यस्मि-
न्हर्षोत्तालाः सरणिषु रणत्काञ्चयः संचरन्ति ॥१७॥
देवोद्यानेष्वपि तिलकतां पुण्ययोगादवाप्तै-
र्विस्मर्यन्ते न खलु निखिलाश्चर्यसारा यदीयाः ।
श्रीखण्डाम्भःस्नपितमुरलप्रेयसीगण्डपाण्डु-
द्राक्षाखण्डस्तवकितलतामण्डपास्ते वनान्ताः ॥१८॥
अस्त्यन्योन्यग्रथितलहरीदोर्लताबन्धबन्धु-
र्मध्ये यस्य क्षपितकलुषः संगमः पुण्यनद्योः ।
यस्योत्संगे हलधरकृतास्ते जयन्त्यग्रहारा
ये धर्मस्य क्षतकलिभयाः शैलदुर्गीभवन्ति ॥१९॥
यस्मिन् किंचिन्न तदुपवनं यत्र नो केलिवापी
नैषा वापी न विषमधनुष्कार्मणं यत्र रामाः ।

नासौ रामा मनसिजकथाधातभग्ना युवानः
कामं यस्यां न निविडतरप्रेमबन्धे पतन्ति ॥२०॥
यद्भूषायां विहितवपुषस्तस्य विश्वैकबन्धोः
स्फूर्तिः कीर्त्तिः परमनुपमा सापि विद्यामठस्य ।
यस्मिन्नङ्गीकृतकलकला मेखलाः कामिनीनां
पृष्ठे लग्नं कुसुमधनुषः स्यन्दमप्याक्षिपन्ति ॥२१॥
वैतस्तानां स खलु पयसां संगमो यत्र चर्या
मर्यादायाः कृतयुगभुवः पात्रभूतोद्भुतश्रीः ।
दोलालीलातरलगतिषु प्रेङ्खितायत्तरङ्गै
रुत्सङ्गेषु त्रिदशसुदृशां देहभाजः पतन्ति ॥२२॥
तत्पर्यन्तस्थितगुणनिकामग्रहपं यत्र धत्ते
धाम व्योमाङ्गणतिलकतां क्षेम गौरीश्वरस्य ।
रामा रामानुकरणविधौ यत्र नाट्यप्रयोगे
योगस्थानामपि सपुलकं गात्रमासूत्रयन्ति ॥२३॥
संग्रामोर्वीपरिवृतमठप्रान्तसीमन्तितोसौ
यस्मिन्नक्ष्णोर्वितरति सुधां चन्द्रसीमाप्रदेशः ।
यत्रानन्तक्षितिपतिकृतास्ते वितस्तोपकण्ठे
याताः कान्त्या हरधवलया हारतामग्रहाराः ॥२४॥
गर्जद्वातायनविततयः शास्त्रगोष्ठीवरिष्ठै
स्ताः काष्ठीलद्विजवसतयो यत्र नेत्रोत्सवाय ।
यासु त्रासं विदधति कलेर्दर्शनादेव विप्राः
सायं प्रातः प्रहुतहुतभुग्धूमधूम्रैः शिरोभिः ॥ २५ ॥
यत्रानन्तक्षितिपगृहिणीशंकरागारपार्श्वे
तत्तुङ्गिम्ना त्रिभुवनमनोरंजनं गंजधाम ।
श्रुत्वा श्रुत्वा रुतमविरतं यत्र पारावतानां
दक्षाः कण्ठध्वनिषु शनकैः पौरकन्या भवन्ति ॥२६॥

यत्क्षेत्रेषु स्थितिमरचयद्धूलकलं यत्विषेवे
जाने जैत्रं किमपि तपसस्तस्य माहात्म्यमेतत् ।
तत्तत्तस्य प्रथमवयसः स्त्रीजनस्याङ्गकानां
यत्काश्मीरं कनकसुहृदामन्तरङ्गत्वमेति ॥ २७ ॥
गेहं यत्र प्रवरगिरिजावल्लभस्याद्भुतं त-
त्केषामाशां सुरपतिपुरःरोपणे नातनोति ।
यद्यातस्य प्रवरनृपतेर्द्यां शरीरेण सार्धं
स्वर्गद्वारप्रतिममुपरि च्छिद्रमद्यापि धत्ते ॥ २८ ॥
दृष्ट्वा यस्मिन्नभिनयकलाकौशलं नाटकेषु
स्मेराक्षीणां मसृणकरणासक्तदत्ताङ्गहारम् ।
रम्भा स्तम्भं भजति लभते चित्रलेखा न रेखां
नूनं नाट्ये भवति च चिरं नोर्वशी गर्वशीला ॥२९॥
यस्मिन्नुर्वीपतिगृहततेस्तुङ्गिमा वर्ण्यते किं
तस्याश्चञ्चच्चतुरवनिताभूषितानेकभूमेः ।
जाने यस्यां कुसुमधनुषः स्वर्गरामामनांसि
क्रीडावातायनकृतपदस्यैव लक्षीभवन्ति ॥ ३० ॥
यत्र स्त्रीणां मसृणघुसृणालेपनोष्णा कुचश्री
स्ताः कस्तूरीपरिमलमुचः पट्टिका राङ्कवाणाम्
नौपृष्ठस्थाः शिशिरसमये ते वितस्ताजलान्तः—
स्नानावासाः प्रचुरमपि च स्वर्गसौख्यं दिशन्ति॥३१॥
वक्त्रन्यस्तैस्तुहिनशकलैर्दन्तुरा वारिकुम्भाः
काश्मीरीणां सरसकदलीकोमला गात्ररेखाः ।
भीष्मग्रीष्मक्लमविरतये सर्वसाधारणत्वम्
यस्मिन्नायान्त्यपि हिमशिलाशीतलानि स्थलानि ॥३२॥
सत्यत्यागप्रमुखनिखिलोत्कर्षसंपत्तिसीमा
तस्मिन्नासीदवनिवनितावल्लभोनन्तदेवः ।

वैरिस्तम्बेरमघनघटागर्जितानामगम्ये
चक्रे धारापयसि यदसेः कीर्तिहंसी निवासम् ॥३३॥
दत्वा शोकं शकपरिवृढप्रौढसीमन्तिनीनां
येन क्रीडाविदलितदरद्दीर्घदर्पः कृपाणः ।
अस्पृश्यानामिव परिचयाद्बिभ्रता दोषशङ्कां
धौतः क्षोणीवलयजयिना जह्नुकन्याजलेषु ॥३४ ॥
कर्तुं कीर्त्या तिलकमलकागोपुराणां गतेन
क्रौञ्चस्याङ्के भृगुपतिशरच्छिद्रमद्रौ विलोक्य ।
येन क्रीडालवशबलिताः पीवरे बाहुदण्डे
चण्डध्वाने धनुषि च रुषा सूत्रिता दृष्टिपाताः ॥३५॥
सिद्धैरध्यासिततटभुवः स्नातसप्तर्षिहस्त-
न्यस्तश्यामत्तिलतिलकितस्रोतसो मानसस्य ।
यत्कान्ताभिः शिरसि विधृताः स्वारसौभाग्यलोभा
त्कैलासस्थत्रिनयनवधूलालिताङ्गास्तरङ्गाः ॥३६॥
यः संतोषं चरितविषये पूर्वपुंसां न भेजे
सारग्राही रघुपतिकथामत्सरादेकवीरः ।
क्रुद्धः क्रीडोद्धृतहरगिरेस्ते हि रोहत्कलङ्क
लङ्काभर्तुर्भुजतरुवनच्छेदनं नार्धचन्द्रैः ॥३७॥
यस्यासीन्मि क्षितिपतिकथाधाम्नि दाराभिसारे
त्रैगर्तीषु क्षितिषु भवने भर्तुलक्ष्मीभर्तुः ।
क्रीडाशैलीकृतहिमगिरेर्हासभीतेव यस्य
भ्राम्यत्याशा सुकृतवसतेर्भूप्रतापोदयानाम् ॥३८॥
कृत्वामध्ये मठमनुपमोत्तुंगदुर्गानुकारं
वैतस्त्येन ग्रथितपरिखारेखमम्भोभरेण ।
लग्नाः श्रृङ्गैर्नभसि विजयक्षेत्रभट्टाग्रहाराः
प्राकारत्वं कलिभयभिदे येन धर्मस्य नीताः ॥३९॥

देवी तस्य प्रचुरयशसश्चन्द्रकेवेन्दुजाता
याता ख्यातिं जगति सुभटेत्यादिभार्या बभूव ।
मन्ये यस्याः स्थितिमनुपमां सापि कुण्ठानुकर्तुं
वैकुण्ठोरःस्थलजलधरोत्सङ्गसौदामिनी श्रीः ॥४०॥
तस्यास्त्यागव्रतविलसिते कः परिच्छेदमुद्रा-
माविष्कर्तुं प्रभवति दयाक्षान्तिदाक्षिण्यसीम्नः ।
लक्ष्मीं यस्याः क्षितितलगतां पाददासीमकार्षी-
द्भर्तुः क्षोणीपतिशतशिखारत्नशाणः कृपाणः ॥४१॥
नो कायस्थैः कुटिललिपिभिर्नो विटैश्चाटुदक्षै-
र्न प्रत्यक्षस्तवनपटुभिर्लुण्ठिता गायनैश्च ।
देवागारद्विजगुरुगृहाण्येव यत्संगृहीता
याता लक्ष्मीर्निजचपलतादोषशुद्ध्यर्थिनीव ॥४२॥
श्रीकाश्मीरक्षितिभुजि गते वश्यतां यत्गुणाना-
मूहुश्चिन्ताक्लमपरिचयं कानि नान्तःपुराणि ।
स्वच्छा कीर्तिर्नभसि बिसिनीपत्रमित्रे लुलोठ-
श्चोतद्धारासलिलमकरोद्धामलक्ष्मीः कृपाणम् ॥४३॥
कीर्तिज्योत्स्नास्नपितभुवनश्रीरधिष्ठानमध्ये
शोभाज्येष्ठं मठमकुरुत स्वीयनामाङ्कितं सा ।
यस्मिन्विद्यारसिकमनसामास्पदे देशिकानां
का नामाक्षोत्र्जति न सुधावर्तितां नर्तितश्रीः ॥४४॥
भाण्डागाराण्यकृत विदुषां सा स्वयं भोगभाञ्जि
स्वातन्त्र्येण ग्रहणमवनेर्ब्राह्मणानामवादीत् ।
यामस्तन्वैरसहचरस्फूर्जदाशागजेन्द्र-
क्षोणीकोशप्रणयिनि यशस्येव रक्षामकार्षीत् ॥४५॥
चक्रे धाम त्रिभुवनगुरोः सा वितस्तासमीपे
कामारातेः शिखरनिकरक्षुण्णनक्षत्रमार्गम् ।

कूजत्काञ्ची निवहधिघ्नितव्याघ्लनिर्भर्त्सनानां
यस्योपान्ते भवति न भवक्रोधपात्रं मनोभूः ॥४६॥
यस्या भ्राता क्षितिपतिरिति ख्यातिशौनिधानं
भोजक्ष्माभृत्समुभयमहिमा लोहरारवण्डलोभूत् ।
शङ्के लक्ष्म्याः शिरसि चरणं न्यस्य वक्षःस्थितायाः
प्राप्ता लीलातिलकतुलनां यन्मुखे सूक्तिदेवी ॥४७॥
यस्य प्राप्ताद्भुतपरिणतेः कर्कशे तर्कमार्गे
त्यागः कासां विचरति गिरां गोचरे कान्तकीर्तिः ।
येन न्यस्ता दलितविपदां कोविदानां गृहेषु
श्रीर्नाद्यापि स्वपिति ललनाभूषणानां निनादैः ॥४८॥
गण्डाभोगोड्डमरविलुठद्बाष्पधाराशतेन
व्यातन्वानः कुचयुगतटीः पङ्किलाः सुन्दरीणाम् ।
यस्य क्रीडाकवलमकरोद्राजपुर्याः प्रतापं
बाहुर्बाहुस्थलकमलिनीराजहंसाम्बुवाहः ॥४९॥
श्रोणीबन्धे कुवलयदृशां द्रागवज्ञारसज्ञैः
पार्श्वद्वन्द्वे व्यतनुत सभामण्डनं पण्डितालीम् ।
रत्नच्छायाच्छुरणसुभगस्वर्णपत्रावमानी
मानी मेने श्रवसि च कथां वैष्णवीं भूषणं यः ॥५०॥
पुण्यैरैरावतकरिकरोच्चण्डदोर्दण्डशाली
देव्यां तस्यां कलशनृपतिस्तस्य जातस्तनूजः ।
संख्योत्संगादपसृतवतां भूभुजां वल्लभा श्रीः
खड्गे यस्य द्विपमदमषीपंकलिप्ते लुलोठ ॥५१
दर्पाध्मात प्रतिभटनृपव्रात सेनाशिरांसि
त्यक्त्वा सान्द्रोल्लसद्सिलताशैवलश्यामलानि ।
हेमाम्भोजप्रतिमवदनालोकनादेव यस्य
प्राप्ता लक्ष्मीश्चरणनिकटं कीर्तिहंसावतंसा ॥५२॥

दिग्धात्रासु स्फटिकविशदच्छायमच्छोदमेत्य
आरूयन्निन्द्रायुधखुरपुटोट्टङ्किताासु स्थलीषु ।
कादम्बर्याः परिजनमसौ मर्त्यलोकैकचन्द्र-
श्चन्द्रापीडस्तुतिषु विदधे संकुचद्वाग्विलासम् ॥५३॥
येनोदीच्यां दिशि गतवता वन्दितोसौ गिरीन्द्र-
श्चञ्चच्चण्डीपतिवृषखुरक्षोदलेखावतंसः ।
अंके लंकापतिकरतलोत्क्षेपलोलस्य यस्य
भ्रष्टाः केचित्तलभुवि गणा नाधुनाप्युच्छ्वसन्ति ॥५४॥
धृत्वा काश्चित्कनककपिशाः कौतुकाद्यक्षकन्याः
प्रत्यागच्छन्धनपतिपुरादुत्तरं मानसं यः ।
दत्ताश्लेषं हरमुकुटतः स्रस्तया नाकनद्या
हैमाब्जानामकृत वसतिं मानसादाहृतानाम् ॥५५॥
यस्योदारां परिकलयतः शस्त्रशास्त्रप्रतिष्ठां
द्वे प्रेयस्यौ जगति विदिते श्रीश्च वाग्देवता च ।
एका भेजे भुजमभिनवाम्भोजलीलातपत्रा
श्वेतच्छत्रायितसितयशश्चन्द्रिकान्या मुखेन्दुम् ॥५६॥
अश्वैः कृत्वा पवनगतिभिर्लङ्घनं बालुकाब्धे-
र्यः स्त्रीराज्यं व्यजयत जयापीडतुल्यप्रभावः ।
तत्र श्लाघामसहत पुनर्नैकवीरः स यस्मा-
त्सव्रीडोभूदपि रघुपतौ ताडके ताडकायाः ॥५७॥
यत्खड्गस्य स्मरणवशतः कालजिह्वासनाभे-
स्त्रासोल्लासत्रुटितमदनोन्मादमुद्रा नरेन्द्राः ।
हर्षं वर्षाजलदपटले कुन्तलेष्वङ्गनानां
श्रोणीलेखास्वपि च मुमुचुः शाद्वलश्यामलासु ॥५८॥
दृष्ट्वा देव्याः कुचपरिसरे हर्षदेवस्य मातु-
स्तुष्टः सेवानतधनपतिप्राभृतैकावलीं यः ।

कर्तुं वाञ्छन्नखिलभुवनाश्चर्यमस्योपकारं
प्रत्यानीते रघुपतिसुतैः पुष्पके खिन्नमाप ॥५९॥
खड्गे कुण्ठीभवति चिरतो निःस्पृहः खेदभागा-
द्यः शाखार्थी हरमिव चिरात् प्राग्गृहीतोज्झितेन ।
यः पौलस्त्यं तमपि विजितानन्दोऽपि यस्योपमायां
शङ्के लोकोत्तरगुणनिधेर्मुक्तितो रामभद्रः ॥६०॥
मन्थक्षोणीधरविदलिताम्भोधिलीलायुधेव
क्ष्माभृन्मूलान्यपि दलयति व्यायतैर्यस्य तुरङ्गैः ।
सेनाचक्रक्षपितसलिलां सां चकार स्वयं यः
श्रीकाश्मीरक्षितिपतिभुजक्रीडिताम्भश्चन्द्रभागाम् ॥६१॥
धत्ते यस्यास्तपनदुहितुः शैवलश्यामलीलां ।
नीलच्छाया तुरगपटली भास्करस्याधुनापि ।
तां कालिन्दीं सकलजयिनो यस्य सेनासमूहः
पृथ्वीलीलालुलितकबरीमेचकामाचचाम ॥६२॥
उर्वीमुर्वीधरसहचरैः पूरयन्यो यशोभि-
स्तन्निःशेषक्षितिपरिजयी कौरवं क्षेत्रमागात् ।
यत्र क्षत्रक्षतजपटले पार्थबाणाभिघातैः
कर्णभ्रष्टं कुरुपतियशोदन्तपत्रं ममज्ज ॥६३॥
यस्य प्रेयान्प्रथमतनयः कं न चक्रे सहर्षं
श्रीहर्षादप्यधिककवितोत्कर्षवान्हर्षदेवः ।
तीक्ष्णः स्वस्मिन्नसमकवलये भिन्नवर्मा रणेषु
क्ष्माभृच्चूडामणिकषणतः कुण्ठधारः कृपाणः ॥६४॥
यस्यापूर्वा पदपरिणतिः कापि चर्चाविचारे
वाक्चातुर्ये प्रसरति गर्ववादिनां मौनमुद्रा ।
प्रख्यातं तत्त्रिजगति पुनः सर्वभाषाकवित्वं
यस्यास्वादे भवति सिकता कर्कशा शर्करापि ॥६५॥

येनोत्कण्ठाव्यसनगुरुणा दग्धबालास्तरुण्यः
स्वस्मिन्मूर्च्छाकलनपरवशा बाष्पपङ्के लुठन्ति ।
तासां गण्डस्थलभुवि पुनः पाण्डिमा वर्ण्यते किं
यत्र स्पष्टीभवति शपथैः श्रोत्रयोर्दन्तपत्रम् ॥६६॥
दुर्गं प्राप्य क्षितिपतिरयं श्रीधरस्यानुजोऽसौ
कश्याकार्षीत्खलु कुलकोत्कर्षमुत्कर्षदेवः ।
येनारोप्य स्वभुजशिखरे निर्मिता भूर्भुवोर्वी
म्लेच्छक्षोणीपतिमुखुरदां [illegible] ॥६७॥
नाम्नापरो विजयमल्ल इति प्रतापी
भूपस्य तस्य तनयो [illegible] ।
पुष्पोपहारवति नूतनदन्तकान्त्या
वाग्देवता व्यधित यस्य मुखे प्रवेशम् ॥६८॥
नित्याभ्यासात्परिणतलिपेः सुन्दराश्चर्यलेखं
तल्लावण्यं वपुषि ललिते तस्य भूपालसूनोः ।
यत्र स्फूर्जल्ललटभललनालोकलोभैकपात्रे
जागर्ति ज्यानिनदमुखरः संततं पुष्पचापः ॥६९॥
तस्मादस्ति प्रवरपुरतः सार्धगव्यूतिमात्रां
भूमिं त्यक्त्वा जयवनमिति स्थानमुत्तुङ्गचैत्यम् ।
कुण्डं यस्मिन्नमलसलिलं तक्षकस्यादिभर्तु-
र्धर्मध्वंसोद्यतकलिशिरश्छेदचक्रत्वमेति ॥७०॥
यस्यास्ति खोनमुख इत्युपकण्ठसीम्नि
ग्रामः समग्रगुणसंपदवाप्तकीर्तिः ।
आलानरूपबहुयूपवति प्रविष्टं
नो यत्र बन्धनभियेव कलिद्विपेन ॥७१॥
ब्रूमस्तस्य प्रथमवसतेरद्भुतानां कथानां
किं श्रीकण्ठश्वशुरशिखरिक्रोडलीलाललाम्नः ।

एको भागः प्रकृतिसुभगं कुंकुमं यस्य सूते
द्राक्षामन्यः सरससरयूपुण्ड्रकच्छेदपाण्डुम् ॥७२॥
कर्तुं कीर्तिप्रणयि कुशलाः कौशिकं गोत्रमुच्चै-
स्तत्र ब्रह्मप्रवणमनसो ब्राह्मणाः केचिदासन् ।
यान्काश्मीरक्षितितिलकतां मध्यदेशावतंसा
न्गोपादित्यक्षितिपतिरसौ पावनानानिनाय ॥७३॥
कीर्तिं येषां शतमखसखीमुत्सुकानामवाप्तुं
धूमस्तोमे मखपरिचिते पूरयत्यन्तरिक्षम् ।
नो केषांचिद्वचनमश्रृणोन्नाकरोन्नाकचिन्तां
शक्रश्चित्रार्पित इव परं छायया भूद्दरिद्रः ॥७४॥
तेषां जगत्त्रयपवित्रचरित्रभाजां
धत्तेस्म मुक्तिकलशः कुलशेखरत्वम् ।
यस्याग्निहोत्रपरिशीलनजेन जाता
स्वेदाम्भसैव कलिकालकलंकशान्तिः ॥७५॥
शङ्के पङ्करुहवसतिना स्थापिता शान्तिहेतो
रन्योन्येर्ष्याकलहचतुरा याश्चतुर्ष्वाननेषु ।
एकत्रैव स्वमुखकमले लीलया वल्लभानां
चक्रे तासामपि चतसृणां यः श्रुतीनां निवासम् ॥७६॥
दातापराक्रमधनः श्रुतपारदृश्वा
नाम्नास्य राजकलशस्तनयो बभूव ।
प्रालेयभूधरगुहास्तिमिरच्छलेन
यस्याधुनापि मखधूममिवोद्वमन्ति ॥७७॥
द्राक्षापूर्णान्यखिलजनताभोगहेतोर्वनानि
व्याख्यास्थानान्यमलसलिला यस्य कूपाः प्रपाश्च ।
स्थानेस्थाने सुकृतवसतेर्मण्डलाग्रावतंसा
धर्मव्याविष्कृतकलिभयस्यांगरक्षा बभूवुः ॥७८॥

समाधारः सारस्वतरसनिधानं श्रुतिनिधिः
समुत्पन्नस्तस्माद्मल यशसो ज्येष्ठकलशः ।
महाभाष्यव्याख्यामखिल जनवन्द्यां विदधतः
सदा यस्य च्छात्रै स्तिलकितमभूत्प्राङ्गणमपि ॥७९॥
इष्टापूर्तेष्वतिथिविषये सान्त्वने सेवकाना
मन्येष्वन्येष्वपि च गहनं किन्तु तस्योचितेषु ।
दृष्टादृष्टोपकरणगणप्रापणे यः प्रवीणां
नागादेवीमलभत शुभस्तोमपात्रं कलत्रम् ॥८०॥
अङ्गैस्त्वङ्गत्कनकरुचिभिः कार्मणं लोचनानां
सूरेस्तस्माद्जनि जगतां शेखरो बिल्हणाख्यः ।
सान्द्रैर्वेदध्वनिभिरनभिव्यक्तमञ्जीरनादा
मौञ्जीबन्धात्प्रभृति वदने यस्य वाग्देवतासीत् ॥८१॥
साङ्गो वेदः फणिपतिदिशा शब्दशास्त्रे विचारः
प्राणा यस्य श्रवणसुभगा सा च साहित्यविद्या ।
को वा शक्तः परिगणयितुं श्रूयतां तत्त्वमेत-
त्प्रज्ञादर्शे किमिव विमले नास्य संक्रान्तमासीत् ॥८२॥
चक्रं यस्याक्रियत वदनप्रेक्षि विद्यावधूनां
श्रीवाग्देव्याश्चरणरजसा कार्मणत्वं गतेन ।
यातः सार्धं दिशि दिशि पुनर्बन्धुराः सर्वबन्धाः
कीर्तेः पारिप्लवविदलने सौविदल्ला बभूवुः ॥८३॥
विद्वत्तायाः स खलु शिखरं प्राप यस्येष्टरामो
ज्येष्ठो भ्राता क्षितिपतिशतास्थानलीलावतंसः ।
वक्त्रे काव्यामृतरसभरास्वादसक्तैर्यदीये
दृष्टा देवी सुकविजननी सा प्रपापालिकेव ॥८४॥
यस्यानंदः समजनि यशोभाजनस्यानुजोसौ
स्पर्धाबन्धोद्धुरकविमदच्छेदलीलाकुठारः ।

प्रस्थे दोःस्थ्यं हिमशिखरिणः प्राप्य काठिन्ययोगा-
ज्जाने जिह्वाकिसलयसखी शारदा यस्य जाता ॥८५॥
काश्मीरेभ्यः सकलममलं शास्त्रतत्त्वं गृहीत्वा
प्रालेयाद्रेरपि गुणमसौ निश्चितं स्वीचकार ।
देशेदेशे कथमपरथा वादिनामाननानि
कुर्वश्चक्रे तुहिनपटलप्लुष्टपद्मोपमानि ॥८६॥
दोलालोलद्रुतजघनया राधया यत्र भग्ना
कृष्णक्रीडाकुलविटपिनो नाधुनाप्युच्छ्वसन्ति ।
जल्पक्रीडामथितमथुरासूरिचक्रेण केचि-
त्तस्मिन्वृन्दावनपरिसरे वासरा येन नीताः ॥८७॥
निःसामान्यश्रुतगुणकथादत्तवादिज्वराणां
छात्रौघाणां दिशिदिशि हठात्तन्वतां यद्यशांसि ।
आसीदाशागजमदजलास्वादमत्तद्विरेफ-
श्रेणीगीतध्वनिकलकलः केवलं सोन्तरायः ॥८८॥
ग्रामो नासौ न स जनपदः सास्ति नो राजधानी
तन्नारण्यं न तदुपवनं सा न सारस्वती भूः ।
विद्वान्मूर्खः परिणतवया बालकः स्त्री पुमान्वा
यत्रोन्मीलत्पुलकमखिला नास्य काव्यं पठन्ति ॥८९॥
यस्योत्तुङ्गैर्मणिमयगृहैर्लीलयोत्तारिता श्री-
र्व्योमोत्सङ्गात्त्रिदशपुरतः प्राप्तसोपानलीलैः ।
द्वारे गङ्गां कलकलकलां तर्जयित्वा प्रविष्टा
कीर्तिर्यस्य स्ववशमकरोत्तत्पुरं कान्यकुब्जम् ॥९०॥
धर्मस्येव व्युपरतकलेर्यत्र गीर्वाणसिन्धु-
स्रोतःकोशे विशति यमुनावेणिभङ्ग्या कृपाणः ।
तस्मिन्वारान्कति न कृतिना तीर्थनाथे प्रयागे
दत्ताविश्राद्भुतगुणगणोपार्जिता येन लक्ष्मीः ॥९१॥

मन्ये भ्राम्यत्कलियुगभयादागतस्योपकण्ठे
धर्मस्याध्वश्रमविरमणं शीकरैर्यो करोति ।
वाराणस्यां पुरि परिहृतो येन तस्यां द्युसिन्धौ
स्नात्वा दैवोपनतकुनृपालोकनोत्थः कलंकः ॥९२॥
कालः कालञ्जरगिरिपतेर्यः प्रयाणे धरित्रीं
तुरङ्गाराणां खुरपुटरवैः क्ष्मापशून्यां चकार ।
श्रीडाहालक्षितिपतिरवृदः सोऽपि यं प्राप्य वृत्तं
कर्णः कर्णामृतरसभरास्वादमन्तस्ततान ॥९३॥
यस्यात्युग्रः स्फटिकगिरिशो तं विनिक्षिप्य वामे
प्रालेयाद्रेः क्षणमभिमुखो दक्षिणः पाणिरासीत् ।
तं पौलस्त्यं विदलितबलः सूक्तिनिःस्यन्दशीतां
सीताभर्तुर्व्यरचयदसौ राजधानीमयोध्याम् ॥९४॥
नीत्वा गङ्गाधरमधरतां डाहलाधीशधाम्नि
क्रीडाक्रान्तप्रतिभटकवेः पूर्वदिक्पाटरेषु ।
निर्जित्यैरावतमदजलभ्रान्तभृङ्गालिनादा-
न्सुत्राम्णोऽपि श्रवसि लुठितं यस्य शंके कथाभिः ॥९५॥
भोजः क्ष्माभृत्स खलु न खलैर्यस्य साम्यं नरेन्द्र-
स्तत्प्रत्यक्षं किमिति भवता नागतं हा हतास्मि ।
यस्य द्वारोड्डमरशिखरक्रोडपारावतानां
नादव्याजादिति सकरुणं व्याजहारेव धारा ॥९६॥
कक्षाबन्धं विदधति न ये सर्वदेवाविशुद्धा-
स्तद्भाषन्ते किमपि भजते यज्जुगुप्सास्पदत्वम् ।
तेषां मार्गे परिचयवशादर्जितं गुर्जराणां
यः संतापं शिथिलमकरोत्सोमनाथं विलोक्य ॥९७॥
तामप्येष क्षितिपतिशतालोकनौत्सुक्ययोगा-
दाचक्राम क्रमुकविटपिश्यामलामब्धिवेलाम् ।

यत्र स्वेच्छाप्रसरमधुनाप्यम्बुराशेर्भिनत्ति
 क्षिप्ता तीक्ष्णपहरणमिषाद्भार्गवेणार्गलेव ॥९८॥
खस्वाटत्वं शिरसि घटयन्नम्बुधेर्यश्चकासे
 लङ्कानाथापहृततनयापृष्ठलग्नेव धात्री ।
सीतावार्ताश्रवणचकितेवान्तिके राक्षसानां
 सेतोस्तस्माद्यदि परमगान्नास्य कीर्तिः परस्तात् ॥९९॥
सामान्योर्वीपतिषु विमुखः शेखरोसौ बुधानां
 यातस्तस्यां ककुभि शनकैः कौतुकी दक्षिणस्याम् ।
यल्लीलाक्षीकुचतटभुवां ब्रूमहे किं गुरुत्वं
 यासां शिष्यस्त्रिभुवनजयी जृम्भते पञ्चबाणः ॥१००॥
नीलच्छत्रोन्मदगजघटापात्रमुत्त्रस्तचोला-
 ञ्चालुक्येन्द्रादलभत कृती योत्र विद्यापतित्वम् ।
अस्मिन्नासीत्तदनु निविडाश्लेषहेवाकलीला
 वेल्लद्बाहुक्वणितवलया संततं राजलक्ष्मीः ॥१०१॥
दिङ्मातङ्गैरपि सपुलकैः शुश्रुवे यस्य कीर्ति-
 र्निद्रामुद्राप्रणयिषु मदास्वादलः षट्पदेषु ।
तेन प्रीत्या विरचितमिदं काव्यमव्याजकान्तं
 कर्णाटेन्दोर्जगति विदुषां कण्ठभूषात्वमेतु ॥१०२॥
लब्धा लक्ष्मीर्दिशि दिशि कृताः सम्पदः साधुभोग्याः
 प्राप्ता योग्यैः सह कलहतः कुत्र नोच्चैर्जयश्रीः ।
गोष्ठीबन्धः सपदि सुजनैः सारनिष्कर्षदक्ष-
 प्रज्ञालब्धस्तुतिभिरचिराद्स्तु काश्मीरकैर्मे ॥१०३॥
आस्तांम नृपप्रसादकणिकामद्राक्ष्म लक्ष्मीलवा-
 न्किंचिद्द्राक्ष्मयमभ्यगीष्महि गुणैः कांश्चित्पराजेष्महि ।
इत्यज्ञानमयीसकाष्मं कियतीं नामर्थकन्थां मनः
 स्वाधीनीकृतशुद्धबोधमधुना वाञ्छत्यमर्त्यापगाम् ॥१०४

मन्दाकिन्याः पवनचटुलोत्तालवीचीषुकूले
कूलोत्सङ्गं विरचितवतां योगनिद्राभियोगम् ।
शेषाः केषामपि परिणतौ वासराः पुण्यभाजां
शान्तस्वान्तस्थितगिरिसुतावल्लभानां प्रयान्ति ॥१०५

स्वेच्छाभङ्गुरभाग्यमेघतडितः शक्या न रोद्धुं श्रियः
प्राणानां सततप्रयाणपटहश्रद्धा न विश्राम्यति ।
अस्मिन्येन यशोमये वपुषि वः कुर्वन्ति काव्यामृतै-
स्तानाराध्य गुरूंन्विधत्त सुकवीन्निर्गर्वमुर्वीश्वराः ॥१०६

हे राजानस्त्यजत सुकविप्रेमबन्धे विरोधं
शुद्धा कीर्तिः स्फुरति भवतां नूनमेतत्प्रसादात् ।
तुष्टैर्बद्धं तदलघु रघुस्वामिनः सच्चरित्रं
क्रुद्धैर्नीतस्त्रिभुवनजयी हास्यमार्गं दशास्यः ॥१०७॥

यस्य स्वैरक्रीडागवरचरितालोकनत्रस्नयेव
न्यस्ता मूर्ध्नि शशिकलिकया क्वापि दूरे कुरङ्गः ।
स व्युत्पत्तिं सुकविवचनेष्वादिकर्ता श्रुतीनां
देवः प्रेयानचलदुहितुर्निश्चलां वः करोतु ॥१०८॥

इति श्री विक्रमांकदेवचरिते महाकाव्ये त्रिभुवनमल्लदेवविद्यापति काश्मीरकभट्टश्रीबिल्हणविरचितेऽष्टादशः सर्गः ॥१८॥

इति श्रीत्रिभुवनमल्लदेव विद्यापतिकाश्मीरकभट्टश्रीबिल्हणस्य कृतौ विक्रमाङ्कदेवचरिताभिधानं महाकाव्यं समाप्तम् ॥